4.3.7 व्यवसायवाचकनामावली
4.3.8 भोजनपात्रनामावली
4.3.9 खाद्यपदार्थनामावली
4.3.10 विविधसंस्थानां नामावली

4.4सारांशः

4.5 अभ्यासप्रश्नानाम् उत्तराणि

4.6 सन्दर्भग्रन्थसूची

4.7 सहायकोपयोगि पाठ्यसामग्री

## 4.1 प्रस्तावना

संस्कृतभाषा विश्वस्य अत्यन्ता प्रामाणिकी शुद्धा च भाषा अस्ति। अद्यत्वे सर्वासु भाषासु विकृतिः संजाता किन्तु संस्कृतभाषायां कापि विकृतिः न संजाता। संस्कृतभाषा अद्यापि यथा उच्चते तथैव लिख्यते पठ्यते च। इयं संस्कृतभाषायाः विशेषता वर्तते।

भाषायाः द्विविधं स्वरूपं भवति एकं तु साहित्यिकं द्वितीयं व्यवहारिकं च। अर्थात् व्यवहारस्य भाषा। भाषायाः प्रयोगाय, तया सम्भाषणं च कर्त्तुं शब्दानाम् आवश्यकता भवति। शब्दाश्च विषयानुगुणं भवन्ति। यथा गृहस्य सम्बन्धे वार्तां कर्त्तुं गृहसम्बन्धीनाम् आवश्यकता भवति एवमेव शाकादिनां सम्बन्धे फलादिनां चापि सम्बन्धे एतद् विषयकाणां शब्दानां परिचयस्य आवश्यकता भवति। संस्कृतभाषा सर्वाभ्यः भाषाभ्यः प्राचीना वर्तते। अस्यां भाषायां प्राचीनकालाद् आरभ्यः अद्य पर्यन्तं महत् परिवर्तनं जायमानम् अस्ति। अतः अभिनवानां शब्दानां कृते संस्कृते के के शब्दाः निर्मिताः सन्ति, तेषां प्रयोगः कुत्र, कथं च क्रियते इत्येतत् सर्वं भवन्तः अस्याम् अन्वितौ ज्ञास्यन्ति।

## 4.2 उद्देश्यम्

इमाम् अन्वितिं पठित्वा भवन्तः एतद् ज्ञातुं सक्षमाः भविष्यन्ति यत्–

1. संस्कृते सम्भाषणं कथं क्रियते।
2. संस्कृते वाक्यप्रयोगः कथं क्रियते।
3. संस्कृते नूतनाः शब्दाः के के सन्ति।
4. गृहसम्बन्धिनः शब्दाः के के सन्ति।
5. विभिन्नवर्गाणां नामानि कानि कानि सन्ति।
6. कस्य शब्दस्य कीदृशः अर्थः उपयोगः च भवति।

## 4.3विविधशब्दावली

### 4.3.1 कालबोधकनामावली

| शब्दाः | अर्थाः | शब्दाः | अर्थाः |
|---|---|---|---|
| अद्य | आज | इदानीम् | इस समय |
| श्वः | कल आने वाला | ह्यः | बीता हुआ कल |
| परश्वः | परसों | परह्यः | बीता हुआ परसों |
| प्रपरश्वः | परसों के बाद का दिन | प्रपरह्यः | बीता हुआ परसों से पहले का दिन |
| आगामी | आने वाला | गतम् | बीता हुआ |
| सप्ताहः | सप्ताहः | दिवसः | दिन |
| वासरः | वार | मासः | महिना |
| रविवासरः | रविवार | चैत्रः | चैत्र |
| सोमवासरः | सोमवार | वैशाखः | वैशाख |
| भौमवासरः | मंगलवार | ज्येष्ठः | जेठ |
| बुधवासरः | बुधवार | आषाढः | आषाढ़ |
| गुरुवासरः | बृहस्पतिवार | श्रावणः | श्रावण |
| शुक्रवासरः | शुक्रवार | भाद्रपदः | भाद्रपद |
| शनिवासरः | शनिवार | आश्विनः | आश्विन |
| ऋतुः | ऋतु | कार्तिकः | कार्तिक |
| वसन्तः | वसन्त | मार्गशीर्षः | मार्गशीर्ष |
| ग्रीष्मः | ग्रीष्म | पौषः | पौष |
| वर्षाः | वर्षा | माघः | माघ |

| | | | |
|---|---|---|---|
| शरद् | शरद | फाल्गुनः | फाल्गुन |
| हेमन्तः | हेमन्त | अयनम् | अयन |
| शिशिरः | शिशिन | उत्तरायणम् | उत्तरायण |
| पक्षः | पखवाडा | दक्षिणायनम् | दक्षिणायन |
| संवत्सरः | वर्ष | वर्षम् | वर्ष |

**शब्दानां वाक्यप्रयोगः**

1. अद्य – अद्य कः वासरः? अद्य सोमवासरः।
2. श्वः – श्वः भौमवासरे भवान् कुत्र गमिष्यति।
3. ह्यः – ह्यः रविवासरे विद्यालये अवकाशः आसीत्।
4. वासरः – सप्ताहे सप्तवासराः भवन्ति।
5. वसन्त–ऋतुः – चैत्रवैशाखमासयोः वसन्तर्तुः भवति।

**अभ्यासप्रश्नाः 01 अत्र केचन शब्दाः प्रदत्ताः सन्ति तान् आदाय रिक्तस्थानानि पूरयन्तु–**

**(द्वादश, षट्, परश्वः, कार्तिकः, सूर्यः)**

1. नैनीतालात् मम भगिनी.....................................गृहम् आगमिष्यति।
2. वर्षे......................................मासाः भवन्ति।
3. दीपावलीपर्व........................................मासे भवति।
4. उत्तरायणे.....................................मकरराशौ प्रविशति।
5. ऋतवः........................................भवन्ति।

## 4.3.2 गृहोपकरणनामावली

| गृहम् | द्वारम् | वातायनम् | प्रकोष्ठः |
|---|---|---|---|
|  मकान |  दरवाजा |  खिडकी |  कमरा |

| गोलदीपः | वक्रदीपः | दण्डदीपः | नेयदीपः |
|---|---|---|---|
| <br>बल्व | <br>सी.एफ.एल. | <br>ट्यूबलाईट | <br>लालटेन |
| व्यजनम् | समीकरः | दूरदर्शनम् | आकाशवाणी |
| <br>पंखा | <br>प्रेस | <br>टी.वी. | <br>रेडियो |
| घटी | दूरवाणी | वस्त्रप्रक्षालनयन्त्रम् | शीतकयन्त्रम् |
| <br>घडी | <br>मोबाईल | <br>वाशिंगमशीन | <br>फ्रिज |
| आसन्दः | उत्पीठिका | पर्यंकः | कपाटिका |
| <br>कुर्सी | <br>टेबिल | <br>पलंग | <br>अल्मारी |

| | | | |
|---|---|---|---|
| पुष्पाधानी | स्मृतिचित्रम् | दर्पणः | जवनिका |
| <br>गुलदस्ता | <br>सीनरी | <br>शीशा | <br>पर्दे |
| सम्मार्जनी | अवकरकण्डोलः | कटः | पादकटः |
| <br>झाडू | <br>डस्टविन | <br>दरी | <br>पायदान |
| तालः | कुंचिका | अर्गलम् | स्तम्भः |
| <br>ताला | <br>चांबी | <br>कुण्डा | <br>खम्भा |
| नलिका | घटः | पात्रम् | चषकः |
| <br>नल | <br>घडा | <br>बर्तन | <br>गिलास |
| स्नानफेनकम् | दन्तफेनकम् | दन्तकूर्चः | द्रोणी |
| <br>नहानेकासाबुन | <br>दन्तपेस्ट | <br>ब्रश | <br>बाल्टी |

| छत्रम् | सूची | सूत्रम् | स्यूतः |
|---|---|---|---|
|  छाता |  सुई |  धागा |  बैंग |
| कंकतम् | पिंज | छुरिका | स्थालिका |
|  कंघा |  बिजलीकाबटन |  चाकू |  थाली |

## शब्दानां वाक्यप्रयोगः–

1. गृहम् – गृहे सर्वे आनन्देन वसन्ति।
2. वातायनम् – वातायनात् वायुः प्रकाशः च आगच्छति।
3. वक्रदीपः – अधुना सर्वत्र वक्रदीपः प्रयुज्यते।
4. दूरवाणी – शरीरलाभाय दूरवाण्या अधिकः प्रयोगः न कर्तव्यः।
5. आकाशवाणी – प्रधानमन्त्रिणा मनोवार्ताः आकाशवाण्यां प्रसार्यन्ते।

## अभ्यासप्रश्नाः 02केन वस्तुना किं कार्यं भवति क्रियते वा इति विचिन्त्य लिखन्तु–

**यथा**–व्यजनम्– व्यजनेन वायुः प्रसार्यते।

1. घटी – घट्या......................................................ज्ञायते।
2. कपाटिकायां – कपाटिकायां................................................स्थाप्यन्ते।
3. सम्मार्जनी – सम्मार्जन्या...................................................क्रियते।
4. कुंचिका – कुंचिकया.......................................................उद्घाट्यते।
5. दन्तफेनकम् – दन्तफेनकेन................................................स्वच्छीक्रियन्ते।
6. छत्रम् – छत्रेण.........................................................वार्यते।
7. छुरिका – छुरिकया.....................................................कर्त्यते।
8. पिंजः – पिंजेन...........................................................संचाल्यते।
9. सूची – सूच्या.................................................................सीव्यन्ते।
10. दर्पणः – दर्पणेन.............................................................दृश्यते।

## 4.3.2.1 बन्धुवाचकनामावली–

| शब्दाः | अर्थाः | शब्दाः | अर्थाः |
|---|---|---|---|
| पिता | पिता | माता | माता |
| पितामहः | दादा | पितामही | दादी |
| प्रपितामहः | परदादा | प्रपितामही | परदादी |
| पितृव्यः | चाचा | मातामहः | नाना |
| पितृव्या | चाची | मातामही | नानी |
| पुत्रः | पुत्र | मातुलः | मामा |
| पुत्री | पुत्री | मातुलानी | मामी |
| पौत्रः | पोता | मातृष्वसा | मौसी |
| प्रपौत्रः | परपोता | मातृष्वसृपतिः | मौसा |
| पौत्री | पोती | मातृष्वस्रीयः | मौसेरा भाई |
| प्रपौत्री | परपोती | श्वसुरः | ससुर |
| भ्राता | भाई | श्वश्रूः | सास |
| भगिनी | बहिन | पितृष्वसा | फूफी (बुआ) |
| अग्रजः | बडा भाई | पितृष्वसृपतिः | फूफा |
| अनुजः | छोटा भाई | पुत्रबधूः | पतोहू (बहू) |
| अग्रजा | बडी बहिन | ननान्दा | ननद |
| अनुजा | छोटी बहिन | भागिनेयः | भानजा |
| पितृव्यपुत्रः | चचेरा भाई | जामाता | दामाद |
| भ्रातृपुत्रः | भतीजा | आवुत्तः | जीजा |
| भ्रातृजाया | भाभी | भृत्यः | नौकर |
| पतिः | पति | परिचारिका | नौकरानी |
| पत्नी | पत्नी | आलिः | सखी |
| देवरः | देवर | मित्रम् | मित्र |
| श्यालः | साला | शत्रुः | शत्रु |

**उपर्युक्तानां शब्दानां वाक्यप्रयोगः–**

1. पिता – मम पिता शिक्षकः अस्ति।
2. माता – माता अतीव मृदुव्यवहारं करोति।
3. मातामहः– मातामहः मां कथां श्रावयति।

4. पितृव्यः – पितृव्यः प्रतिदिनं चाकलेहम् आनयति।
5. आवुत्तः – मम आवुत्तः देहल्यां कार्यं करोति।

**अभ्यासप्रश्नाः 03 भवद्भिः सम्बन्धवाचकशब्दार्थाः पठिताः तदनुगुणम् अधोलिखितानां प्रश्नानाम् उत्तराणि लिखन्तु–**

1. पितृवंशस्य सम्बन्धवाचकान् सप्तशब्दान् लिखत।
2. मातृवंशस्य सम्बन्धवाचकान् सप्तशब्दान् लिखत।
3. पत्नीवंशस्य सम्बन्धवाचकान् शब्दान् लिखत।

### 4.3.2.2 शरीरावयवनामावली

| **शब्दाः** | **अर्थाः** | **शब्दाः** | **अर्थाः** |
|---|---|---|---|
| अंगम् | अंग | पादः | पैर |
| आननम् | मुँह | गुल्फः | पैर की ऐड़ी |
| दन्तः | दाँत | अंगुष्ठः | अंगूठा |
| जिह्वा | जीभ | नखः | नाखून |
| तालुः | तालु | पादतलः | पैर का निचला भाग |
| नेत्रम् | आँख | ऊरुः | जंघा |
| भ्रूः | भौंह | जानुः | घूटना |
| पक्ष्म | पलक | नितम्ब | नितम्ब |
| नासिका | नाक | कटिः | कमर |
| नासारन्ध्र | नासिका का छिद्र | नाभिः | नाभि |
| ओष्ठः | होंठ | उदरम् | पेट |
| अधरोष्ठः | नीचे का होंठ | वक्षः | छाती |
| कपोलः | गाल | फुफ्फुसम् | फेफडा |
| ललाटः | माथा | स्कन्धः | कन्धा |
| शिरः | सिर | बाहूः | भुजा |
| शिखा | चोटी | हस्तः | हाथ |
| केशः | बाल | मणिबन्धः | कलायी |
| कर्णः | कान | कूर्परः / कफोणिः | कोहनी |
| श्मश्रुः | दाढी | स्तनः | स्तन |
| चिबुकम् | डोढी | अस्थिः | हड्डी |

| | | | |
|---|---|---|---|
| कण्ठः | गला | आमाशयः | आमाशय |
| शरीरम् | शरीर | रक्तम् | रक्त |
| पायुः | गुदा | तुन्दम् | तोंद |
| मुष्टिः | मुठ्ठी | धमनी | नाडी |
| पृष्ठम् | पीठ | हृदयम् | हृदय |
| लिंगम् | पुरुषलिंग | मनः | मन |
| वृषणः | अण्डकोष | योनिः | योनि |

## उपर्युक्तानां शब्दानां वाक्यप्रयोगः–

1. आननम् – गणेशस्य आननं गजः इव अस्ति।
2. जिह्वा – रसग्रहणं जिह्वया क्रियते।
3. दन्तः – मानवस्य द्वात्रिंशत् दन्ताः भवन्ति।
4. हस्तः – हस्तौ प्रक्षाल्य भोजनं करणीयम्।
5. कण्ठः – लंतामंगेशकरमहोदयायाः कण्ठः मधुरः अस्ति।

**अभ्यासप्रश्नाः 04 भवद्भिः शरीरावयववाचकशब्दाः पठिताः तदनुगुणम् कस्य अंगस्य किं कार्यम् इति लिखन्तु – यथा–**नेत्रस्य कार्यं दर्शनम्। मुखस्य कार्यं भाषणम्।

1. हस्तः – ........................................................................................................ ।
2. पादः – ........................................................................................................ ।
3. दन्तः – ........................................................................................................ ।
4. फुफ्फुसम् – ........................................................................................................ ।
5. नसिका – ........................................................................................................ ।
6. मनः – ........................................................................................................ ।
7. कर्णः – ........................................................................................................ ।

### 4.3.2.3 वस्त्राभूषण–श्रृंगारनामावली–

| **शब्दाः** | **अर्थाः** | **शब्दाः** | **अर्थाः** |
|---|---|---|---|
| वस्त्रम् | कपडा | आभरणम् | आभूषण |
| अधोवस्त्रम् | धोती | ललाटभरणम् | मांगटिका |
| करांशुकम् | कुर्ता | नासाभरणम् | नथ |
| पादंशुकम् | पायजामा | नासापुष्पम् | नाक का फूल |
| उत्तरीयम् | दुपट्टा | कर्णपूरः | कनफूल |
| शाटिका | साड़ी | कुण्डलम् | कान की बाली |
| अवगुण्ठनम् | घूंघट | कण्ठाभरणम् | कण्ठा |

| | | | |
|---|---|---|---|
| कंचुलिका | ब्लाउज | ग्रेवेयकम् | हसुली |
| प्रावारः | कोट | मुक्तावली | मोती की माला |
| प्रावारकम् | शेरवानी | सौभाग्यसूत्रम् | मंगलसूत्र |
| बृहतिका | ओवरकोट | केयूरम् | बाजू बन्द |
| आप्रपदीनम् | पैन्ट | कंकणम् | कंगन |
| अन्तरीयम् | पेटीकोट | कांचवलयम् | चूडी |
| अर्धोरुकम् | अन्डरवीयर | अंगुलीयकम् | अंगूठी |
| प्रच्छदपटः | चुन्नी | मेखला | करधनी |
| स्यूतवरः | सलवार | नूपुरम् | पाजेब |
| उष्णीषम् | पगडी | पादाभरणम् | लच्छे (बिच्छू) |
| ऊर्णावरकम् | स्वैटर | मुकुटम् | मुकुट |
| पादकोषः | मोजे | किंकिणी | घुघरु |
| हस्तकोषः | दस्ताने | सिन्दूरम् | सिन्दूर |
| गलबन्धः | मफलर | चूर्णकम् | पाउडर |
| शिरस्त्राणम् | टोपी | बिन्दुः | बिन्दी |
| अंगप्रौंछः | तौलिया | ललाटिका | टीका |
| आच्छादकम् | चादर | तिलकम् | तिलक |
| उपाधानम् | तकिया | कज्जलम् | काजल |
| तल्पः | गद्दा | गन्धतैलम् | सुगन्धित तेल |
| तूलिका | रजाई | मुखरागः | क्रीम |
| कम्बलः | कम्बल | ओष्ठरागः | लिपिस्टिक |
| रांकवम् | शाल | नखरागः | नेल पालिस |
| प्रोंछः | तौलिया | उद्वर्तनम् | उबटन |
| करवस्त्रम् | रुमाल | श्रृंगारधानम् | श्रृंगारदानी |
| कटिबन्धः | बैल्ट | श्रृंगारफलकम् | ड्रेसिंगटेबिल |

**इमानि वाक्यानि पठन्तु परिशीलयन्तु च –**

1. वस्त्रम् – शरीराच्छादनाय वस्त्राणि आवश्यकानि।
2. अधोवस्त्रम् – अधोवस्त्रं करांशुकं च भारतीयः वेशः अस्ति।
3. प्रावारः – अधिवक्तुः प्रावारः कृष्णवर्णस्य भवति।
4. आभरणम् – महिलाः आभरणानि बिना न शोभन्ते।
5. कज्जलम् – दृष्टिदोषपरिहाराय कज्जलम् उपयुज्यते।

## अभ्यासप्रश्नाः 05शरीरस्य कस्मिन् अङ्गे किम् वस्त्रम् आभूषणं वा ध्रियते, तत् सुमेलयन्तु–

**यथा**–नासिका– नासापुष्पम्। कर्णः– कुण्डलम्।

1. ललाटम् –.......................................................।
2. कण्ठः –.......................................................।
3. हस्तः –.......................................................।
4. पादांगुलिः –.......................................................।
5. पर्यंकः –.......................................................।
6. शिरः –.......................................................।
7. ओष्ठः –.......................................................।
8. कपोलः –.......................................................।
9. पादः –.......................................................।
10. कटिः –.......................................................।

### 4.3.2.4 अध्ययन–लेखनसम्बद्धनामावली–

| शब्दाः | अर्थाः | शब्दाः | अर्थाः |
|---|---|---|---|
| पुस्तकम् | पुस्तक | आसन्दः | कुर्सी |
| टिप्पणीपुस्तिका | कापी | उत्पीठिका | मेज (टेबल) |
| ग्रन्थः | पुस्तक | कपाटिका | अल्मारी |
| रामायणम् | रामायण | कृष्णफलकम | श्यामपट्ट(ब्लेक बोर्ड) |
| अंकः | अंक | सुधाखण्डः | सुधाखण्ड (चॉक) |
| अध्यायः | अध्याय | रब्बरबन्धः | रबरबैंड |
| पाठः | पाठः | निर्यासः | गोंद |
| पाठ्यक्रमः | पाठ्यक्रम | लेखनी | कलम (पेन) |
| स्वाध्यायः | स्वाध्याय | अंकनी | पेंसिल |
| कक्षा | कक्षा | वर्णलेखनी | स्केचपेन |
| अनुशासनम् | अनुशासन | कागदम् | कागज |
| अनुपस्थितः | अनुपस्थित | पत्रभारः | पत्रभार |

| | | | |
|---|---|---|---|
| उपस्थितः | उपस्थितः | अन्तःपेटिका | आन्तरिक बक्सा |
| अवकाशः | अवकाश | रन्ध्रिका | छिद्रण मशीन |
| क्रीडा | खेल | मृदुमुद्रा | रबड़ की मोहर |
| क्रीडाक्षेत्रम् | मैदान | मापिका | स्केल |
| सभागारम् | सभागार | लेपनपट्टिका | चिपकने वाली टेप |
| छात्रावासः | हास्टिल | योजिनी | स्टेपलर |
| पाठशाला | स्कूल | पत्रसूची | पिन |
| विद्यालयः | स्कूल | मार्जनी<br>. | रबड |
| छात्रः | विद्यार्थी | कर्तरी | कैंची |
| छात्रा | विद्यार्थिनी | संकेतिका | प्वाईंटर |
| पृष्ठम् | पेज | श्वेतपत्रम् | सफेद कागज |
| परीक्षा | परीक्षा | लेखनपीठम् | डेस्क |
| परीक्षाफलम् | रिजल्ट | दंशकम् | मणि क्लिप |
| सुलेखः | सुन्दर लेख | कालांश | कालांश |
| विभागः | विभाग | | |

**शब्दानां वाक्यप्रयोगः–**

1. पुस्तकम्– पुस्तके विभिन्नपाठाः भवन्ति।
2. लेखनी – लेखन्या लेखनकार्यं क्रियते।
3. सुधाखण्डः – अध्यापकः सुधाखण्डेन श्यामपट्टे लिखति।
4. मृदुमुद्रा – आवेदनपत्रं प्रमाणयितुं प्रधानाचार्यः मृदुमुद्रायाः प्रयोगं करोति।
5. अनुशासनम् – छात्रजीवने अनुशासनस्य महती आवश्यकता भवति।
6. सभागारम् – विद्यालयस्य वार्षिकोत्सवः सभागारे आयोज्यते।

7. संकेतिका – शिक्षकः विशिष्टस्य प्रकरणस्य पाठनं संकेतिकया करोति।

**अभ्यासप्रश्नाः 06 कः शब्दः केन सह सम्बद्धः अस्ति, इति विचिन्त्य लिखन्तु–**

**यथा– मसिः– लेखनी। कर्गदम्– लेखनी।**

1. कक्षा –.......................................................... ।
2. पाठः –.......................................................... ।
3. रन्ध्रिका –.......................................................... ।
4. परीक्षाफलम् –.......................................................... ।
5. छात्रः –.......................................................... ।
6. सुधाखण्डः –.......................................................... ।
7. मार्जनी –.......................................................... ।
8. आसन्दः –.......................................................... ।
9. पुस्तकम् –.......................................................... ।
10. स्वाध्यायः –.......................................................... ।

### 4.3.3 व्यवसायवाचकनामावली–

| **शब्दाः** | **अर्थाः** | **शब्दाः** | **अर्थाः** |
|---|---|---|---|
| राष्ट्रपति | राष्ट्रपति | न्यायाधीशः | न्यायाधीश |
| उपराष्ट्रपतिः | उपराष्ट्रपति | वैज्ञानिकः | वैज्ञानिक |
| प्रधानमन्त्री | प्रधानमन्त्री | अधिवक्ता | वकील |
| राज्यपालः | राज्यपाल | अभियन्ता | इन्जीनियर |
| मुख्यमन्त्री | मुख्यमन्त्री | चिकित्सकः | चिकित्सक |
| मन्त्री | मन्त्री | वैद्यः | वैद्य |
| कुलाधिपतिः | कुलाधिपति / चांसलर | आरक्षकः | सिपाही |
| कुलपतिः | कुलपति / वाईस चांसलर | लेखकः | लेखक |
| कुलसचिवः | कुलसचिव / रजिस्ट्रार | चित्रकारः | चित्रकार |
| आचार्यः | आचार्य / प्रोफेसर | निर्देशकः | निदेशक |
| सहाचार्यः | एसोसिएट प्रोफेसर | प्रबन्धकः | प्रबन्धक |
| सहायकाचार्यः | असि.प्रोफेसर | सुवर्णकारः | सुनार |
| अध्यापकः | अध्यापक | कृषकः | किसान |
| शिक्षकः | शिक्षक | पाचकः | रसोइया |

| | | | |
|---|---|---|---|
| अर्चकः | पूजाकरनेवाला पुजारी | चालकः | ड्राइवर |
| कार्यालयप्रमुखः | कार्यालय प्रमुख | परिचालकः | कन्डक्टर |
| भारवाहः | भार ढोने वाला | आपणिकः | दुकानदार |
| गोपालकः | ग्वाला | विक्रेता | विक्रेता |
| नर्तकः | नृत्य करने वाला | व्यापारी | व्यापारी |
| सैनिकः | सैनिक | सौचिकः | दर्जी |
| कर्मकरः | कर्मचारी | तन्तुवायः | जुलाहा |
| लिपिकारः | लिपिक | ऐन्द्रजालिकः | जादूगर |
| नटः | अभिनेता | अहितुण्डिकः | सपेरा |
| रजकः | धोबी | धीवरः | मछुआरा |
| तक्षकः | बढई | नापितः | नाई |
| चर्मकारः | मोची | व्याधः | बहेलिया/शिकारी |
| सेवकः | सेवक | यामिकः | पहरेदार |
| पत्रवाहकः | डाकिया | अधमर्णः | कर्जदार |
| प्रतिभूः | जमानतदार | उत्तमर्णः | साहूकार |
| नाविकः | मल्लाह | वादी | मुद्दई |
| कितवः | धूर्तः | लुण्ठकः | ठग |

**एते वाक्यप्रयोगाः पठनीयाः –**

1. राष्ट्रपतिः – देशस्य प्रथमनागरिकः राष्ट्रपतिः भवति।
2. प्रधानमन्त्री – प्रधानमन्त्री राष्ट्रस्य प्रमुखः नेता भवति।
3. कुलपतिः– विश्वविद्यालयस्य प्रमुखः अधिकारी कुलपतिः भवति।
4. अहितुण्डिकः – अहितुण्डिकः सर्पान् निगृह्णाति।
5. ऐन्द्रजालिकः – ऐन्द्रजालिकः काल्पनिकचित्राणां माध्यमेन मनोरंजनं करोति।
6. वैज्ञानिकः – वैज्ञानिकाः अनुसन्धानं कृत्वा आविष्कारान् कुर्वन्ति।

**अभ्यासप्रश्नाः 07 उपर्युक्तं शब्दसंग्रहं विलोक्य, कः किं करोति इति विचिन्त्य लिखन्तु–**

**यथा–**राज्यपालः – राज्यस्य शासनं पश्यति।

1. न्यायाधीशः.................................................................. ददाति।
2. चिकित्सकः...................................................................करोति।
3. आरक्षकः...............................................................करोति।
4. प्रबन्धकः..............................................................कल्पयति।

5. पाचकः..................................................................पचति।
6. सौचिकः..................................................................सीव्यति।
7. धीवरः..................................................................निगृह्णाति।
8. नापितः..................................................................कर्तयति।
9. तक्षकः..................................................................निर्माति।
10. रजकः..................................................................प्रक्षालयति।

### 4.3.4 भोजनपात्रनामावली–

| शब्दाः | अर्थाः | शब्दाः | अर्थाः |
|---|---|---|---|
| चषकः | गिलास | कुम्भः | घड़ा |
| कंसः | कटोरी | हसन्ती | अंगिठी |
| चमसः | चम्मच | उद्ध्मानम् | स्टोव |
| करकः | लोटा | अग्निकोषः | गैस सिलेन्डर |
| स्थालिका | थाली | चुल्लिका | चूल्हा |
| काचचषकः | काच का गिलास | उदंचनम् | बाल्टी |
| स्वेदनी | कढाही | द्रोणी | टब |
| ऋजीषम् | तवा | धिषणा | तसला |
| दर्वी | कलछुल | वेल्लनी | वेलन |
| समदर्वी | पलटा | हस्तधावनी | चिलमची |
| सरावः | ढक्कन | उलूखलम् | ऊखल |
| सन्दंशः | चिमटा | काचघटी | जार |
| स्थाली | बटलोही | पात्रम् | बर्तन |
| छुरिका | छुरी | रन्ध्रदर्वी | कड़छी |
| पेषणयन्त्रम् | ग्राइंडर | बाष्पस्थाली | कुकर |
| भ्राष्ट्रम् | कडाही | शूर्पः | सूप |
| मन्थानः | मथनी | शीतकम् | फ्रीज |

**एते वाक्यप्रयोगाः पठनीयाः –**

1. चषकः – चषकेन चायं पीयते।
2. दर्वी – दर्व्या सूपः परिवेष्यते।
3. स्थालिका – स्थालिकायां भोजनं क्रियते।
4. ऋजीषम् – ऋजीषे रोटिकां निर्माणं भवति।

5. चमषः – चमषेन माता शिशुं दुग्धं पाययति।

**अभ्यासप्रश्नाः 08 कस्य पात्रस्य उपयोगः किमर्थं भवति इति लिखन्तु–**

**यथा**–कुम्भः – कुम्भस्य उपयोगः जलपूरणे भवति।

1. कंसः – कंसस्य उपयोगः................................................ ।
2. वेल्लनी – वेल्लन्याः उपयोगः............................................... ।
3. स्थालिका – स्थालिकायाः उपयोगः....................................... ।
4. उदंचनम्– उदंचनस्य उपयोगः.................................................. ।
5. सन्दंशः – सन्दंशस्य उपयोगः.............................................. ।
6. पात्रम् – पात्राणाम् उपयोगः................................................ ।
7. करकः – करकस्य उपयोगः..................................................... ।

### 4.3.5 खाद्यपदार्थनामावली–

| **शब्दाः** | **अर्थाः** | **शब्दाः** | **अर्थाः** |
|---|---|---|---|
| अन्नम् | अन्न | रोटिका | रोटी |
| तण्डुलः | चावल भूसी सहित | ओदनम् | भात |
| व्रीहिः | चावल | सूपः | दाल |
| गोधूमः | गेहूँ | शस्कुली | खस्ता |
| चणकः | चना | पिष्टिका | कचौड़ी |
| यवः | जौ | पूपिका | पराठा |
| तिलम् | तिल | लप्सिका | हलुआ |
| माषः | उड़द | पायसम् | खीर |
| मुद्गः | मूंग | सूत्रिका | सेवई |
| मसूरः | मसूर | पक्वान्नम् | पकवान |
| सर्षपः | सरसों | राज्यक्तम् | रायता |
| आढकी | अरहर | क्षीरम् | दूध |
| द्विदलम् | दाल | आज्यम् | घी |
| कलायः | मटर | नवनीतम् | मक्खन |
| चूर्णम् | आटा | तक्रम् | मठ्ठा |
| चणकचूर्णम् | बेसन | कृशरान्नम् | खिचड़ी |
| मिश्रचूर्णम् | मिस्सा आटा | शर्करा | चीनी |
| रसवती | रसोई | सन्धितम् | अचार |

| | | | |
|---|---|---|---|
| वनमुद्गः | लोबिया | अवलेहः | चटनी |
| गजकः | गजक | किलाटः | खोवा |
| संतानिका | मलाई | मिष्टान्नम् | मिठाई |
| कूर्चिका | रबड़ी | मोदकः | लड्डू |
| पर्पटी | पापड़ | पूपः | पुआ |
| कलाकन्दः | कलाकन्द | अपूपः | मालपुआ |
| घृतपूरः | घेवर | कुण्डली | जलेबी |
| मधुशीर्ष | खाजा | अमृती | इमरती |
| मिष्टपाकः | मुरब्बा | हैमी | बर्फी |
| वाताशः | बताशा | पिण्डः | पेड़ा |
| चायम् | चाय | कौष्माण्डम् | पेठे की मिठाई |
| कपघ्नी | काफी | दुग्धपूपिका | गुलाब जामुन |
| भृष्टापूपः | टोस्ट | रसगोलः | रसगुल्ला |
| पिष्टान्नम् | पेस्ट्री | मधुमण्ठः | बालूसाई |
| पिस्टकः | बिस्कुट | संय्यावः | गुझिया |
| गुल्यः | टाफी | अवदंश | चाट |
| समोषः | समोसा | सूत्रकः | नमकीन सेव |
| पक्ववटिका | पकौड़ी | दधिवटकः | दही बडा |
| पुलकः | पुलाव | लवणान्नम् | नमकीन |
| पक्वालुः | आलू की टिक्की | दालमुद्गः | दालमोठ |
| कूलपी | कुल्फी | पयोहिमम् | आईसक्रीम |

**एतानि वाक्यानि पठनीयानि–**

1. गोधूमः – गोधूमचूर्णेन रोटिका निर्मीयते।
2. तिलम् – तिलस्य तैलं पूजायाम् प्रयुज्यते।
3. ओदनम् – दक्षिणभारते दध्योदनम् अतीव प्रसिद्धम्।
4. पायसम् – पायसम् सर्वेभ्यः रोचते।
5. आज्यम् – गोः आज्यं रोगहरं भवति।

**अभ्यासप्रश्नाः 09 कः पदार्थः केन पदार्थेन सिद्धयति इति विचिन्त्य लिखन्तु–**

**यथा–**चणकचूर्णेन मोदकः सिद्धयति।

1. द्विदलेन ..................................................................सिध्यति।
2. व्रीहिना.......................................................................सिध्यति।

3. दुग्धेन...........................................................................सिध्यति।
4. क्षीरेण...........................................................................सिध्यति।
5. चणकचूर्णेन...........................................................................सिध्यति।
6. शर्करया...........................................................................सिध्यति।
7. दधिना...........................................................................सिध्यति।
8. सर्षपैः...........................................................................सिध्यति।
9. मिश्रितान्नेन...........................................................................सिध्यति।
10. किलाटेन...........................................................................सिध्यति।

**4.3.6 विविधसंस्थानां नामावली–**

| **शब्दाः** | **अर्थाः** | **शब्दाः** | **अर्थाः** |
|---|---|---|---|
| राष्ट्रपतिभवनम् | राष्ट्रपति भवन | कार्यालयः | कार्यालय |
| सर्वोच्चन्यायालयः | सुप्रीम कोर्ट | भोजनालयः | भोजन कक्ष |
| संसदभवनम् | संसद भवन | चिकित्सालयः | चिकित्सालय |
| विश्वविद्यालयः | विश्वविद्यालय | औषधालयः | दवाई घर |
| महाविद्यालयः | महाविद्यालय | पत्रालयः | डाकघर |
| विद्यालयः | विद्यालय | न्यायालयः | न्यायालय |
| पुस्तकालयः/ग्रन्थालयः | पुस्तकालय | सचिवालयः | सचिवालय |
| वाचनालयः | वाचनालय | मन्त्रालयः | मन्त्रालय |
| संग्रहालयः | संग्रहालय | यन्त्रागारम् | कारखाना |
| रेलवेस्थानकम् | रेलवे स्टेशन | दूरदर्शनम् | दूरदर्शन |
| बसस्थानकम् | बस अड्डा | आकाशवाणी | आकाशवाणी |
| विमानपत्तनम् | हवाई अड्डा | सभागारम् | सभागार |
| आरक्षि–स्थानकम् | पुलिस स्टेशन | सदृश्यपरिचर्चाकक्षः | वीडियो क्रान्फेन्स |
| अग्निशमनकेन्द्रम् | फायर स्टेशन | गौशाला | गौशाला |
| वित्तकोषः | बैंक | जन्तुशाला | चिड़ियाघर |

**एते वाक्यप्रयोगाः पठनीयाः –**

1. विश्वविद्यालयः – छात्राः उच्चशिक्षार्थं विश्वविद्यालयं गच्छन्ति।
2. सर्वोच्चन्यायालयः – जनाः अन्तिमन्यायार्थं सर्वोच्चन्यायालयं गच्छन्ति।
3. औषधालयः – रुग्णाः औषधं क्रेतुम् औषधालयं गच्छन्ति।
4. वाचनालयः – विद्यार्थिनः समाचारं पठितुं वाचनालयं गच्छन्ति।
5. गौशाला – जनाः दुग्धार्थं गौशालां गच्छन्ति।

**अभ्यासप्रश्नाः 10 कुत्र किं क्रियते, इति विचिन्त्य लिखन्तु–**

**यथा–**वित्तकोषः – वित्तकोषे धनसंचयः क्रियते।

1. पत्रालयः – पत्रालये.........................................................क्रियते।
2. संसदभवनम् – संसदभवने .........................................................क्रियते।
3. भोजनालयः – भोजनालये.........................................................क्रियते।
4. यन्त्रालयः – यन्त्रालये.........................................................क्रियते।
5. सचिवालयः – सचिवालये.........................................................क्रियते।
6. विमानपत्तनम् – विमानपत्तने.........................................................क्रियते।
7. आरक्षिस्थानम् – आरक्षिस्थाने .........................................................क्रियते।
8. संग्रहालयः – संग्रहालये.........................................................क्रियते।
9. जन्तुशाला – जन्तुशालायां.........................................................क्रियते।
10. सदृश्यपरिचिर्चाकक्षः – सदृश्यचर्चाकक्षे.........................................................क्रियते।

## 4.4 सारांशः –

भाषायां विचारविनिमयः भवति इति भवन्तः ज्ञातवन्तः एव। भाषा व्यवहाराय सम्भाषणाय च शब्दानाम् आवश्कता भवति इत्यपि भवन्तः जानन्ति एव। शब्दाः विभिन्नार्थप्रतिपादकाः, विविधविषयकाः च भवन्ति। क्वचिद् एतेषाम् अनेकार्थाः अपि भवन्ति। अतः कस्य शब्दस्य कः अर्थः, सः च शब्दः कस्मिन् सन्दर्भे प्रयोक्तव्यः इति तु अवश्यं ज्ञातव्यम्। अस्याम् अन्वितौ विभिन्नानां शब्दवर्गाणां विषयाणां च नामावली प्रदत्ता। यद्यपि सामान्यरूपेण जनाः एतेषां शब्दानां प्रयोगे असामर्थ्यं प्रकटयन्ति किन्तु भवन्तः एतान् शब्दान् पठित्वा स्मृत्वा च स्वकीये संस्कृतसम्भाषणे ज्ञाने वा एतेषां प्रयोगं कर्तुं शक्नुवन्ति। एतेषां विभिन्नशब्दानां प्रयोगेण भवन्तः सरलतया सहजतया च संस्कृतसम्भाषणं कर्तुं शक्ष्यन्ति।

## 4.5 अभ्यासप्रश्नानाम् उत्तराणि–

**अभ्यासप्रश्नाः 01 उत्तराणि–**

1. परश्वः। 2. द्वादश। 3. कार्तिकः। 4. सूर्यः। 5. षट्।

**अभ्यासप्रश्नाः 02 उत्तराणि–**

1. समयः। 2. वस्तूनि। 3. स्वच्छता। 4. तालः। 5. दन्ताः।
6. आतपः। 7. शाकम्। 8. विद्युत्प्रवाहः। 9. वस्त्राणि। 10. प्रतिबिम्बः।

**अभ्यासप्रश्नाः 03 उत्तराणि–**

1. पितामहः, पितृव्यः, पितृव्यपुत्रः, भ्रातृजः, भ्राता च।
2. मातामहः, मातामही, मातुलः, मातृष्वसा, मातुलानी च।
3. श्वसुरः, श्वश्रूः, श्यालः च।

**अभ्यासप्रश्नाः 04 उत्तराणि–**

1. दानम्। 2. संचरणम्। 3. चर्वणम्। 4. श्वसनम्।
5. श्वसनम्। 6. चिन्तनम्। 7. श्रवणम्।

**अभ्यासप्रश्नाः 05 उत्तराणि—**

**1.** ललाटाभरणम्। 2.कण्ठहारः। 3. कंकणम्। 4. पादाभरणम्।

5. आच्छादकम्। 6.शिरस्त्राणम्। 7. ओष्ठरागः। 8.मुखरागः।

9. पादकोषः। 10. कटिबन्धः।

**अभ्यासप्रश्नाः 06 उत्तराणि—**

1. विद्यालयः। 2. पुस्तकम्। 3. कागदम्। 4. परीक्षा। 5. विद्यालयः।6. श्यामपट्टः। 7. अंकनी। 8. उत्पीठिका। 9. पाठ्यक्रमः। 10. छात्रः।

**अभ्यासप्रश्नाः 07 उत्तराणि—**

1. न्यायम् । 2. उपचारम्। 3.रक्षणम्। 4.व्यवस्थाम्।

5. भोजनम्। 6. वस्त्रम्। 7. मीनान्। 8.केशान्।

9. काष्ठद्वाराणि।10. वस्त्राणि।

**अभ्यासप्रश्नाः 08 उत्तराणि—**

1. शाकस्थापनाय। 2. रोटिकानिर्माणाय। 3. भोजनकरणाय। 4.जलभण्डाराय।

**5.** रोटिकाग्रहणाय। **6.** कार्यनिष्पादनाय। **7.** जलार्पणाय।

**अभ्यासप्रश्नाः 09 उत्तराणि—**

1. सूपः। 2. ओदनम्। 3. सन्तानिका। 4. किलाटः

5. पक्ववटिका। **6.** मिष्टान्नम्। **7.** राज्यक्तम्। **8.**तैलम्।

9. कृशरान्नम्। 10. रसगोलः।

**अभ्यासप्रश्नाः 10 उत्तराणि—**

1. पत्राणाम् आदान—प्रदानम्। 2. नीतिनिर्धारणम्। 3. भोजननिर्माणम्।

**4.** यन्त्रनिर्माणम्। 5. नीतिसम्पादनम्। **6.** विमानेन आवागमनम्।

**7.** विवादनिस्तारणम्। **8.** अमूल्यवस्तूनां संग्रहणम्।

9. मनोरंजनम्। **10.** सचित्रवार्ताप्रसारणम्।

## 4.6 सन्दर्भग्रन्थसूची

**1.** अनुवाद चन्द्रिका — डॉ. ब्रह्मानन्द त्रिपाठी— चौखम्बा सुरभारती प्रकाशन, वाराणसी।

**2.** प्रौढरचना अनुवाद कौमुदी— डॉ. कपिलदेव द्विवेदी—विश्वविद्यालयप्रकाशन, वाराणसी।

**3.** हिन्दी संस्कृतशब्दकोषः— डॉ. श्रीप्रकाश पाण्डेयः— संस्कृतभारती, नवदेहली।

## 4.7 सहायकोपयोगि—पाठ्यसामग्री—

5 संस्कृतव्यवहारसाहस्री – संस्कृतभारती, नवदेहली।

6 सम्भाषणम्– सम्पादकः–वेम्पटिकुटुम्ब शास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

# द्वितीयखण्डः

# इकाई – 1. विभक्ति–पुरुष–लिंग–वचनपरिचयः (सप्रयोगः)

1.1 प्रस्तावना
1.2 उद्देश्यम
1.3. विभक्तिपरिचयः
1.3.1 विभक्ति एवं चिह्न बोध
1.3.2 उपपदविभक्तिः
1.4 पुरुष बोधः
1.5लिंग बोध
1.6 वचन बोधः
1.7 सर्वनाम माध्यमेन पुरुष–वचन ज्ञानम्
1.8 प्रथमा विभक्तिः
1.8.1 पुल्लिंगशब्दाः
1.8.2 स्त्रीलिंगशब्दाः
1.8.3 नपुंसकलिंगशब्दाः
1.8.4 त्वम्/युवाम्/यूयम्
1.8.5 अहम्/आवाम्/वयम्
1.9 द्वितीया विभक्ति ,तृतीया विभक्ति
1.10 चतुर्थी –पंचमी–षष्ठी–सप्तमी विभक्ति

## 1.1 प्रस्तावना–

**वस्तुतः** कस्यापि भाषाया व्यवहारिकज्ञानाय बहु अधिकं व्याकरणं न आवश्यकं, तत्र श्रवणमात्रेण भाषा व्यवहारे आगच्छति, किन्तु भाषायाः कौशलवर्धनाय व्याकरणस्य काश्चन प्रमुखा अंषा अवश्यमेव ज्ञातव्याः। येषां माध्यमेन वयं संस्कृतं सहजरूपेण वक्तुं शक्नुमः, पठितुं शक्नुमः, ज्ञातुं च शक्नुमः। अपि च भाषाया अनुवादकरणे, संवादसमये, वाक्यानां सामंजस्ये च विभक्ति–उपपदविभक्ति–लिंग–वचन–पुरुषादिनां महत्त्वपूर्णं स्थानं भवति। अस्मिन् खण्डे वयं विभक्त्यादिनां ज्ञानं प्रयोग–अभ्यासादिनां माध्यमेन प्राप्स्यामः।

## 1.2 उद्देश्यम

विभक्तिज्ञानात् परं भवन्तः विभक्ति–वचन–लिंग–पुरुषादिनां विषये सप्रयोगं ज्ञास्यन्ति–

1. विभक्तौ कानि कानि चिह्नानि भवन्ति तेषां कथं प्रयोगः भवति।
2. वचनज्ञानेन ज्ञायते यत् कः शब्दः एकवचनस्य, द्विवचनस्य, बहुवचनस्य वा अस्ति।
3. लिंगज्ञानेन भवन्तः संस्कृते कः शब्दः पुल्लिंग, स्त्रीलिंग, नपुंसकलिगशब्द अस्ति।
4. पुरुषज्ञानेन ज्ञानं भवति यत् कः शब्दः प्रथम–मध्यम–उत्तमपुरुषस्य शब्दाः सन्ति।
5. विभक्ति–वचन–लिंग–पुरुषादिनां व्यवहारे कथं प्रयोगः भवति।
6. भवन्तः संस्कृतस्य सामान्यव्यवहारिकज्ञानेन सह व्याकरणांशानपि ज्ञास्यन्ति।
7. कथं सामान्यरूपेण अपि संस्कृतं पठितुं शक्नुवन्ति।
8. एतेषां ज्ञानेन भवताम् अनुवादं सामर्थ्य वर्धयिष्यते।

## 1.3 विभक्तिपरिचयः

संस्कृते वाक्यनिर्माणाय विभक्तेः महत्त्वपूर्णा भूमिका भवति। विभक्तिज्ञानादेव वयं वाक्ये परिवर्तनं ज्ञातुं षक्नुमः। यथा– रामः, रामम्, रामेण, रामाय इत्यादयः। विभक्तिः, कारकं, कर्ता, कर्म, क्रिया चेत्यादिनां ज्ञानाय अधोलिखितानि वाक्यानि अवगच्छामः।

रमेशः पुस्तकं पठति– रमेश पुस्तक पढता है। इस वाक्य में पढने वाला रमेश है।

रामः वनम् अगच्छत्– राम वन को गया। इस वाक्य में वन को जाने वाला राम है।

उक्त दोनों वाक्यों में पढने वाला रमेश है और वन को जाने वाला राम है। क्रिया को करने वाले को कर्ता कहते हैं। अतः दोनों वाक्यों में रमेश और राम कर्ता हैं।

प्रथम वाक्य में पढने का विषय पुस्तक है तथा दूसरे वाक्य जाने का विषय वन है। पुस्तक और वन जाने के लिए ही कर्ताओं ने क्रियायें कीं, अतः मुख्यतः जो अभीष्ट होता है कर्ता उसी के लिए क्रिया को करता है, उसको कर्म कहते हैं। नृपः हस्ताभ्यां भिक्षुकेभ्यः धनं ददाति– राजा भिखारियों को धन देता है। इस वाक्य में राजा ने हाथ से दान दिया अतः

हाथ से करण कारण हुआ तथा दान देने की क्रिया ब्राह्मणों के लिए हुयी, अतः सम्प्रदान कारक हुआ। उपर्युक्त वाक्यों में पढ़ना, वन जाना, देना आदि क्रियाओं के सम्पादन में जिन कर्ता, कर्म आदि शब्दों का प्रयोग हुआ है उन्हें कारक कहते हैं। कारक वह वस्तु है जिसका प्रयोग क्रिया की पूर्ति के लिए किया जाता है। कारकों को जोड़ने के लिए कारक चिह्न का प्रयोग किया जाता है। कारकों के चिह्न को विभक्तियां कहते हैं तथा कारक का सम्बन्ध क्रिया से होता है। कारकों को आप तृतीय खण्ड में विस्तृत रूप से पढेगे। यहाँ पर केवल विभक्तियों का सामान्य बोध कराया जा रहा है।

## 1.3.1 विभक्ति एवं चिह्न बोध

| **विभक्ति** | **चिह्न** |
|---|---|
| प्रथमा | ने |
| द्वितीया | को |
| तृतीया | से, के द्वारा |
| चतुर्थी | सम्प्रदान (के लिए) |
| पंचमी | अपादान (अलग होने के अर्थ) |
| षष्ठी | का, के, की |
| सप्तमी | में, पे, पर |
| सम्बोधन | हे, अरे, रे, भो |

## 1.3.2 उपपदविभक्तिः—

इन प्रथमा आदि विभक्तियों से कारकों का ही निर्देश नहीं होता है अपितु इसके अतिरिक्त भी किसी विशेष शब्द के अर्थ के संयोग के कारण किसी विभक्ति का प्रयोग होता है तब उस विभक्ति को उपपद विभक्ति कहते हैं। जैसे **'बालकेन सह माता गच्छति'**—बालक के साथ माता जाती है। यहाँ पर **'सह'** का योग होने से तृतीया विभक्ति हो गयी। इसी प्रकार **'भवनम् उभयतः वृक्षाः सन्ति'**—मकान के दोनों ओर पेड़ हैं, इस वाक्य में 'मकान के' इस 'के' से यहाँ पर षष्ठी विभक्ति होनी चाहिए थी किन्तु 'उभयतः' का संयोग होने से 'भवनम्' में द्वितीया हो गयी।

संस्कृत व्याकरण में सुबन्त और तिङन्त के रूपों का प्रतिपादन किया गया है, जिन्हें शब्दरूप और धातुरूप भी कहते हैं। यहाँ हम प्रथमतया शब्द रूपों का प्रतिपादन कर रहे हैं। सुबन्त शब्दों के साथ सात विभक्तियों व तीन वचन के साथ 21 प्रत्यय सिद्ध होते हैं। जिनके माध्यम से हम संस्कृत व्यवहार में उपयोगी शब्दों जैसे ने, को, से, के द्वारा, के लिए, का, के की आदि को समझ पायेंगे। निम्नवत् तालिका के माध्यम से हम सुबन्त (शब्दरूप) को समझ सकते हैं—

| विभक्तियां | कारक | विभक्ति चिह्न | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|---|---|
| प्रथमा | कर्ता | ने | स् (सु) | औ | अस् (जस्) |
| द्वितीया | कर्म | को | अम् | औ (औट्) | अस् (शस्) |
| तृतीया | करण | से, के द्वारा | आ (टा) | भ्याम् | भिस् |
| चतुर्थी | सम्प्रदान | के लिए | ए (ङे) | भ्याम् | भ्यस् |
| पंचमी | अपादान | से अलग होने के अर्थ में | अस् (ङसि) | भ्याम् | भ्यस् |
| षष्ठी | सम्बन्ध | का, के, की | अस् (ङस्) | ओस् | आम् |
| सप्तमी | अधिकरण | में, पे, पर | इ (ङि) | ओस् | सु (सुप्) |
| सम्बोधन | | हे, अरे, रे, भो | | | |

## 1.4 पुरुष बोधः

संस्कृत में तीन पुरुष होते हैं– प्रथम पुरुष, मध्यम पुरुष और उत्तम पुरुष। पुरुष प्रकरण को हम इस प्रकार समझेंगे– वार्तालाप करने में एक व्यक्ति वह होता है जो वार्तालाप करता है, दूसरा व्यक्ति वह होता है जिससे वार्तालाप की जाती है और तीसरा व्यक्ति वह होता है जिसके विषय में वार्तालाप की जाती है। यहाँ पर हमें यह समझना है कि जो वार्तालाप करता है वह उत्तम पुरुष, जिससे वार्तालाप की जाती है वह मध्यम पुरुष और जिसके विषय में वार्तालाप की जाती है वह प्रथम पुरुष या अन्य पुरुष कहलाता है। पुरुष आदि के माध्यम से हम वह, वे दो, वे सब, तू, तुम दो, तुम सब, मैं, हम दो, हम सब जैसे रूपों को तथा क्रिया पठति, पठतः, पठन्ति, पठसि, पठथः, पठथ, पठामि, पठावः, पठामः आदि के संयोग को समझेंगे।

**प्रथमपुरुष–अभ्यासः–**सः पठति। सा नृत्यति। तौ वदतः। ते कथयतः। ताः हसन्ति। तानि विकसन्ति।

**मध्यमपुरुष–अभ्यासः–**त्वं पठसि। युवां धावतः। यूयं पठन्तु।

**उत्तमपुरुष–अभ्यासः–**अहं लिखामि। आवाम् पठिष्यावः। वयं चिन्तयामः।

## 1.5 लिंग बोध

पुरुष जाति, स्त्री जाति और नपुंसक जाति के बोध के लिए लिंग ज्ञान आवश्यक है। रामः इस शब्द से पुरुष जाति का बोध हो रहा है अतः यह पुल्लिंग शब्द है। 'सीता' इस शब्द से स्त्री जाति का बोध हो रहा है अतः यह स्त्रीलिंग वाचक शब्द है। इसी प्रकार

'पुस्तकम्' इस शब्द से न तो पुरुष वाचक तथा न ही स्त्री वाचक जाति का बोध हो रहा है। अतः पुस्तकम् शब्द नपुंसकलिंग वाचक है। संस्कृत में लिंग ज्ञान पाणिनि के लिंगानुशासन ग्रन्थ से अथवा साहित्य के निरन्तर पारायण से ही होगा।

संस्कृत में एक ही शब्द या वस्तु के वाचक शब्द भिन्न–भिन्न लिंगों के हैं। जैसे

तट शब्द तीनों लिंगों में है– तटः (पुल्लिंग) तटी, (स्त्रीलिंग) तटम् (नपुंसकलिंग) किन्तु तीनों का अर्थ किनारा ही है।

पत्नी के लिए तीनों लिंगों में शब्द हैं– परिग्रहः (पुल्लिंग) भार्या, (स्त्रीलिंग) कलत्रम् (नपुंसकलिंग) किन्तु तीनों का अर्थ पत्नी ही है।

युद्ध के लिए तीनों लिंगों में शब्द है– संगरः (पुल्लिंग) आजिः (स्त्रीलिंग) युद्धम् (नपुंसकलिंग) किन्तु तीनों का अर्थ युद्ध ही है।

कभी–कभी एक ही शब्द का कुछ थोडे से अर्थ भेद के कारण भिन्न भिन्न लिंगों में प्रयोग होता है। जैसे–

सरस्वत् (पुल्लिंग) जिसका अर्थ है– समुद्र।

सरस्वती (स्त्रीलिंग) जिसका अर्थ है– नदी।

सरस् (नपुंसकलिंग) जिसका अर्थ होता है– तालाब या छोटी झील।

संस्कृत में शब्द ज्ञान से ही लिंग ज्ञान सम्भव है वस्तु ज्ञान से लिंग ज्ञान नहीं किया जा सकता है।

**लिंगपरिचय–अभ्यासः–**

**पुल्लिंगशब्दाः–** सः बालकः। सः वृक्षः। सः पाषाणखण्डः। सः मार्गः। सः शिक्षकः। सः देशः।

**स्त्रीलिंगशब्दाः–** सा बालिका। सा महिला। सा नदी। सा लेखनी। सा द्रोणी। सा राजधानी।

**नपुंसकलिंगशब्दाः–**तत् पत्रम्। तत् फलम्। तत् द्वारम्। तत् चित्रम्। तत् नेत्रम्। तत् जलम्।

## 1.6 वचन बोधः–

संस्कृत में एक, दो, तीन अथवा उससे अधिक की संख्या का बोध वचन ज्ञान से ही होगा। संस्कृत में वचन तीन प्रकार के होते हैं– एकवचन, द्विवचन, बहुवचन।

**एकवचनम्–** एकवचन के माध्यम से एक का बोध होता है। यथा रामः – एक राम।

**एकवचनाभ्यासः–**

रामः पठति। सीता लिखति। दिलीपः अस्ति। यानं चलति। शिशुः पिबति। मोहनः खादति।

**द्विवचनम्–** द्विवचन के माध्यम से दो का बोध होता है। यथा– रामौ – दो राम।

**द्विवचनाभ्यासः–** बालकौ क्रीडतः। रामलक्ष्मणौ चलतः। महिले वदतः। भगिन्यौ आगच्छतः। मन्दिरे स्तः।

**बहुवचनम्–** बहुवचन के माध्यम से तीन या उससे अधिक का बोध होता है। यथा– रामाः– बहुत राम आदि।

**बहुवचनाभ्यासः–** छात्राः पठन्ति। बालिकाः हसन्ति। पितरः कथयन्ति। भ्रातरः वदन्ति। वायुयानानि उड्डयन्ति।

## 1.7 सर्वनाम शब्दानां माध्यमेन पुरूष–वचन ज्ञानम्

**सर्वनाम शब्दों के माध्यम से हम पुरुष व वचन को समझेंगे–**

| पुल्लिंग | | | |
|---|---|---|---|
| | एकवचनम् | द्विवचनम् | ब्हुवचनम् |
| प्रथम पुरुष | सः (वह) | तौ (वे दो) | ते (वे सब) |
| मध्यम पुरुष | त्वम् (तू) | युवाम् (तुम दो) | यूयम् |
| उत्तम पुरुष | अहं (मैं) | आवाम् (हम दो) | वयम् (हम सब) |
| **स्त्रीलिंग** | | | |
| | एकवचनम् | द्विवचनम् | ब्हुवचनम् |
| प्रथम पुरुष | सा (वह) | ते (वे दो) | ताः (वे सब) |
| मध्यम पुरुष | त्वम् (तू) | युवाम् (तुम दो) | यूयम् |
| उत्तम पुरुष | अहं (मैं) | आवाम् (हम दो) | वयम् (हम सब) |
| **नपुंसकलिंग** | | | |
| | एकवचनम् | द्विवचनम् | ब्हुवचनम् |
| प्रथम पुरुष | तत् (वह) | ते (वे दो) | तानि (वे सब) |
| मध्यम पुरुष | त्वम् (तू) | युवाम् (तुम दो) | यूयम् |
| उत्तम पुरुष | अहं (मैं) | आवाम् (हम दो) | वयम् (हम सब) |
| युष्मद् और अस्मद् को छोड़कर सर्वनाम शब्द तीनों लिंगों में विशेष्य के अनुसार ही होते हैं। | | | |

**निम्नलिखित कोष्ठक के अनुसार हम पुल्लिंग, वचन आदि के द्वारा शब्द रूपों का निर्माण कर सकते हैं–**

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| अकारान्तः | पुल्लिंगः | बालकः | बालकौ | बालकाः |
| इकारान्तः | ,, ,, | हरिः | हरी | हरयः |
| उकारान्तः | ,, ,, | गुरुः | गुरू | गुरवः |
| ऋकारान्तः | ,, ,, | पिता | पितरौ | पितरः |
| आकारान्तः | स्त्रीलिंगः | बालिका | बालिके | बालिकाः |
| इकारान्तः | ,, ,, | मतिः | मती | मतयः |
| ईकारान्तः | ,, ,, | नदी | नद्यौ | नद्यः |
| उकारान्तः | ,, ,, | धेनुः | धेनू | धेनवः |
| ऊकारान्तः | ,, ,, | वधूः | वध्वौ | वध्वः |
| ऋकारान्तः | ,, ,, | माता | मातरौ | मातरः |
| अकारान्तः | नपुंसकलिंगः | फलम् | फले | फलानि |
| इकारान्तः | ,, ,, | वारि | वारिणी | वारीणि |
| उकारान्तः | ,, ,, | वस्तु | वस्तुनी | वस्तूनि |

## 1.8.प्रथमा विभक्तिः –

कारकचिह्न– ने।

### 1.8.1 पुल्लिंगशब्दाः





एषः बालकः। सः शिक्षकः।

**पुल्लिंगशब्दानाम् अभ्यासः**

**शिक्षक –छात्रयोः संस्कृतव्यवहारः**

| | | | | |
|---|---|---|---|---|
| शिक्षकः – | एषः रमेशः। एषः कः? | छात्रः | – | एषः रमेशः। |
| शिक्षकः – | एषः उपन्यासः। एषः कः? | छात्रः | – | एषः उपन्यासः। |
| शिक्षकः – | एषः सुधाखण्डः। एषः कः? | छात्रः | – | एषः सुधाखण्डः। |
| शिक्षकः – | सः चन्द्रः। सः कः? | छात्रः | – | सः चन्द्रः। |
| शिक्षकः – | सः मेघः। सः कः? | छात्रः | – | सः मेघः। |
| शिक्षकः – | सः देवालयः। सः कः? | छात्रः | – | सः देवालयः। |

**त्रिषु वचनेषु वाक्यानि जानन्तु–**

| | | |
|---|---|---|
| एषः बालकः अस्ति। | एतौ बालकौ स्तः। | एते बालकाः सन्ति। |
| कः बालकः अस्ति? | कौ बालकौ स्तः? | के बालकाः सन्ति? |
| सः बालकः अस्ति। | तौ बालकौ स्तः। | ते बालकाः सन्ति। |
| एषः वृक्षः अस्ति। | एतौ वृक्षौ स्तः। | एते वृक्षाः सन्ति। |
| कः वृक्षः अस्ति? | कौ वृक्षौ स्तः? | के वृक्षाः सन्ति? |
| सः वृक्षः अस्ति। | तौ वृक्षौ स्तः। | ते वृक्षाः सन्ति। |

**अभ्यासप्रश्नाः 01 उपर्युक्तेशु शब्देषु एषः, सः इति शब्दस्य आधारेण चतुःशब्दान् चित्वा लिखन्तु–**

**यथा– एषः रमेशः। सः चन्द्रः।**

1. एषः................................................ । सः.............................................. ।
2. एषः................................................ । सः.............................................. ।
3. एषः................................................ । सः.............................................. ।
4. एषः................................................ । सः.............................................. ।

**1.8.2 स्त्रीलिंगशब्दाः**



एषा बालिका।



एषा शिक्षिका



सा गायिका।

स्त्रीलिंग शब्दानाम् अभ्यासः–

**शिक्षक–छात्रयोः संस्कृतव्यवहारः**

| | | | | |
|---|---|---|---|---|
| शिक्षकः – | एषा संचिका। एषा का? | छात्रा | – | एषा संचिका। |
| शिक्षकः – | एषा सखी। एषा का? | छात्रा | – | एषा सखी। |
| शिक्षकः – | एषा सरस्वती। एषा का? | छात्रा | – | एषा सरस्वती। |
| शिक्षकः – | सा वृद्धा। सा का? | छात्रा | – | सा वृद्धा। |
| शिक्षकः – | सा नदी। सा का? | छात्रा | – | सा नदी। |
| शिक्षकः – | सा वधूः। सा का? | छात्रा | – | सा बधूः। |

**अभ्यासप्रश्नाः 02 एषा, सा इति शब्दस्य आधारेण चतुर्वाक्यानि लिखन्तु–**

**यथा– एषा बालिका। सा नदी।**

1. एषा................................................ । सा............................................ ।
2. एषा................................................ । सा............................................ ।
3. एषा................................................ । सा............................................ ।
4. एषा................................................ । सा............................................ ।

**1.8.3 नपुंसकलिंगशब्दाः**



एतत् संगणकम्।



तत् विमानयानम्।

**नपुंसकलिंगशब्दानाम् अभ्यासः**

**शिक्षक–छात्रयोः संस्कृतव्यवहारः**

| | | | | |
|---|---|---|---|---|
| शिक्षकः – | एतत् पत्रम्। एतत् किम्? | छात्रः | – | एतत् पत्रम्। |
| शिक्षकः – | एतत् वस्तु। एतत् किम्? | छात्रा | – | एतत् वस्तु। |
| शिक्षकः – | एतत् पर्णम्। एतत् किम्? | छात्रः | – | एतत् पर्णम्। |
| शिक्षकः – | तत् मन्दिम्। तत् किम्? | छात्रः | – | तत् मन्दिरम्। |
| शिक्षकः – | तत् नक्षत्रम्। तत् किम्? | छात्रः | – | तत् नक्षत्रम्। |
| शिक्षकः – | तत् उद्यानम्। तत् किम्? | छात्रा | – | तत् उद्यानम्। |

**अभ्यासप्रश्नाः 03 एतत्, तत् इति शब्दस्य आधारेण चतुर्वाक्यानि लिखन्तु–**

**यथा– एतत् पत्रम्। तत् पुष्पम्।**

1. एतत्............................................... । तत्........................................... ।
2. एतत्............................................... । तत्........................................... ।
3. एतत्............................................... । तत्........................................... ।
4. एतत्............................................... । तत्........................................... ।

### 1.8.4 त्वम्/युवाम्/यूयम्





त्वं सैनिकः। युवां सैनिकौ । यूयं सैनिकाः।

**संस्कृतसंवादः**

1. त्वं देशभक्तः असि? आम, अहं देशभक्तः अस्मि।
2. युवां वैद्यौ स्थः? आम, आवां वैद्यौ स्वः।
3. यूयं अभियन्तारः स्थ? आम, वयं अभियन्तारः स्मः।

### 1.8.5 अहम्/आवाम्/वयम्

अहं शिक्षकः। आवां शिक्षकौ। वयं शिक्षकाः।

**संस्कृतसंवादः**

1. अहं सामाजिककार्यकर्ता अस्मि? भवान् अधिकारी अस्ति? आम अहम् अधिकारी अस्मि।
2. आवां राष्ट्रनायकौ स्वः। भवन्तौ मन्त्रिणौ स्तः? आम आवां मन्त्रिणौ स्वः।
3. वयं कृषकाः स्मः। भवन्तः उद्योगपतिनः सन्ति? आम वयम् उद्योगपतिनः स्मः।

### 1.8.6 भवान्/भवन्तौ/भवन्तः





भवान् आचार्यः। भवन्तौ आचार्यौ। भवन्तः आचार्याः।

**संस्कृतसंवादः**

1. भवान् आचार्यः अस्ति। अहं शिष्यः अस्मि।
2. भवन्तौ अधिकारिणौ स्तः। आवां कर्मचारिणौ स्वः।
3. भवन्तः सज्जनाः सन्ति। वयं देशभक्ताः स्मः।

### 1.8.7 भवती/भवत्यौ/भवत्यः



भवती छात्रा।



भवत्यौ छात्रे।



भवत्यः छात्राः।

**संस्कृतसंवादः**

1. भवती सेविका अस्ति। अहं लेखिका अस्मि।
2. भवत्यौ गायिके स्तः। आवां नृर्तक्यौ स्वः।
3. भवत्यः धेनवः सन्ति। वयं मातरः स्मः।

**एतत् जानन्तु–**

| विभक्ति/पुरुषः | लिंग/शब्दरूपः | एकवचनम् | द्विवचनम् | ब्हुवचनम् |
|---|---|---|---|---|
| प्रथमाविभक्तिः | पुल्लिंग ⇨ | भवान् (आप) | भवन्तौ (आप दो) | भवन्तः (आप सब) |
| उत्तमपुरुषः | सर्वनामशब्दः ⇨ | अहम् (मैं) | आवाम् (हम दो) | वयम् (हम सब) |
| उत्तमपुरुषः | क्रियाशब्दरूपः ⇨ | अस्मि (हूँ) | स्वः (हम दो हैं) | स्मः (हम सब हैं) |
| प्रथमाविभक्तिः | स्त्रीलिंग ⇨ | भवती (आप) | भवत्यौ (आप दो) | भवत्यः (आप सब) |

**सुभाषितम्**

**यत्र योगेश्वरः कृष्णः यत्र पार्थो धनुर्धरः।**

**तत्र श्रीर्विजयोः भूतिः ध्रुवा नीतिर्मतिर्मम।।**

भावार्थः– योगेश्वरः श्रीकृष्णः, धनुर्धारी अर्जुनः च यत्र भवतः, तत्र लक्ष्मीः, विजयः, सम्पत्, अचला नीतिः च निश्चयेन भविष्यन्ति इति मम अभिप्रायः।

**अभ्यासप्रश्नाः 04 रिक्तस्थानानि पूरयन्तु–**

**यथा– अहं षिक्षकः....................... । अहं शिक्षकः अस्मि।**

1. त्वं छात्रः........................ । यूयं मातरः .................... । अहं बालकः...................... ।
2. वयं युवानः....................... । भवान्............................... । भवन्तः.......................सन्ति।
3. भवती.................................अस्ति। भवत्यौ.................स्तः। भवत्यः.......................सन्ति।

## 1.9 द्वितीया विभक्तिः

**कारकचिह्न**–को।

  

| | | | |
|---|---|---|---|
| बालकः अस्ति – | श्लोक | –अस्ति । | बालकः **श्लोकं** पठति। |
| छात्रः – | कविता – | लिखति । | छात्रः **कवितां** लिखति। |
| महिला – | शाटिका – | क्रीणाति। | महिला **शाटिकां** क्रीणाति। |

**एतानि वाक्यानि पठन्तु**

| | |
|---|---|
| 1. शिक्षकः **विद्यालयं** गच्छति। | शिक्षक विद्यालय जाता है। |
| 2. माता **मन्दिरं** गच्छति। | माता मन्दिर जाती है। |
| 3. शिशुः **दुग्धं** पिबति। | बच्चा दूध पीता है। |
| 4. सः **पुस्तकं** पठति। | वह पुस्तक पठति है। |
| 5. पिता **लेखनीम्** आनयति। | पिता पैन लाते हैं। |

**द्वितीयाविभक्तेः अभ्यासं कुर्वन्तु–**

**प्रथमाविभक्तिः –** **द्वितीयाविभक्तिः**

| | | | | |
|---|---|---|---|---|
| **1.** | एकवचनम् – | एकवचनम् | द्विवचनम् | बहुवचनम् |
| **2.** | बालकः (पु.)– | बालकम् | बालकौ | बालकान् |
| **3.** | बालिका (स्त्री.) | बालिकाम् | बालिके | बालिकाः |
| **4.** | लेखनी (स्त्री.) | लेखनीम् | लेखन्यौ | लेखिन्यः |
| **5.** | पुस्तकम् (नपु.) | पुस्तकम् | पुस्तके | पुस्तकानि |
| **6.** | सः (पु.) | तम् | तौ | तान् |
| **7.** | सा (स्त्री.) | ताम् | ते | ताः |
| **8.** | तत् (नपु.) | तत | ते | तानि |

| | | | | |
|---|---|---|---|---|
| **9.** | कः (पु.) | कम् | कौ | के |
| **10.** | का (स्त्री.) | काम् | के | काः |
| **11.** | किम् (नपु.) | किम् | के | कानि |
| **12.** | एषः (पु.) | एतम् | एतौ | एते |
| **13.** | एषा (स्त्री.) | एषा | एते | एषाः |
| **14.** | एतत् (नपु.) | एतत् | एते | एतानि |
| **15.** | अहम् (पु. / स्त्री.) | माम् | आवाम् | अस्मान् |
| **16.** | भवान् (पु.) | भवन्तम् | भवन्तौ | भवतः |
| **17.** | भवती (स्त्री.) | भवतीम् | भवत्यौ | भवतीः |

**ध्यातव्या अंशा– जानने योग्य बिन्दु**

1. **उपविभक्ति** के अन्तर्गत तिष्ठति एवं वसति धातुओं के पूर्व में यदि अधि उपसर्ग हो तो द्वितीया विभक्ति होती है। जैसे–
   **क.** प्रश्नः सिंह कुत्र अधितिष्ठति? अर्थात् शेर कहाँ रहता है?

   ख. उत्तरम्–**सिंहः वनम् अधितिष्ठति**– शेर वन में रहता है। इस वाक्य में 'वन में' इससे सप्तमी विभक्ति का बोध हो रहा है किन्तु अधितिष्ठति उपपद विभक्ति के कारण वने न होकर **'वनम्'** हो गया।

2. अभितः, परितः, उभयतः इन शब्दों के संयोग में द्वितीया विभक्ति का प्रयोग होता है, जैसे–
   **क. ग्रामं परितः मार्गाः सन्ति** –गाँव के चारों के ओर मार्ग हैं।

   **ख. भवनम् उभयतः वृक्षाः सन्ति**–मकान के दोनों ओर वृक्ष हैं।इस वाक्य में ग्राम के, भवन के सम्बन्ध के कारक चिह्न होने पर भी उपपद विभक्ति बलीयसी सिद्धान्त से 'ग्रामं परितः, 'भवनम् उभयतः' हो गया है।

3. जिस वाक्य में बिना का प्रयोग होगा उसमें द्वितीया विभक्ति होती है। जैसे–
   क. **जलं बिना जीवनं नास्ति'**–जल के बिना जीवन नहीं है।

   ख. **हिमालयं बिना समुद्रः नास्ति**–हिमालय के बिना समुद्र नहीं हो सकता है। यहां पर भी 'के' सम्बन्ध चिह्न के होने पर भी द्वितीया विभक्ति हो गयी, क्योंकि बिना के योग में द्वितीय विभक्ति होती है।

**सुभाषितम्**

**वसुदेवसुतं देवं कंसचाणूरमर्दनम्।**
**देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्।।**

भावार्थः– कृष्णः वसुदेवस्य पुत्रः, देवक्याः आनन्दवर्धकः, कंसचाणूरनामकयोः रक्षसयोः संहारकः, सः जगद्गुरुः अपि, तं कृष्णम् अहं नमामि।

**अभ्यासप्रश्नाः 05 रिक्तस्थानानि पूरयन्तु–**

**यथा–** पिता (कार्यालयः) गच्छति । पिता **कार्यालयं** गच्छति।

1. देशभक्तः (गीता) पठति। ...................... ........................ ......................
2. छात्रा (गीतं) गायति। ...................... ........................ ......................
3. सः (गुरुः) प्रणमति।...................... ........................ ......................
4. अहं (मोदकं) खादामि। ...................... ........................ ......................
5. शिक्षकः (सः) आह्वयति। ...................... ........................ ......................

## 1.10 तृतीया विभक्तिः

**कारकचिह्न–**से, के द्वारा।





बालकः चमसेन खादति।




छात्रः द्विचक्रिकया गच्छति



बालिका लेखन्या लिखति



युवकः जलेन सिञ्चति।

**एतानि वाक्यानि पठन्तु**

| | |
|---|---|
| 1. अध्यापकः सुधाखण्डेन लिखति। | अध्यापक सुधाखण्ड से लिखता है। |
| 2. महिला मालया अलंकरोति। | महिला माला से अलंकार करती है। |
| 3. बालिका अंकिन्या लेखं लिखति। | बालिका पैन्सिल से लेख लिखती है। |
| 4. अहं विमानेन देहलीं गच्छामि। | मैं विमान से दिल्ली जाता हूँ। |

**अभ्यासं कुर्वन्तु–**

| प्रथमाविभक्तिरूपाणि | | | | **तृतीयाविभक्तिरूपाणि** | | |
|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | – | एकवचनम् | द्विवचनम् | बहुवचनम |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1. | दण्डः | दण्डौ | दण्डाः | – | दण्डेन | दण्डाभ्याम् | दण्डेभ्यः |
| 2. | माला | माले | मालाः | – | मालया | मालाभ्याम् | मालाभिः |
| 3. | लेखनी | लेखिन्यौ | लेखिन्यः | – | लेखिन्या | लेखनीभ्याम् | लेखनीभिः |
| 4. | वाहनं | वाहने | वाहनानि | – | वाहनेन | वाहनाभ्याम् | वाहनैः |

**ध्यातव्या अंशा– जानने योग्य बिन्दु**

1. सह, साकं, सार्द्धं, अर्थात् साथ। सह शब्द का योग जिसके शब्द के साथ होगा उस शब्द में तृतीया विभक्ति होती है। जैसे–

   **क. रामेण सह सीता वनं अगच्छत्**–राम के साथ सीता वन को गयी।

   **ख. मया साकं पिता आपणं गमिष्यति**–मेरे साथ पिता जी बाजार जायेंगे।

   **ग. पत्न्या सार्द्धं पतिः कार्यालयं गच्छति**–पत्नी के साथ पति कार्यायल जाता है।

**सुभाषितम्**

**श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिः न तु कंकणेन।**
**विभाति कायः करुणापराणां परोपकारेण न चन्दनेन।।**

भावार्थः– कर्णस्य शोभा वेदमन्त्राणां, श्रेष्ठवाक्यानां श्रवणेन अस्ति न तु कुण्डलधारणेन। हस्तस्य शोभा धर्मकर्मादिभ्यः दानकरणेन अस्ति न तु कंकणेन। करुणापराणां श्रेष्ठजनानां शरीरं परोपकारेण शोभते न तु चन्दनेन। अतः सम्यक् श्रवणं, हस्तेन दानं, परोपकाराय जीवनार्पणम् च जीवनस्य उन्नतेः मार्गाः सन्ति।

**अभ्यासप्रश्नाः 06 रिक्तस्थानानि पूरयन्तु–**

**यथा**–छात्रः (हस्तः) लिखति। छात्रः **हस्तेन** लिखति।

1. वृद्धः (दण्डः) चलति। ........................................................................ ।
2. माता (घटः) जलम् आनयति। ........................................................................ ।
3. महिला (छुरिका) शाकं कर्तयति।........................................................................ ।
4. बालकः (लेखनी) श्लोकं लिखति।........................................................................ ।
5. सौचिकः (वस्त्राणि) आकर्षकं परिधानं निर्माति।........................................................ ।

## 1.11 चतुर्थी विभक्तिः

**कारकचिह्न**– के लिए।





धनिकः पूजकाय धनं ददाति।

छात्रा शिक्षिका छात्रा शिक्षिकायै पुस्तकं ददाति।







पत्रवाहकः गृहिणी पत्रवाहकः गृहिण्यै पत्रं ददाति।

**एतानि वाक्यानि पठन्तु**

1. शिक्षकः शिष्याय ज्ञानं ददाति। शिक्षक शिष्य को ज्ञान देता है।
2. माता पुत्राय पायसं ददाति। माता पुत्र को खीर देती है।
3. सज्जनः वृद्धाय सहयोगं ददाति। सज्जन वृद्ध को सहयोग देता है।
4. भ्राता भगिन्यै स्नेहं ददाति। भाई बहिन को स्नेह देता है।
5. प्राचार्यः छात्रेभ्यः पुस्तकानि ददाति। प्राचार्य छात्रों को पुस्तकें देता है।

**अभ्यासं कुर्वन्तु–**

| | प्रथमाविभक्तिरूपाणि | | | | **चतुर्थीविभक्तिरूपाणि** | | |
|---|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | – | एकवचनम् | द्विवचनम् | बहुवचनम् |
| 1. | युवकः | युवकौ | युवकाः | | युवकाय | युवकाभ्याम् | युवकेभ्यः |
| 2. | महिला | महिले | महिलाः | – | महिलायै | महिलाभ्याम् | महिलाभ्यः |
| 3. | पुत्री | पुत्र्यौ | पुत्र्यः | – | पुत्र्यै | पुत्रीभ्याम् | पुत्रीभ्यः |
| 4. | मित्रम् | मित्रे | मित्राणि | – | मित्राय | मित्राभ्याम् | मित्रेभ्य |

**ध्यातव्या अंशा– जानने योग्य बिन्दु**

**अवधेयम्–** उपर्युक्त वाक्य में **'किम्'** और **'वा'** शब्द प्रश्नवाचक शब्द के रूप में प्रयुक्त हुये हैं तथा **'आम्'** का अर्थ है 'हाँ' और **'न'** का अर्थ है 'नहीं'।

**अभ्यासप्रश्नाः 02** अत्र सामान्यसंस्कृतव्यवहारेण सम्बद्धाः प्रश्नाः प्रदत्ताः, तेषाम् उत्तराणि लिखन्तु–

1. प्रश्नः –शिक्षकः पाठयति किम्? – उत्तरम्

2. प्रश्नः —मूकः भाषण करोति वा? — उत्तरम्
3. प्रश्नः —दुर्जनः सत्यं वदति वा ? — उत्तरम्
4. प्रश्नः —अश्वः तीव्रं धावति किम् ? — उत्तरम्
5. प्रश्नः— अन्धः द्रष्टुं शक्नोति वा? — उत्तरम्

**4.3.3 भवान्/भवती प्रयोगः**

1. भवान् आगच्छतु। — आप आईये।
2. भगिनी भवती अपि आगच्छतु। — बहिन आप भी आईये।
3. कृपया भवान् उपविशतु। — कृपया आप बैठिये।
4. भगिनि कृपया भवती उपविशतु। — बहिन कृपया आप बैठिये।
5. भवान् जलं स्वीकरोतु पिबतु च । — आप जल ग्रहण करें और पीवें।
6. भवान् काफीं पिबति किम्? — आप काफी पीयेंगे क्या?
7. आम्, अहं कफघ्नीं (काफीं) पास्यामि। — हाँ मैं काफी पीऊँगा।
8. भवान् भोजनं करोति वा? — आप भोजन करेंगे क्या?
9. न, अहं भोजनं न करिष्यामि। — नहीं, मैं भोजन नहीं करुँगा।

**अवधेयम्—** संस्कृत में '**भवान्**' शब्द का पुल्लिंग में और '**भवती**' शब्द स्त्रीलिंग में का प्रयोग 'आप' के लिए प्रयोग होता है। ये शब्द प्रथमा विभक्ति एकवचन के हैं अतः इनके साथ में क्रियाऐं भी प्रथमपुरुष एकवचन ही लगेंगी।

**अभ्यासप्रश्नाः 03** अत्र कानिचन वाक्यानि हिन्दीभाषायां प्रदत्तानि, भवन्तः तेषां संस्कृतभाषायाम् अनुवादं कुर्वन्तु—

1. आपका नाम क्या है। —
2. मेरा नाम अभिनव है। —
3. आइये बैठिये। —
4. आपका विद्यालय कहॉ हैं। —
5. मैं चाय पी रहा हूॅ। —
6. क्या आप प्रातः पॉच बजे उठते हैं। —
7. क्या आप चिकित्सक हैं। —
8. नहीं मैं शिक्षक हूॅ। —
9. आप क्या करती हैं। —
10. आपके भाई का नाम क्या है। —

## 4.4 सप्तककाराणां वाक्यप्रयोगाः

संस्कृतभाषायां प्रश्नकरणार्थं **किम्**— क्या ? **कुत्र**— कहॉ ? **कति**— कितने ? **कदा**— कब ? **कुतः**— कहॉ से ? **कथम्**— कैसे ? **किमर्थम्**— क्यों ?/किसलिए ? इत्यादिनां सप्तप्रश्नवाचकानां विशेषेण प्रयोगः भवति। एतेषां प्रश्नवाचकशब्दानां ज्ञानेन संस्कृतभाषायां वार्तालापः सरलतया कर्तुं शक्यते— यथा—

1. बालकः लिखति। प्रश्नः— बालकः **किं** करोति?
2. श्रीहरिः वैकुण्ठं गच्छति। प्रश्नः— श्रीहरिः **कुत्र** गच्छति ?
3. पाण्डवाः पंच आसन् प्रश्नः— पाण्डवाः **कति** आसन् ?

4. मातामही सप्तवादने आगतवती। प्रश्नः— मातामही **कदा** आगतवती ?
5. राष्ट्रपतिः देहलीतः आगमिष्यति। प्रश्नः— राष्ट्रपतिः **कुतः** आगमिष्यति ?
6. लतामंगेशकर मधुरं गायति। प्रश्नः— लतामंगेशकर **कथं** गायति ?
7. शिशुः दुग्धार्थं रोदिति। प्रश्नः— शिशुः **किमर्थं** रोदिति ?

**'किम्' इत्यस्य प्रयोगः**—अधोलिखितानि वाक्यानि ध्यानेन पठन्तु—

| | |
|---|---|
| सः शोधकार्यं करोति । | प्रश्नः— सः **किं** करोति ? |
| सुरेशः चित्रं पश्यति। | प्रश्नः— सुरेशः **किं** पश्यति। |
| माता तण्डुलं पचति। | प्रश्नः— माता **किं** पचति। |
| कृषकः बीजं वपति। | प्रश्नः— कृषकः **किं** वपति। |
| वैज्ञानिकः अन्वेषणं करोति। | प्रश्नः— वैज्ञानिकः **किं** करोति। |
| अभियन्ता भवनं निर्माति। | प्रश्नः— अभियन्ता **किं** निर्माति। |

**अवधेयम्—** किम्, एक प्रश्नवाचक शब्द है, जिसका प्रयोग सामान्यतः प्रथमान्त व द्वितीयान्त शब्दों के साथ क्या इस अर्थ में प्रश्न करते समय होता है। 'किम् ?' शब्द का अर्थ है क्या?।

**'कुत्र' इत्यस्य प्रयोगः** —अधोलिखितानि वाक्यानि ध्यानेन पठन्तु—

| | |
|---|---|
| दिनेशः वैद्यालयं गच्छति। | प्रश्नः— दिनेशः **कुत्र** गच्छति ? |
| रमणः काश्यां वसति। | प्रश्नः— रमणः **कुत्र** वसति ? |
| वीणा पूजागृहे अस्ति। | प्रश्नः— वीणा **कुत्र** अस्ति ? |
| राजेन्द्रः वाटिकायां कार्यं करोति। | प्रश्नः— राजेन्द्रः **कुत्र** कार्यं करोति ? |

**अवधेयम्—** कुत्र एक प्रश्न वाचक शब्द है, जो स्थान वाचक शब्दों में प्रश्न करते समय प्रयोग होता हैं कुत्र शब्द का अर्थ है – कहॉ पर?

**'कति' इत्यस्य प्रयोगः** – अधोलिखितानि वाक्यानि ध्यानेन पठन्तु—

| | |
|---|---|
| नगरे दश देवालयाः सन्ति। | प्रश्नः – नगरे **कति** देवालयाः सन्ति? |
| तत्र विंशतिः कदलीफलानि सन्ति। | प्रश्नः – तत्र **कति** कदलीफलानि सन्ति? |
| विद्यालये शतं छात्राः सन्ति। | प्रश्नः – विद्यालये **कति** छात्राः सन्ति? |
| गृहे पंच प्रकोष्ठाः सन्ति। | प्रश्नः – गृहे **कति** प्रकोष्ठाः सन्ति?मुखे |
| द्वात्रिंशत् दन्ताः सन्ति। | प्रश्नः – मुखे **कति** दन्ताः सन्ति? |
| वृक्षे पंचदश फलानि सन्ति। | प्रश्नः – वृक्षे **कति** फलानि सन्ति? |
| भगवद्गीतायाम् अष्टादश अध्यायाः सन्ति। | प्रश्नः— भगवद्गीतायां **कति** अध्यायाः सन्ति? |

**अवधेयम्— 'अस्ति और सन्ति'** ये 'अस्' धातु के रूप हैं। **'अस्ति'** वर्तमानकाल प्रथमपुरुष एकवचन का रूप है **'सन्ति'** बहुवचन का रूप है। **'अस्'** धातु का अर्थ है—होना। ऊपर लिखे गये सभी वाक्यों में संख्या का प्रयोग किया गया है। संख्या जानने के लिए प्रश्न करना है तो 'कति' (कितने) शब्द का उपयोग होता है।

**उदाहरणम्–** दश बालकाः सन्ति। कितने बालक हैं यह जानने के लिए प्रश्न वाक्य है – कति बालकाः सन्ति ? **'कति'** यह शब्द सर्वदा बहुवचन में होता है इसलिए उत्तर यदि एक या दो है तो भी प्रश्न हमेशा **कति सन्ति** ? यही होगा।

**'कदा' इत्यस्य प्रयोगः** अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–

सूर्योदयः **प्रातः** भवति। प्रश्नः– सूर्योदयः **कदा** भवति ?

सीता **सायं** नृत्याभ्यासं करोति। प्रश्नः– सीता **कदा** नृत्याभ्यासं करोति ?

पितामहः **परश्वः** आगमिष्यति। प्रश्नः– पितामहः **कदा** आगमिष्यति ?

ते **ह्यः** आगताः आसन्। प्रश्नः– ते **कदा** आगताः आसन् ?

**अद्य** कृष्णस्य जन्मदिनोत्सवः। प्रश्नः– कृष्णस्य जन्मदिनोत्सवः **कदा** ?

**अवधेयम्–**कदा एक प्रश्नवाचक शब्द है जिसका प्रयोग काल वाची एवं समय वाची शब्दो के साथ प्रश्न करते समय होता है। **कदा** शब्द का अर्थ है –**कब ?** सूर्योदय प्रातः होता है। सूर्योदय कब होता है ?

**'कुतः' इत्यस्य प्रयोगः –**अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–

सावित्री **देहरादूनतः** आगतवती। प्रश्नः– सावित्री **कुतः** आगतवती ?

राघवः घटीं **विदेशतः** आनयति। प्रश्नः– राघवः घटीं **कुतः** आनयति ?

फलानि **वृक्षात्** पतन्ति। प्रश्नः– फलानि **कुतः** पतन्ति ?

सा भोजनं **गृहात्** आनयति। प्रश्नः– सा भोजनं **कुतः** आनयति ?

सः जपमालां **काशीतः** आनीतवान्। प्रश्नः–सः जपमालां **कुतः** आनीतवान् ?

**अवधेयम्–** कुतः शब्द प्रश्नवाचक शब्द है, यह पंचमी विभक्ति तथा तसिल् प्रत्ययान्त शब्दों के साथ प्रश्न करते समय प्रयुक्त होता है। इन वाक्यों में दिए गए **कुतः** शब्द का अर्थ है **कहॉ से।**

**'कथम्' इत्यस्य प्रयोगः –**अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–

आम्रफलं मधुरं भवति। प्रश्नः– आम्रफलं कथं भवति ?

गंगायाः जलं निर्मलम् अस्ति। प्रश्नः– गंगायाः जलं कथम् अस्ति।

मयंकः विद्यालयः वाहनेन गच्छति। प्रश्नः– मयंकः विद्यालयः कथं गच्छति।

हिमालयस्य शोभा उत्तमा अस्ति। प्रश्नः– हिमालयस्य शोभा कथम् अस्ति।

घृतस्य निर्माणं नवनीतेन भवति। प्रश्नः– घृतस्य निर्माण कथं भवति।

**अवधेयम्–** कथं शब्द प्रश्नवाचक शब्द है, यह सामान्यतः भाववाचक संज्ञा तथा तृतीयान्त शब्दों के साथ प्रश्न करते समय प्रयुक्त होता है। **कथं** शब्द का अर्थ है **कैसे।**

**'किमर्थम्' इत्यस्य प्रयोगः–**अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–

सः **पठनार्थं** विद्यालयं गच्छति। प्रश्नः– सः **किमर्थं** विद्यालयं गच्छति ?

सा **आरोग्यार्थं** योगासनं करोति। प्रश्नः– सा **किमर्थं** योगासनं करोति ?

अनिलः **प्रवासार्थं** विदेशं गच्छति। प्रश्नः– अनिलः **किमर्थं** विदेशं गच्छति ?

गृहस्थः **सन्तोषार्थं** दानं करोति। प्रश्नः– गृहस्थः **किमर्थं** दानं करोति ?

**अवधेयम्–** किमर्थम्, एक प्रश्नवाचक शब्द है, जिसका प्रयोग चतुर्थ्यन्त शब्दों के साथ के लिए इस अर्थ में प्रश्न करते समय होता है। 'किमर्थम् ?' शब्द का अर्थ है क्यों अथवा किस लिए?

**अभ्यासप्रश्नाः 04** अधोलिखितानां वाक्यानाम् अनुसारं प्रश्नान् रचयन्तु–

1. बालकः श्लोकं लिखति।
2. राजा शासनं करोति।
3. राष्ट्रपतिभवनं देहल्याम् अस्ति।
4. कोणार्क मन्दिरम् उडीसायाम् अस्ति।
5. भारते एकोनत्रिंशत् राज्यानि सन्ति।
6. उत्तराखण्डे त्रयोदशजनपदाः सन्ति।
7. सूर्योदयः प्रातः भवति।
8. संस्कृतदिवसः श्रावणपूर्णिमायां भवति।
9. गंगा हिमालयात् निःसरति।
10. फलानि वृक्षात् पतन्ति।
11. विराटकोहली सम्यक् क्रिकेटक्रीडां क्रिडति।
12. सोनूनिगमः उच्चैः गीतं गायति।
13. बालकः पठनार्थं विद्यालयं गच्छति।
14. सैनिकः देशरक्षार्थं युद्धं करोति।

## 4.5 परिचयपाठः

शिक्षकः – सर्वेभ्यः स्वागतम्। नमो नमः। मम नाम वेदप्रकाशः। भवतः नाम किम्?

शशांकः – मम नाम शशांकः।

शिक्षकः – शशांक! भवतः गृहं कुत्र अस्ति?

शशांकः – मम गृहं देहरादूननगरे अस्ति।

शिक्षकः – भवत्याः नाम किम्?

अनन्या – मम नाम अनन्या।

शिक्षकः – अनन्ये! भवती कुत्र निवसति?

अनन्या – अहम् नैनीतालनगरे निवसामि।

शिक्षकः – अरविन्द! भवतः पितुः नाम किम्?

अरविन्दः – मम पितुः नाम विद्यासागरः अस्ति।

शिक्षकः– शशांक! अत्र आगच्छतु। अहं भवतः नासिका इति वदामि। भवान् मम नासिका इति वदतु। भोः छात्राः भवन्तः शंशाकस्य नासिका इति वदन्तु।

शिक्षकः – भवतः कर्णः।

शशांकः – मम कर्णः।

छात्राः – शशांकस्य कर्णः।

शिक्षकः – भवतः पादः, भवतः हस्तः, भवतः शिरः, भवतः मुखम्, भवतः नेत्रम् इत्यादि।

शशांकः – मम पादः, मम हस्तः, मम शिरः, मम मुखम्, मम नेत्रम्।

छात्राः – शशांकस्य पादः, शशांकस्य हस्तः, शशांकस्य शिरः, शशांकस्य मुखम्, शशांकस्य नेत्रम्।

शिक्षकः – भवत्याः पुस्तकम्, भवत्याः लेखनी, भवत्याः टिप्पणी पुस्तिका।

लता – मम पुस्तकम्, मम लेखनी, मम टिप्पणी पुस्तिका।

छात्राः – लतायाः पुस्तकम्, लतायाः लेखनी, लतायाः टिप्पणी पुस्तिका।

शिक्षकः – भगिनी– गृहम्, गृहं–चित्रम् इति वदामि, भवन्तः शुद्धं कुर्वन्तु।

छात्राः – भगिन्याः गृहम्। गृहस्य चित्रम्।

शिक्षकः – अहम् उत्तराणि वदामि– भवन्तः प्रश्नान् वदन्तु।

शिक्षकः – मम नाम वेदप्रकाशः।

छात्राः – भवतः नाम वेदप्रकाशः।

शिक्षकः – मम पुस्तकस्य नाम रामायणम्।

छात्राः – भवतः पुस्तकस्य नाम रामायणम्।

**अभ्यासप्रश्नाः 05** अधोलिखितानां वाक्यानाम् उत्तरं प्रयच्छन्तु–

1. मम इति शब्दे का विभक्तिः? – ..........................................................
2. नाम शब्दः कस्मिन् लिंगे भवति? – ..........................................................
3. भवतः इति शब्दस्य प्रातिपादिकं किम्? – ..........................................................
4. अनन्या शब्दस्य सम्बोधनं किम्? – ..........................................................
5. पितुः शब्दे का विभक्तिः? – ..........................................................
6. कर्णः, नेत्रम्, पादः एतेषां शब्दानां द्विवचनं किम्? –..................................................

## 4.6 दूरवाण्या मित्रसम्भाषणम्

हरीशः – हरिः ओम्।

ललितः – हरिओम्। कः वदति ?

हरीशः – अहं हरीशः वदामि।

ललितः – ओ! हरीशः वदति। स्वास्थ्यं कथम् अस्ति हरीश!

हरीशः – मित्र ! भवतः गृहे कोऽपि नास्ति किम् ? अद्य कोलाहलः न श्रूयते?

ललितः – सर्वे सन्ति मित्र! पिता समाचारं पठति। जननी पचति। अनुजःखादति।

अग्रजा वस्त्राणि प्रक्षालयति। पितामहः दूरदर्शनं पश्यति। पितामही स्नानं च करोति।

हरीशः – त्वं किं करोषि ? क्रीडसि वा ?

ललितः – अहं पठामि। उत्तरं लिखामि। तव अनुजौ किं कुरुतः ?

हरीशः – मम अनुजौ आपणं गच्छतः।

ललितः –अद्य अहं विद्यालयं न गच्छामि, त्वमपि विद्यालयं न गच्छ? वयं सर्वे अद्य भ्रमणार्थं नैनीतालं गच्छामः। मम बान्धवाः अपि आगच्छन्ति।

हरीशः – भवतः पिता कार्यालयं न गच्छति किम् ?

ललितः – अद्य मम पिता विरामं स्वीकरोति।

हरीशः – नहि भोः। अहम् आगन्तुं न शक्नोमि। भवान् गच्छतु।

ललितः – पुनः मिलामः, धन्यवादः।

**अभ्यासप्रश्नाः 06** अत्र केचन प्रश्नाः प्रदत्ताः, तेषाम् उत्तराणि लिखन्तु–

1. ललितस्य पिता किं करोति –
2. वस्त्राणि का प्रक्षालयति –
3. अनुजौ किं कुरुतः –
4. उत्तरं कः लिखति –
5. ललितेन सह के आगच्छन्ति –

## 4.7 पिता–पुत्रयोः सम्भाषणम्

श्रेयांशः – नमो नमः पितः!

पिता – आगच्छतु आगच्छतु। भवतः यात्रा कथम् आसीत्?

श्रेयांशः – सम्यक् आसीत् पितः!

पिता – भवान् कदा हल्द्वानीनगरं प्राप्तवान् ?

श्रेयांशः – अहं सोमवासरे प्रातः सप्त वादने हल्द्वानीनगरं प्राप्तवान्।

पिता – तत्र देहल्यां भवान् किं किं कृतवान् ?

श्रेयांशः – तत्र मित्रस्य गृहं गतवान्। तत्रैव स्नानमपि कृतवान्। अल्पाहारं खादितवान्। ततः देहलीविश्वविद्यालयं गतवान् ?

पिता – किं भवान् विश्वविद्यालयम् एकाकी एव गतवान् ?

श्रेयांशः – नैव, मम मित्रम् अहं च गतवन्तौ।

पिता – श्रेयांश! तत्र कार्यक्रमः कदा आरब्धः, कथं च आसीत् ?

श्रेयांशः – कार्यक्रमः दशवादने आरब्धः। श्रद्धा प्रार्थनां गीतवती। स्वागतानन्तरं मम भाषणम् आसीत्। अहं भाषणं कृतवान्। अध्यक्षः मां श्लाघितवान्। जनाः उच्चैः करताडनमपि कृतवन्तः। कार्यक्रमस्य समाप्तिः 12:00 वादने अभवत्।

कार्यक्रमस्य अन्ते छात्राः 'वन्दे मातरम्' राष्ट्रियगीतं गीतवत्यः।

पिता – पुनः मित्रस्य गृहं गतवान् किम् ?

श्रेयांशः – देहलीविश्वविद्यालयतः तस्य गृहं बहु दूरम् आसीत्। अतः अहं साक्षात् रेलस्थानकम् आगतवान्। तत्र मम वयस्यौ मिलितवन्तौ। बहुकालं वयं सम्भाषणं कृतवन्तः ततः मध्याहे त्रि वादने अहं प्रस्थितवान्।

पिता – अस्तु ! स्नानं करोतु ! भोजनं करोतु ! किंचित्कालं विश्रामं स्वीकरोतु।

श्रेयांशः – अस्तु ! पितः! धन्यवादः।

**अभ्यासप्रश्नाः 07** अत्र क्तवतु प्रत्ययान्तशब्दाः प्रदत्ताः सन्ति तान् शब्दान् आधारीकृत्य नूतनवाक्यप्रयोगं कुर्वन्तु– यथा– अहं पठितवान्। सः लिखितवान्। सा गतवती। दिनेशः पीतवान्।

1. हसितवान् – ——————————————
2. क्रीडितवान् – ——————————————
3. धावितवती – ——————————————
4. स्वीकृतवान् – ——————————————
5. दृष्टवती – ——————————————
6. चलितवान् – ——————————————
7. श्रुतवती – ——————————————

## 4.8 महाविद्यालयीय छात्राणां वार्तालापः

**भवान् कुत्र पठति?** – आप कहाँ पढते हैं।

**अत्रैव महाविद्यालये पठामि** – यही कालेज में पढ़ रहा हूँ।

**परीक्षायाः सिद्धता कथम् अस्ति?** – परीक्षा की तैयारी कैसी चल रही है।

**किं करवाणि, पाठ्यभागः एव न समाप्तः** –क्या करु, पाठ्यक्रम ही पूरा नहीं हुआ।

**किं भवान् गाढम् अभ्यासं करोति?** – क्या आप अधिक पढ रहे हो।

**नैव अद्य तु किमपि न पठितवान्** – नहीं, आज तो कुछ भी नहीं पढा।

**मम लेखनं सुन्दरम् अपि नास्ति** – मेरा लेख भी सुन्दर नहीं है।

**अद्य प्रातःउत्थाने विलम्बः संजातः** – आज सुबह उठने में देर हो गयी।

**अद्य महाविद्यालयं वेशभूषायां गन्तव्यं किम्?**–आज कालेज ड्रेस में जाना है क्या?।

**आम, अद्य महाविद्यालयस्य निरीक्षणमस्ति** – आज कालेज का निरीक्षण है।

**श्वः आरम्भ्यः वयं क्रीडिष्यामः** – कल से हम सब खेलेंगे।

**अस्माकम् अध्यापकः सम्यक्तया पाठयति** –हमारे अध्यापक अच्छी तरह पढाते हैं।

**गणितश्रवणमात्रेण मम शिरोवेदना जायते**– गणित का नाम सुनने मात्र से सिर दर्द हो जाता है।

**मह्यं भवतः लेखनी, टिप्पणी पुस्तिका च आवश्यकी–**

मुझे आपकी लेखनी और टिप्पणी पुस्तिक चाहिये।

**समाजकल्याणविभागः निर्धनछात्रेभ्यः छात्रवृत्तिं ददाति** –

समाज कल्याण विभाग गरीब छात्रों को छात्र वृत्ति देता है।

**प्रतिभासम्पन्नाः छात्राः विद्यालयस्य यशः वर्धयन्ते** –

प्रतिभावान् छात्र विद्यालय का यश बढाते हैं।

**अभ्यासप्रश्नाः 08** उपर्युक्तवार्तालापस्य आधारेण केचन प्रश्नाः निर्मिताः, भवन्तः तेषाम् उत्तराणि लिखन्तु–

1. कस्याः सिद्धता सम्यक् चलति –
2. मह्यं किं किं आवश्यकी। –
3. निरीक्षणं कस्य भवति –
4. छात्रवृत्तिः कः विभागः ददाति –
5. विद्यालयस्य यशः के वर्धयन्ते –

## 4.9 वेशभूषण–विषयकानि वाक्यानि

**करांशुकं पदाशुकं च भारतीय वेशः अस्ति** –कुर्ता और पायजामा भारतीय पहनावा है।

**भारतीय–महिलाः शाटिकाः धरन्ति** – भारतीय महिलायें साडी पहनती हैं।

**भवत्याः शाटिका नूतना प्रतीयते** – आपकी साड़ी नई लग रही है।

**नैव गतवर्षे एव क्रीतवती** – नही ंतो पिछले साल ही खरीदी थी।

**तथापि नूतनम् इव प्रतिभाति** – फिर भी नई दिख रही है।

**एतादृशी शाटिका मम समीपे अपि अस्ति** – ऐसी ही साड़ी मेरे पास भी है।

**अंचल बहु सम्यक् अस्ति** – आंचल बहुत अच्छा है।

**उत्तरीयेण एव बालिकानां शोभा अस्ति** –दुपट्टे से ही बालिकाओं की शोभा है।

**वलयस्य विन्यासः आकर्षकः अस्ति** – कंगन की बनावट सुन्दर है।

**अंगुल्यां हीरकस्य मुद्रिका शोभते।** – अंगुली में हीरे की अंगूठी सुन्दर लग रही है।

**कण्ठहारस्य कियत् मूल्यम् अस्ति** – गले के हार का मूल्य कितना है।

**ओष्ठरागस्य कः वर्णः न ज्ञायते** – लिपिस्टिक किस रंग की है पता नहीं चल रहा है।

**कर्णयोः स्वर्णकुण्डलस्य महत्त्वम् अस्ति**– कानों में सोने के कुण्डल का महत्त्व है।

**नूपुराणां मधुरध्वनिः जनम् आकर्षयति**– पायजेब की ध्वनिः लोगों को आकर्षित करती है।

**केशानां कृते सर्षपतैलं हितकरं भवति**– बालों के लिए सरसों का तेल हितकर होता है।

**हिमाचलस्य शिरस्त्राणं सर्वत्र प्रसिद्धम्** – हिमांचल की टोपी सभी जगत प्रसिद्ध है।

**पुरुषेषु उष्णीषस्य महत्त्वम् अस्ति** – पुरुषों में पगडी का महत्त्व है।

**अभ्यासप्रश्नाः 09** अधोलिखितान् शब्दान् प्रथमाविभक्तौ एकवचने लिखन्तु–

1. शाटिकाः –
2. भवत्याः –
3. वलयस्य –
4. ओष्ठरागस्य –
5. कर्णयोः –
6. पुरुषेषु –
7. बालिकानाम् –
8. गतवर्षे –
9. हीरकस्य –
10. अंगुल्याम् –

## 4.10 भोजनविषये गृहिण्यो सम्भाषणम्

राधा – कमले! किं करोति भवती?

कमला – अहो राधे! आगच्छतु, उपविशतु, कुशलिनी किम्?

राधा – आम, सर्वं कुशलम्। भवती स्वकार्यं करोतु, अहं तत्रैव अन्तः आगच्छामि।

कमला – मम पाकः न समाप्तः। अद्य भोजनार्थं बान्धवाः आगच्छन्ति। अतः विशेषपाकं करोमि।

राधा – तर्हि किं किं पाकं करोति?

कमला – आलुकेन सह कलायं क्वथितं करोमि, द्विदलैः सूपं करोमि, पालकीशाकं करोमि। राज्यक्तं च करोमि।

राधा – बहु मरीचिकाः सन्ति, खलु। मरीकया किं करोति।

कमला – लघु मरीचिका कटुः अस्ति। अतः महामरीकया भर्जं करोमि।

राधा – विशिष्टं व्यंजनं कैः करोति, ?

कमला – विण्डीनकैः विशिष्टं व्यंजनं करोमि, उर्वारुकेण किं करोमि इति चिन्तयामि।

राधा – कारवेल्लस्य भर्जनं करोतु भोः! बहु स्वादिष्टं भवति।

कमला – तथैव करोमि। पायसम् अपि करोमि। पर्पटान् अपि भर्जयामि। मम पतिः बहु इच्छति।

राधा – तण्डुलम् अपि करोति वा?

कमला – आम, जीरकसहितं तण्डुलं करोमि। भोजनेन सह अवलेहः अपि अस्ति।

राधा – मास्तु भोः! भवती उपविशतु, मया सह सम्भाषणं करोतु, अहं सर्वं करोमि।

कमला – तर्हि अहं सर्वेषां रुचिं पश्यामि। सर्वं भवती करोतु।

**अभ्यासप्रश्नाः 10** अधोलिखितानां शब्दानाम् अर्थं लिखन्तु–

1. कलायः – ...................................... |2. क्वथितम् – ........................................... |
3. द्विदलम् – ...................................... |4. कटुः – ........................................... |
5. विण्डीनकम्– ...................................... |6. व्यंजनम् – ........................................... |
7. कारवेल्लम्– ...................................... | 8. पर्पटः – ........................................... |
9. पायसम् – ...................................... | 10. अवलेहः – ........................................... |

## 4.11 विश्वविद्यालयस्य वार्षिकोत्सवः

आचार्यः – श्वः वार्षिकोत्सवः भविष्यति खलु? तन्निमित्तं सर्वसज्जता अभवन् किम्? भवान् वदतु देवेश! कः कः किं किं करिष्यति इति।

देवेशः – अजयः, राकेशः, दिनेशः च सभायाः अलंकारं करिष्यन्ति। जितेन्द्रः, पंकजः च आसनव्यवस्थां द्रक्ष्यतः।

आचार्यः – मण्डपस्य अलंकारं के करिष्यन्ति?

देवेशः – ललिता तस्याः सख्यः च मण्डपालंकारं करिष्यन्ति।

आचार्यः – दीपालंकारं के करिष्यन्ति?

देवेशः – अभिमन्युः इत्यादयः दीपालंकारं करिष्यन्ति।

आचार्यः – कार्यक्रमाय ध्वनियन्त्रव्यवस्थापकं, चित्रकारं, पुष्पमालाकारं च कः सूचयिष्यति। समयेन आगच्छेयुः इति अपि सूचनीयः।

देवेशः – एतान् सर्वान् कार्यालयप्रमुखः सूचिष्यति।

आचार्यः – मुख्यातिथिं, विशिष्टातिथिं च कः कः आनेष्यति?

देवेशः – मुख्यातिथिम् अहमेव आनेष्यामि, विशिष्टातिथिं च वेदाध्यापकः आनेष्यति।

आचार्यः – अध्यक्षः स्वयमेव आगमिष्यति, उत कोऽपि तम् आनेष्यति।

देवेशः – अध्यक्षः स्वयमेव आगमिष्यति।

आचार्यः – कार्यक्रमस्य आरम्भे वैदिकमंगलाचरणं, प्रार्थनां, स्वागतगीतं च के के गास्यन्ति?

देवेशः– वैदिकमंगलाचरणं संस्कृतविद्यालयस्य छात्राः करिष्यन्ति। प्रार्थनां प्रज्ञा, भारती च गास्यतः। स्वागतगीतं लता, हेमा, पद्मा च गास्यन्ति।

आचार्यः – कार्यक्रमस्य अन्ते मिष्टान्नस्य वितरणं कः कुर्यात्? इति अपि चिन्तनीयम्।

देवेशः – मिष्टान्नस्य वितरणं बाबूरामः करिष्यति।

आचार्यः – श्वः कार्यक्रमः व्यवस्थितः यथा स्यात् तथा त्वं परिशीलयिष्यसि ननु?

देवेशः – तत्र सन्देहः एव मास्तु। वयं सर्वे मिलित्वा सम्यक् कार्यक्रमं करिष्यामः।

आचार्यः – तर्हि श्व मेलिष्यामि। अहं शीघ्रम् आगमिष्यामि।

**अभ्यासप्रश्नाः 11**

उपर्युक्तसम्भाषणस्य आधारेण कः किं किं करोति इति पंचवाक्येषु लिखन्तु–

**यथा– बाबूरामः मिष्टान्नं वितरति।**

1. ........................................................................................................................ ।
2. ........................................................................................................................ ।
3. ........................................................................................................................ ।
4. ........................................................................................................................ ।
5. ........................................................................................................................ ।
6. ........................................................................................................................ ।
7. ........................................................................................................................ ।
8. ........................................................................................................................ ।
9. ........................................................................................................................ ।
10. ........................................................................................................................ ।

## 4.12 संस्कृतसम्भाषणम्

कविता – भोः मयंक! भवान् संगणकज्ञानं कुतः प्राप्तवान्?

मयंकः – अहं अमेरिकायां संगणकज्ञानं प्राप्तवान्।

कविता – भवान् किमर्थं भारतम् आगतवान्? भवतः मातापितरौ कुत्र स्तः?

मयंकः – मम मातापितरौ अमेरिकादेशे स्तः। अहं संस्कृतशास्त्राणाम् अध्ययनार्थं भारतम् आगतवान्। तत्रापि संस्कृतशास्त्राणाम् अध्ययनाय प्रथमं संस्कृतसम्भाषणं ज्ञातुम् ईच्छामि। भवती किम् अधीतवती।

कविता – अहं संस्कृतसाहित्यम् अधीतवती। संस्कृते स्नातकोत्तरपदवीं प्राप्तवती। अधुना शोधकार्यम् अपि करोमि।

मयंकः – भवती अत्र कति वर्षेभ्यः कार्यं करोति?

कविता – अहं पंचवर्षेभ्यः संस्कृतप्रचारकार्यं करोमि।

मयंकः – अत्र संस्कृताध्ययनाय बहुभ्यः प्रदेशेभ्यः जनाः आगच्छन्ति किम्?

कविता – आम, न केवलं अन्य प्रदेशेभ्यः अपितु विदेशेभ्यः अपि जनाः संस्कृताध्ययनाय प्रतिवर्षम् आगच्छन्ति तिष्ठन्ति पठन्ति च।

मयंकः – ते अत्र आगत्य कथम् अध्ययनं कुर्वन्ति?

कविता – ते अत्र आगत्य पठन्ति, किन्तु शिक्षणं मन्दगत्या भवति, यतः ते शीघ्रम्

उच्चारयितुं न शक्नुवन्ति। किन्तु मासत्रयं चतुष्ट्यं वा स्थित्वा सम्यक् ज्ञात्वा गच्छन्ति। अत्रत्येन संस्कृतवातावरणेन ते अत्यन्तं प्रभाविताः भवन्ति।

मयंकः – अहं बहून् विषयान् ज्ञातवान्। धन्यवादः। अहमपि संस्कृतसम्भाषणाभ्यासद्वारा संस्कृतशास्त्राणाम् अध्ययनार्थं परिश्रमं करिष्यामि।

**अभ्यासप्रश्नाः 12** उपर्युक्तसम्भाषणस्य आधारेण कः किं किं करोति इति पंचवाक्येषु लिखन्तु–

1. मयंकः संगणकज्ञानं कुत्र प्राप्तवान्? – ............................................................ ।
2. मयंकः भारतं किमर्थम् आगतवान्? – ............................................................ ।
3. कविता किम् अधीतवती अस्ति? – ............................................................ ।
4. अधुना कविता किं करोति? – ............................................................ ।
5. मयंकः किं कर्तुम् इच्छति? – ............................................................ ।
6. मयंकः कति विषयान् ज्ञातवान्? – ............................................................ ।
7. संस्कृतवातावरणेन के प्रभाविताः भवन्ति?– ............................................................ ।

## 4.13 सारांशः

भाषा व्यवहारप्रधाना भवति। भाष्यते अनया इति निष्पत्या इदमेव सिद्धयति यत् भाषायां परस्परं व्यवहारः भवति। सा एव भाषा जीवति यस्यां परस्परं भावः विनिमयः वार्तालापः च भवति। इदमेव कारणं यत् सहस्राधिकवर्षेभ्यः संस्कृतभाषा अद्यापि व्यवहारभाषा अस्ति इति। भाषायाः व्यवहारः वक्तुः इच्छायाम् अधारितः भवति, किन्तु यः कोऽपि व्यवहारः स्यात्, सः विषयकेन्द्रितः एव भवति। यथा– छात्रशिक्षकयोः मध्ये शिक्षाविषयकः व्यवहारः भवति, रोगिचिकित्सकयोः मध्ये स्वास्थ्यविषये वार्तालापः भवति। अतः भाषा व्यवहाराय विभिन्नविषयाणां तेषाम् अवयवानां च सामान्यं ज्ञानम् आवश्यकम्। अस्याम् अन्वितौः भवन्तः सप्तककाराणां विषये तथा विभिन्नसम्भाषणानां विषये ज्ञातवन्तः। एतेषां पुनः पुनः अभ्यासेन भवन्तः अपि संस्कृतेन सम्भाषणं सरलतया कर्तुं शक्नुवन्ति।

## 4.14 अभ्यासप्रश्नाम् उत्तराणि –

**अभ्यासप्रश्नाः 01उत्तराणि–**

1. सुप्रभातम्। 2. स्वागतम्। 3. शुभरात्रि। 4. कृपया।
5. धन्यवादः। 6. क्षम्यताम्। 7. वर्धापनानि/अभिनन्दनानि।

**अभ्यासप्रश्नाः 02उत्तराणि–**

1. आम्। 2. न । 3. न। 4. आम्। 5. न ।

**अभ्यासप्रश्नाः 03 उत्तराणि–**

1. भवतः नाम किम्?। 2. मम नाम अभिनवः। 3. आगच्छतु, उपविशतु।
4. भवतः विद्यालयः कुत्र अस्ति। 5. अहं चायं पिबामि। 6. किं भवान् प्रातःपंचवादने उतिष्ठति। 7. किं भवान् चिकित्सकः? 8. नैव अहं शिक्षकः। 9. भवती किं करोति? 10. भवतः/भवत्याः भ्रातुः नाम किम्?।

**अभ्यासप्रश्नाः 04 उत्तराणि–**

1. बालकः किं लिखति? 2. राजा किं करोति?
3. राष्ट्रपतिभवनं कुत्र अस्ति? 4. कोणार्क मन्दिरम् कुत्र अस्ति?
5. भारते कति राज्यानि सन्ति? 6. उत्तराखण्डे कति सन्ति?

7. सूर्योदयः कदा भवति? 8. संस्कृतदिवसः कदा भवति?

9. गंगा कुतः निःसरति? 10. फलानि कुतः पतन्ति?

11. विराटकोहली कथं क्रिकेटक्रीडां क्रिडति?12. सोनूनिगमः कथं गीतं गायति?

13. बालकः किमर्थं विद्यालयं गच्छति? 14. सैनिकः किमर्थं युद्धं करोति?

**अभ्यासप्रश्नाः 05 उत्तराणि**

1. षष्ठी एकवचनम्। 2. नपुंसकलिंगे। 3. भवत्।

4. अनन्ये! 5. षष्ठी एकवचनम्। 6. कर्णौ। नेत्रे। पादौ।

**अभ्यासप्रश्नाः 06 उत्तराणि**

1. समाचारं पठति। 2. अग्रजा वस्त्र प्रक्षालयति। 3. अनुजौ आपणं गच्छतः।

4. ललितः उत्तर लिखति। 5. ललितेन सह बान्धवाः आगच्छन्ति।

**अभ्यासप्रश्नाः 07 उत्तराणि**

1. बालकः विदूषकं दृष्ट्वा हसितवान् 2. क्रीडकः पादकन्दुकं क्रीडितवा

3. बालिका चौरं विलोक्य धावितवती। 4. छात्राः मन्त्रिणा पुरस्कारं स्वीकृतवान्।

5. मातामही मां बहु कालाद् दृष्टवती। 6. राघवः गृहात् पादाभ्यां चलितवान्।

7. रमा कथां श्रुतवती।

**अभ्यासप्रश्नाः 08 उत्तराणि**

1. परीक्षायाः सिद्धता सम्यक् चलति।2. मह्यं लेखनी, टिप्पणी पुस्तिका च आवश्यकी। 3. निरीक्षणं महाविद्यालयस्य भवति। 4. छात्रवृत्तिं समाजकल्याणविभागः ददाति। 5. विद्यालयस्य यशः प्रतिभासम्पन्नाः छात्राः वर्धयन्ते।

**अभ्यासप्रश्नाः 09 उत्तराणि–**

1. शाटिका। 2. भवती। 3. वलयः। 4. ओष्ठरागः।
5. कर्णः। 6. पुरुषः। 7. बालिका।8. गतवर्षम्।

9. हीरकम्। 10. अंगुलिः।

**अभ्यासप्रश्नाः 10 उत्तराणि**

1. मटर। 2. उबला हुआ। 3. दाल। 4. तीखा। 5. भिण्डी।
**6.** सब्जी। 7. करेला। 8. पापड़। 9. खीर। 10. अचार।

**अभ्यासप्रश्नाः 11 उत्तराणि**

1. अजयः, राकेशः, दिनेशः च सभायाः अलंकारं कुर्वन्ति।
2. जितेन्द्रः, पंकजः च आसनव्यवस्थां पश्यतः।
3. ललिता तस्याः सख्यः च मण्डपालंकारं कुर्वन्ति।

4. अभिमन्युः इत्यादयः दीपालंकारं कुर्वन्ति।
5. ध्वनियन्त्रव्यवस्थापकं, चित्रकारं, पुष्पमालाकारं च कार्यालयप्रमुखः सूचयति।।
6. मुख्यातिथिं देवेशः, विशिष्टातिथिं च वेदाध्यापकः आनयतः।
7. वैदिकमंगलाचरणं संस्कृतविद्यालयस्य छात्राः कुर्वन्ति।
8. प्रार्थनां प्रज्ञा, भारती च गायतः।
9. स्वागतगीतं लता, हेमा, पद्मा च गायन्ति।
10. बाबूरामः मिष्टान्नं वितरति।

**अभ्यासप्रश्नाः** 12 उपर्युक्तसम्भाषणस्य आधारेण कः किं किं करोति इति पंचवाक्येषु लिखन्तु–

1. मयंकः संगणकज्ञानं अमेरिकायां प्राप्तवान्।
2. मयंकः संस्कृतशास्त्राणाम् अध्ययनार्थं भारतम् आगतवान्।
3. कविता संस्कृतसाहित्यम् अधीतवती अस्ति।
4. कविता अधुना शोधकार्यं करोति।
5. मयंकः संस्कृतेन सम्भाषणं कर्तुम् इच्छति।
6. मयंकः बहून् विषयान् ज्ञातवान्।
7. संस्कृतवातावरणेन जनाः प्रभाविताः भवन्ति।

## 4.15सन्दर्भग्रन्थसूची

14. अनुवाद चन्द्रिका – डॉ. ब्रह्मानन्द त्रिपाठी– चौखम्बा सुरभारती प्रकाशन, वाराणसी।
15. भाषाप्रवेशः – संस्कृतभारती, नवदेहली।
16. संस्कृत–व्यवहार–साहस्री – संस्कृतभारती, नवदेहली।

## 4.16 सहायकोपयोगि–पाठ्यसामग्री

17. सम्भाषणम् – राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।
18. प्रवेशः, संस्कृतभारती उत्तरांचलम्।

# तृतीयः खण्डः

# अन्वितिः – 1. लकारपरिचयः, कालपरिचयश्च।

1.1प्रस्तावना
1.2 उद्देश्यम्
1.3 लट् लकारः वर्तमानकालश्च
14. लिट् लकारः (अनद्यतन भूतकालः)
1.5. लुट् लकारः–अनद्यतनभविष्यत् कालः
1.6 लङ्लकारः भूतकाल
1.7 लिङ्लकारः
18. लुङ् लकारः भूतकालः
1.9 लृङ् लकारः–हेतुहेतुमद् भविष्यत्काल
1.10. लोट् लकारः 'आज्ञार्थकः
1.11 लृट् लकारः भविष्यकालः
1.12 सारांशः
1.13 अभ्यासप्रश्नानाम् उत्तराणि
1.14 संदर्भग्रन्थसूची
1.15सहायकोपयोगि–पाठ्यसामग्री
1.16 निबन्धात्मकप्रश्नाः

## 1.1 प्रस्तावना

संस्कृतभाषायाः मूले तस्याः व्याकरणस्य सर्वप्रमुखं स्थानम् अस्ति। ''व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्।'' अर्थात् येन वयं साधु–असाधु–शब्दानां ज्ञानं प्राप्नुमः तत् व्याकरणम् इति कथ्यते। व्याकरणे लकाराणां कालानां च प्रक्रिया भाषायाः प्रयोगे निर्भरा भवति। संस्कृत भाषायां दश लकाराः निर्धारिताः सन्ति। एतेषु दश लकारेषु स्थूल–रूपेण कालत्रयस्य प्रयोगः भवति। लकाराणां प्रयोगार्थं 'भू' आदि धातूनां, भवति, पठति, चलति इत्यादीनां क्रियापदानां तिङ् प्रत्ययानां, सुप् प्रत्ययानां तथा लट् लिट् लुट् इत्यादीनां लकाराणां ज्ञानम् आवश्यकम्। अस्याम् अन्वितौ वयम् उपर्युक्तानां प्रयोगेण लकारस्य कालस्य च ज्ञानं प्राप्स्यामः।

## 1.2 उद्देश्यम्

अस्याः अन्वितेः अध्ययनात् परं भवन्तः एतद् ज्ञास्यन्ति यत्–

- संस्कृते कति लकाराः सन्ति।
- लकाराणां प्रयोगः कथं कुत्र च क्रियते।
- संस्कृते कालः कतिविधः।
- कालस्य प्रयोगः कथं कुत्र च क्रियते।
- लकाराणां कालस्य च कः सम्बन्धः।
- लकारज्ञानाय कस्य ज्ञानम् आवश्यकम्।
- भाषायाः सुष्ठु प्रयोगाय लकारकालयोः किं प्रयोजनम्।

## 1.3 लट् लकारः वर्तमानकालश्च

वर्तमानकालस्य क्रियायाः बोधनार्थं प्रयोगार्थं च लट्लकारस्य उपयोगः भवति। भवन्तः एतानि उदाहरणानि परिशीलयन्तु–

1. बालकः गच्छति।



2. धनेवः चरन्ति।



3. बालकाः क्रीडन्ति।



4. छात्रौ पठतः।



5. गोपालः पुस्तकं पठति।



6. छात्राः विद्यालयं गच्छन्ति।



7. अहं वित्तकोशं गच्छामि।



8. शिक्षकः समाचारपत्रं पठति।

9. अध्यापकः छात्रान् पाठयति।



10. शोभितः द्विचक्रिकां चालयति।

11. मेघः वर्षति।

**<u>अभ्यासः–01</u>**

**(1) रिक्तं स्थानं पूरयत–**

1. बालकः दुग्धं...................................। (नृत्यति, खादति, पिबति)
2. वृक्षात् पर्णं........................................। (पतति, विकसति, अपतत्)
3. क्रीडकः कन्दुकं...............................। (अक्रीडत्, क्रीडतु, क्रीडति)

**(2) एकवाक्येन उत्तरं ददातु–**

1. मेघः.............................. ।
2. गोपालः पुस्तकं............................ ।
3. धेनवः....................... ।
4. शोभितः द्विचक्रिकां.............................. ।

# 14. लिट् लकारः (अनद्यतन भूतकालः)

**अर्थात्**–अनद्यतनस्य भूतकालस्य विषये अप्रत्यक्षक्रियायाः अर्थे च लिट्लकारस्य प्रयोगः भवति। सामान्यतया वक्तुं शक्यते यत्, यत् कार्यम् अतीव प्राचीनकाले सम्पन्नम् अथवा वक्ता यत् कार्यं स्वयं न दृष्टवान् स्यात् तस्य विषये लिट् लकारस्य प्रयोगः भवति। यथा–

- ❖ भगवतः रामस्य जन्म अयोध्यायां बभूव।
- ❖ भारतं 1947 तमे वर्षे स्वतन्त्रं बभूव।
- ❖ युधिष्ठिरो पाण्डवानां राजा बभूव।



- ❖ वाल्मीकिः रामायणं लिलेख।

❖ श्रीकृष्णः गीतामृतं जगाद।



❖ पाणिनिः अष्टाध्यायीं रचयामास।
❖ रामः अश्वमेधयज्ञं चकार।
❖ महात्मागांधी इंग्लैण्डदशे पपाठ।
❖ आचार्यः द्रोणः पाण्डुपुत्रान् धनुर्विद्यां पाठयांचकार।
❖ पाण्डवाः महाभारतस्य युद्धं जिग्युः।
❖ विष्णुः बलिना त्रिपदां भूमिं ययाच।
❖ देवाः अमृतं पपुः।
❖ आदिपुरुषाः वनेषु तस्थुः।

❖ रामः लक्ष्मणः सीता च वनं जग्मुः।



❖ प्रह्लादः भगवन्तं विष्णुं तुष्टाव।

**अभ्यासः–02**

**1. रिक्तं स्थानं पूरयत–**

(क) कृष्णस्य जन्म मथुरायां.................................। भू+लिट् प्र0पु0 एकवचनम्
(ख) भगवान् शिवः विषं.......................................। पिब्+लिट्, प्र0पु0 एकवचनम्
(ग) पतंजलिः महाभाष्यं.......................................। रच्+लिट् प्र0पु0 एकवचनम्

**2. साधु–असाधुरूपं चिनुत–**

(क) रावणः लंकायां तस्थौ। सत्यम्/असत्यम्
(ख) कालिदासः रघुवंशं लिलेख। सत्यम्/असत्यम्
(ग) रामः लक्ष्मणः सीता च वनं जगौ। सत्यम्/असत्यम्
(घ) भारतं 1947 तमे वर्षे स्वतन्त्रं बभूवतुः। सत्यम्/असत्यम्

## 1.5. लुट् लकारः–अनद्यतनभविष्यत् कालः

अनद्यतनकालस्य भविष्यत्कालस्य क्रियायाः बोधनार्थं लुट् लकारस्य प्रयोगः क्रियते। अर्थात् एतादृशी भविष्यत्कालिक–क्रिया, यस्याः प्रयोगः अद्य न भूत्वा अगामिनिकाले भविष्यति, तस्याः ज्ञापनार्थं लुट् लकारस्य प्रयोगः भवति। एते प्रयोगाः 'जायेंगे करूंगा' इत्यादिषु अर्थेषु भवन्ति। अधोलिखितानि उदाहरणानि परिशीलयन्तु–

❖ सोमवासरे अहं देहलीं गन्तास्मि।
❖ श्वः स्वतन्त्रता दिवसः भविता।
❖ श्वः अहं हरिद्वारं यातास्मि।
❖ भवान् हल्द्वानीं कदा गन्ता?

❖ भवान् शास्त्रचिन्तनं करोतु, अहं प्रश्नान् प्रष्टास्मि।
❖ प्रपरश्वः मम पिता मथुरां प्रस्थाता।

❖ यदा पुष्पं विकसिता तदा भ्रमरः गुंजिता।



❖ यदा विराटकोहली क्रीडिता तदा दर्शकाः प्रसन्नाः भवितारः।
❖ अहं देहलीं गत्वा भारतद्वारं (इण्डिया गेट) द्रष्टा।
❖ यदा मम उपवासः भविता तदा अहं भोजनं त्यजितास्मि।
❖ मम ग्रामे श्रीमद्भागवत्कथा भविता तत्र जनाः कथां श्रोतारः।

**अभ्यासः–03**

**1. रिक्तस्थानं पूरयत–**

(क) अहं हरिद्वारं.................................... । (प्रष्टास्मि, श्रोतारः, गन्तास्मि)
(ख) भवान् हल्द्वानीं कदा....................................? (गन्तारौ, गन्ता, गन्तारः)
(ग) विवेकः उपवासदिने अन्नं.............................. । (खादिता, त्यजिता, कर्त्ता)
(घ) श्वः स्वतत्रतादिवसः........................................ । (श्रोता, याता, भविता)

**2. सुमेलनं करोतु**

| | |
|---|---|
| (क) हरिद्वारं | गुंजितारः |
| (ख) भ्रमराः | प्रष्टा |
| (ग) कथां | प्रस्थाता |
| (घ) प्रश्नान् | श्रोतारः |

## 1.6 लङ्लकारः भूतकालः

अद्यतः पूर्वं यत् जातं तस्य बोधनाय लङ् लकारस्य प्रयोगः भवति। अर्थात् यानि कार्याणि व्यतीतानि तेषां बोधनाय अस्य लकारस्य प्रयोगः क्रियते। यथा– गया, खाया, किया इत्यादिवत्। अधोलिखितानि उदाहरणानि परिशीलयन्तु–

❖ रामः रावणस्य वधम् अकरोत्।



❖ पाणिनिः अष्टाध्यायीम् अलिखत्।

- ❖ अहं परीक्षाम् अलिखम्।

- ❖ छात्रा पुष्पाणि अत्रुटयत्।



- ❖ वृक्षात् पर्णानि अपतन्।



- ❖ वत्सः दुग्धम् अपिबत्।
- ❖ राम–रावणयोः युद्धम् अभवत्।



- ❖ विडालः मूषकम् अमारयत्।

- ❖ छात्राः कन्दुकम् अक्रीडन्।
- ❖ ह्यः मेघः अवर्षत्।

## अभ्यासः–04

**1. रिक्तस्थानं पूरयत–**

(क) पंतजलिः महाभाष्यम्.......................................। (अरचयत्, अवदत्, अप्रकाशयत्)

(ख) वृक्षात् फलानि.......................................। (अपश्यन्, अपतन्, अविकसन्)

(ग) बालकः दुग्धम्.......................................। (अखादत्, अपश्यत् अपिबत्)

(घ) अहं भाषणम्.......................................। (अवदम्, अलिखम्, अवदन्)

**2. शुद्धाशुद्धं चिनुत–**

1. हनुमान् लंकाम् अज्वालयत्।
2. मेघाः अवर्षत्।
3. पृथिवीराजः हिन्दू राजा अभवत्।
4. छात्राः कन्दुकम् अक्रीडत्।

## 1.7 लिङ्लकारः

विधिः निमन्त्रणम्, आमन्त्रणम्, अधीष्टम्, सम्प्रश्नः, प्रार्थना–निमन्त्रणप्रदाने, आमन्त्रणे, अनुरोधे, जिज्ञासायां निवेदने च लिङ्लकारः प्रयुज्यते। एषः लिङ्लकारः द्विविधः–विधिलिङ् लकारः आशीर्लिङ्–लकारश्च। एषः लकारः चाहिए इत्यर्थे भवति। इमानि उदाहरणानि परिशीलयन्तु–

- ❖ वित्तं यत्नेन संरक्षेत्।



- ❖ शिक्षकः छात्रेण साकं मित्रवदाचरेत्।



- ❖ छात्राः कक्षायां शान्त्या उपविशेयुः।



- ❖ सैनिकाः देशं रक्षेयुः।

- ❖ छात्रौ स्वाध्यायं कुर्याताम्।



- ❖ भक्तः देवम् अर्चयेत्।

- ❖ बालकः दुग्धं पिबेत्।

- ❖ भवान् सुपाच्यं खाद्यात्।

- ❖ त्वं वीरप्रसविनी भूयाः।
- ❖ निर्धनाय धनं दध्यात्।
- ❖ देवाः कल्याणं विधेयासुः।
- ❖ मेघः वृष्यात्।



- ❖ परिश्रमी सफलः भूयात्।

**अभ्यासः–05**

**1. रिक्तस्थानं पूरयत–**

(क) वृत्तं यत्नेन.................................. । (अर्जयेत्, परित्यजेत्, विलिखेत्)
(ख) छात्राः गृहकार्यं............................. । (पश्येयुः, चोरयेयुः, सम्पादयेयुः)
(ग) बलिष्ठः सुपाच्यं................................ । (खादेत्, संसाधयेत्, पश्येत्)
(घ) सैनिकाः देशं................................ । (रक्षयेत्, रक्षयेयुः, पश्येयुः)

**2. सुमेलनं करोतु–**

| | |
|---|---|
| (क) छात्रेण साकं | भूयात् |
| (ख) जलं | दध्यात् |
| (ग) धनं | पिबेत् |
| (घ) सफलः | आचरेत् |

## 18. लुङ् लकारः भूतकालः

एषः लकारः भूतकालस्य क्रियायाः बोधं कारयितुं प्रयुज्यते। अर्थात् अस्य लकारस्य प्रयोगः भूतकालिक क्रियायाः प्रयोगार्थं भवति। एषः लकारः किया, लिखा, सोया इत्यादिषु अर्थेषु सम्भवति। निम्नलिखितानि उदाहरणानि परिशीलयन्तु–

- ❖ माता बालकायै अङ्किनीम् अदात्।
- ❖ बालः उत्तरपुस्तिकायां पाठम् अलेखीत्।



- ❖ दिनेशः कथाम् अपठीत्।

❖ वृष्टिः अभूत्।



❖ देवदत्तः पायसम् अखादीत्।



❖ सचिनः क्रिकेट क्रीडाम् अक्रीडीत्।



❖ धीवरः नदीम् अतारीत्।



❖ अध्यापकः छात्रम् अददण्डत्।

❖ शिशुः सुखेन न्याद्रासीत्।



❖ महादेवः गंगाम् अधात्।



## अभ्यासः–06

**1. रिक्तस्थानं पूरयत–**

(क) दिनेशः कविताम्............................। (अपठीत्, अतारीत्, अभूत्)
(ख) मोहनः पायसम्................................। (अधात्, अखादीत्, अब्रवीत्)
(ग) नाविकः नौकया नदीम्.........................।(अलेखीत्, अगमत्, अतारीत्)
(घ) शिवः चन्द्रम्.......................................। (अधात्, अदात्, अभूत्)

**2. साधु–असाधुवाक्यानां चयनं कुरुत–**

(क) शिशवः सुखेन न्याद्रासीत्।
(ख) ह्यः वृष्टिः अभूत्।
(ग) देवदत्तः पायसम् अक्रीडीत्।

(घ) बालकः पाठम् अलेखीत्।

## 1.9 लृङ् लकारः–हेतुहेतुमद् भविष्यत्कालः

लिङ् निमित्ते भविष्यति काले लृङ् लकारः भवति क्रियातिपत्तौ सत्याम्। क्रियातिपत्तौ=क्रियायाः अनिष्पत्तौ इति। अर्थात् यदि एकस्याः क्रियायाः सिद्धिः अन्यस्यां क्रियायां निर्भरा स्यात्, तदा क्रियायाः असिद्धिः प्रतीते सति भविष्यद् अर्थे लृङ् लकारः भवति। अयं लकारः 'यदि ऐसा होता तो मैं वैसा करता' इत्यादिषु अर्थेषु प्रयुज्यन्ते। इमानि उदाहरणानि परिशीलयन्तु–

❖ यदि प्रातः कालः अभविष्यत् तर्हि अहं देहलीम् अगमिष्यम्।



❖ यदि विद्यालये शिक्षकाः अभविष्यन् तर्हि बालाः सम्यक्तया अपठिष्यन्।

❖ यद्यहं प्रधानमंत्री अभविष्यं तर्हि राष्ट्रं सम्पन्नम् अकरिष्यम्।

❖ यदि महात्मा गान्धी अजीविष्यत् तर्हि अस्मिन् देशे रामराज्यम् अद्रक्ष्यत्।



❖ यदि आलोकः सैनिकः अभविष्यत् तर्हि देशम् अरक्षिष्यत्।



❖ यदि अहं लक्ष्मीः अभविष्यं तर्हि पृथिव्यां स्वर्णवर्षाम् अकरिष्यम्।



❖ यदि सुवृष्टिः अभविष्यत् तर्हि सुभिक्षम् अभविष्यत्।



❖ यदि मम पार्श्वे धनम् अभविष्यत् तर्हि भिक्षुकाय अदास्यम्।



❖ यदि क्रीडांगणम् अभविष्यत् तर्हि धावकः प्रतिदिनम् अधास्यत्।



❖ अत्र यदि शिक्षकः अस्थास्यत् तर्हि अहं प्रश्नम् अप्रक्ष्यम्।

**अभ्यासः–07**

**1. रिक्तस्थानं पूरयत–**

(क) यदि सूर्योदयः तर्हि पुष्पम्................................ ।
(ख) यदि क्रीडांगणम्................................तर्हि क्रीडकः.............................. ।
(ग) यदि महात्मागान्धी.......................तर्हि राष्ट्रिया एकता................. ।
(घ) यदि धनम्.................................तर्हि आपणम्................................ ।

**2. रूपं निर्मातु–**

(क) क्रीड् प्रच्छ
(ख) पठ् लिख्
(ग) गम् चल्
(घ) धाव् स्था

## 1.10. लोट् लकारः 'आज्ञार्थकः

आज्ञाप्रदाने आमन्त्रणे निमन्त्रणे च लोट् लकारस्य प्रयोगः भवति। अर्थात् यदा वक्ता आज्ञां प्रदातुम् इच्छति आमन्त्रयितुं निमन्त्रयितुं वा वांछति तदा अस्य लकारस्य प्रयोगः क्रियते। सामान्यतया अयं लकारः काम करो, गाना गाओ, कविता पढो इत्यादिषु अर्थेषु भवति। भवन्तः अधोलिखितानि उदाहरणानि परिशीलयन्तु–

❖ भोः बालक! अत्र आगच्छतु।



❖ ज्वरः अस्ति चेत् औषधिं स्वीकरोतु।



❖ पत्रालयं गत्वा पत्रं प्रेषयतु।

- पुत्र! आपणात् शाकानि आनयतु।




- प्रातः कालः संजातः मन्दिरस्य द्वारम् उद्घाटयतु।
- अल्पाहारात् पूर्वं हस्तौ प्रक्षालयतु
- अद्य गुरुपूर्णिमा, गुरुम् अर्चयतु।
- बालकाः, स्वच्छताभियाने भागं गृह्णन्तु।
- मातुः पितुः गुरोश्च सेवां करोतु।
- प्रतिदिनं क्रीडांगणं गत्वा क्रीडतु।

**अभ्यासः–08**

**1.रिक्तस्थानं पूरयतु–**

(क) मातः भोजनं...................................... । (निर्मातु, क्रीणातु, क्षिपतु)
(ख) शैत्यमस्ति, चायं.................................. । (पिबतु, खादतु, पश्यतु)
(ग) भिक्षुकाय धनं........................................ । (स्वीकरोतु, तिष्ठतु, ददातु)
(घ) लेखन्या लेखं......................................... । (पठतु, लिखतु, चलतु)

**2. निम्नलिखितानां धातूनां रूपाणि लोट्लकारे लिखन्तु–**

(क) चल्–
(ख) हस्–
(ग) दृश्–
(घ) भू –

## 1.11 लृट् लकारः भविष्यकालः

भविष्यकालस्य क्रियायाः बोधं कारयितुम् अस्य लकारस्य प्रयोगः भवति। अर्थात् या क्रिया आगामिनि काले सम्पत्स्यति, तस्याः प्रयोगार्थं लृट्लकारः प्रयुज्यते। यथा– कब जाओगे, क्या करागे, किसे मिलोगे इत्यादिवत्। अधोलिखितानि उदाहरणानि पश्यन्तु–

- भवान् ग्रामं कदा गमिष्यति?

- ततः किं किम् आनेष्यति?

- भवान् परोपकारार्थं किं किं करिष्यति?

❖ अहं विमानं/वायुयानं रचयिष्यामि।



❖ अहम् अध्यापकः भविष्यामि।



❖ श्वः छात्राः हरिद्वारतः प्रस्थास्यन्ति।



❖ अस्माकं सैनिकाः देशं रक्षयिष्यन्ति।



❖ अहं निर्धनाय धनं दास्यामि।




❖ विराट कोहली सम्यक् क्रीडिष्यति।



❖ वार्षिकोत्सवे छात्राः गीतं गास्यन्ति।

## अभ्यासः—09

**1. रिक्तस्थानं पूरयन्तु—**

(क) परिश्रमेण जीवनं सुखमयं........................................। (भविष्यति, करिष्यति, चलिष्यति)

(ख) छात्रः उद्योगं........................................। (करिष्यति, लेखिष्यति, मेलिष्यति)

(ग) भक्तः देवं.................................। (स्थास्यति, पूजयिष्यति, गमिष्यति)

(घ) अलसः कालं.............................। (रटिष्यति,यापयिष्यति, रसयिष्यति)

**2 निम्नलिखितानां सुमेलनं करोतु—**

(क) दृश् रोदिष्यति

(ख) स्था मार्जयिष्यति

(ग) मृज् स्थास्यति

(घ) रुद् द्रक्ष्यति

## 1.12 सारांशः

संस्कृते कर्त्तुः सम्बन्धः क्रियया साकं भवति। क्रिया मूलशब्दैः धातुभिः निर्मिता भवति, या कस्यचित् कालस्य विनिश्चयं कारयति। एवं प्रकारेण वक्तुं शक्यते यत् लकाराणां कालस्य च ज्ञानाय क्रिया आवश्यकी। अस्याम् अन्वितौ भवन्तः पठितवन्तः यत् संस्कृतभाषायां दश लकाराः त्रयश्च मुख्यकालाः भवन्ति। तत्र लट्लकारः वर्तमानकालार्थे, लिट्–ल–लु च भूतकालार्थे, लृट्–लुट्–लृ च भविष्यत्कालार्थे, लोट्–विधिलि् आशीर्लि च आज्ञा, विधि, निमन्त्रणम्, आमन्त्रणं, प्रार्थना, सम्प्रश्नादिषु च प्रयुज्यन्ते। भवन्तः एतद् अपि ज्ञातवन्तः यत् धातवः परस्मैपदिनः आत्मनेपदिनः उभयपदिनः च भवन्ति। धातोः स्वरूपानुगुणम् एव लकारस्य प्रयोगः क्रियते। लकारः एव कालस्य बोधकः इत्यपि तत्र भवन्तः ज्ञातवन्तः एव। लकाराणां प्रयोगार्थम् एकवचनं द्विवचनं बहुवचनं तथा प्रथमपुरुषः मध्यमपुरुषः उत्तमपुरुषः इत्येतत् व्यवस्था संस्कृतभाषायाः प्रमुखा विशिष्टता वर्तते। लकाराणां परिचयः भाषाभ्यासाय आवश्यकः इति हेतोः अस्मिन् एकके व्यावहारिकप्रयोगः चित्रप्रयोगः च कृतः।

## 1.13 अभ्यासप्रश्नानाम् उत्तराणि

**अभ्यासः 01**

**प्रश्नः01 रिक्तस्थानम्–**

1 पिबति 2 पतति 3 क्रीडति

**प्रश्नः02 एकवाक्येन उत्तरम्–**

1 गर्जति 2 पठति 3 चरन्ति 4 चालयति

**अभ्यासः02**

**प्रश्नः01 रिक्तस्थानम्–**

1 बभूव 2 पपौ 3 रचयामास

**प्रश्नः02 शुद्धाशुद्धनिर्णयः**

1 शुद्धम् 2 शुद्धम् 3 अशुद्धम् 4 अशुद्धम्

**अभ्यासः03**

**प्रश्नः01 रिक्तस्थानम्–**

1 गन्तास्मि 2 गन्ता 3 त्यजिता 4 भविता

**प्रश्नः02 सुमेलनम्–**

1 प्रस्थाता 2 गुंजितारः 3 श्रोतारः 4 प्रष्टा

**अभ्यासः04**

**प्रश्नः01 रिक्तस्थानम्–**

1 अरचयत् 2 अपतन् 3 अपिबत् 4 अवदम्

**प्रश्नः02 शुद्धाशुद्धम्–**

1 शुद्धम् 2 अशुद्धम् 3 शुद्धम् 4 अक्रीडत्

**अभ्यासः05**

**प्रश्नः01 रिक्तस्थानम्–**

1 अर्जयेत् 2 सम्पादयेयुः 3 खादेत् 4 रक्षयेयुः

**प्रश्नः02 सुमेलनम्–**

1 आचरेत् 2 पिबेत् 3 दध्यात् 4 भूयात्

**अभ्यासः06**

**प्रश्नः01 रिक्तस्थानम्–**

1 अपठीत् 2 अखादीत् 3 अतारीत् 4 अधात्

**प्रश्नः02 शुद्धाशुद्धम्–**

1 अशुद्धम् 2 शुद्धम् 3 अशुद्धम् 4 शुद्धम्

**अभ्यासः07**

**प्रश्नः01 रिक्तस्थानम्–**

1 अभविष्यत् विकसिस्यत् 2 अभविष्यत् अक्रीडिस्यत्
3 अजीविस्यत् अभविष्यत् 4 अभविष्यत् अगमिष्यम्

**प्रश्नः02 रूपाणि निर्मातु–**

1 क्रीड्–अक्रीडिस्यत् 2 प्रच्छ्–अप्रक्ष्यत 3 पठ्–अपठिष्यत्4 लिख्–अलेखिष्यत्

**अभ्यासः08**

**प्रश्नः01 रिक्तस्थानम्–**

1 निर्मातु 2 पिबतु 3 ददातु 4 लिखतु

**प्रश्नः02 रूपाणि निर्मातु–प्रथमपुरुषे**

1 चल्–चलतु चलताम् चलन्तु2 हस्–हसतु हसताम् हसन्तु 3 दृश्–पश्यतु पश्यताम् पश्यन्तु

**अभ्यासः09**

**प्रश्नः01 रिक्तस्थानम्–**

1 भविष्यति 2 करिष्यति 3 पूजयिष्यति 4 यापयिष्यति

**प्रश्नः02 सुमेलनम्–**

1 दृश्–द्रक्ष्यति 2 स्था–स्थास्यति 3 मृज्–मार्जयिष्यति 4 रुद्–रोदिष्यति

## 1.14 संदर्भग्रन्थसूची

1 बृहद् धातुकुसुमाकरः, प. हरेकान्तमिश्रः, प्रकाशकः चौखम्बा संस्कृत प्रतिष्ठान, 38 यू. ए. जवाहर नगर, बंगलो रोड, नई दिल्ली–01123856391,41530902.

2 प्रौढ रचनानुवादकौमुदी, डा. कपिलदेव द्विवेदी, प्रकाशक विश्वविद्यालय प्रकाशन, चौक, वाराणसी–221001.

3 अभ्यासदर्शिनी, जनार्दन हेगडे, प्रकाशकः संस्कृत भारती, अक्षरम्, 8 उपमार्गः 2 घट्टः, गिरिनगरम्, बेंगलूरू–560085

## 1.15 सहायकोपयोगि–पाठ्यसामग्री

1 प्रौढ रचनानुवादकौमुदी
2 अभ्यासदर्शिनी

## 1.16 निबन्धात्मकप्रश्नाः

अस्मिन् एकके वयं लकाराणां कालस्य च विषये परिचयात्मकं ज्ञानं प्राप्तवन्तः। एतदाधारेण निम्नलिखितानां प्रश्नानाम् उत्तराणि विशदतया प्रयच्छत–

प्रश्नः 01 संस्कृते कति लकाराः सन्ति, तेषां प्रयोगश्च कथं क्रियते?

प्रश्नः 02 पठ् धातोः रूपाणि पंच लकारेषु लिखत।

प्रश्नः 03 लृट् लकारस्य सहायतया भवान् किं किं करिष्यति इति लिखत।

प्रश्नः 04 लकाराणां सूत्राणि विलिख्य तेषां व्याख्यानं कुरुत।

# द्वितीय इकाई –. समासपरिचयः

2.1 प्रस्तावना
2.2 उद्देश्यानि
2.3 समासः
2.4 समासस्य भेदाः
2.4.1 केवलसमासः
2.4.2 विशेषसमासः
2.4.2.1तत्पुरुषसमासः चतुर्विधः भवति
2.4.2.2 बहुव्रीहिसमासः द्विविधः
2.4.2.3 द्वन्द्वसमासः द्विविधः
2.4.2.4 अव्ययीभावसमासः
2.5 तत्पुरुषसमासः
2.5.1 सामान्यः तत्पुरुषसमासः
2.5.2 कर्मधारयः
2.5.3 द्विगुः समासः
2.6 बहुब्रीहिसमासः
2.7. द्वन्द्व समासः
2.7.1. इतरेतरद्वन्द्वसमासः
2.7.2. समाहार द्वन्द्वसमासः
2.8. अव्ययीभावसमासः
2.9 सारांशः
2.10. अभ्यासप्रश्नानाम् उत्तराणि
2.11. सन्दर्भग्रन्थसूची
2.12. सहायकोपयोगि–पाठ्यसामग्री
2.13. निबन्धात्मकप्रश्नाः

## 2.1 प्रस्तावना

विश्वस्य भाषासु संस्कृतभाषा व्याकरणप्रधाना भाषा। इयम् अन्यासां भाषाणाम् अपेक्षया संश्लिष्टा भाषा अपि वर्तते। अत्र प्रकृतिप्रत्ययादिभिः निर्मितानि पदानि परस्परं संयुक्तानि भवन्ति। सूत्रप्रणाली अस्याः भाषायाः विशिष्टा काचित् प्रक्रिया विद्यते यया बहूनाम् अक्षराणां पदानां वा एकपदीकरणं भवति। बहूनां पदानाम् एकपदीकरणस्य प्रक्रिया समासः इति उच्यते समासस्य प्रक्रियायां द्वयोः शब्दयोः द्वयधिकानां वा शब्दानाम् एकपदीकरणं क्रियते। अस्याम् अन्वितौ वयं समासः, विग्रहः, समासस्य भेदाः, समस्तपदस्य अर्थः इत्यादीनां विषये पठिष्यामः।

## 2.2 उद्देश्यानि

**अस्य एककस्य पठनात् परं भवन्तः ज्ञास्यन्ति यत्–**

1. संस्कृते समासः कः, कश्च तस्य अर्थः ?
2. समस्तपदानि कथं निर्मीयन्ते विग्रहश्च कथं क्रियते?
3. समासस्य कति भेदाः के च ते ?
4. व्यावहारिकरूपेण समासस्य कथं प्रयोगः क्रियते ?
5. समासस्य उपयोगिता का ?

## 2.3 समासः

### अर्थः

'समसनं समासः' अनेकपदस्य एकपदीभवनं समासः इति। यथा–रमायाः पतिः=रमापतिः। समासः द्वयोः द्वयधिकानां वा सुबन्तानां मध्यें भवति। एषः तिङन्तेषुअर्थात् क्रियासु न सम्भवति। समासार्थम् एतत् आवश्यकं वर्तते यत् सुबन्तौ परस्परं सम्बन्धितौ भवेताम् इति। यथा–राज्ञः पुत्रः=राजपुत्रः। उपर्युक्तयोः द्वयोः पदयोः परस्परम् अन्वयः न भवति तत्र समासः न भवति। यथा–भवति दर्शनं राज्ञः। अत्र राज्ञः दर्शने अन्वयः। अतः अत्र राजशब्दस्य दर्शनशब्दस्य परस्परम् अन्वयाभावात् न समासः। समासे यत् पदं पूर्वत्र श्रूयते तत् पूर्वपदमिति उत्तरत्र यत् पदं श्रूयते तत् उत्तरपदमिति । यथा–रामस्य राज्यम्=रामराज्यम्। अत्र 'राम' इति पूर्वपदम्। 'राज्यम्' इति उत्तरपदम्। वृत्त्यर्थम् अवबोधं वाक्यं विग्रहः। वृत्तिः=समासादिः। समासादीनाम् अर्थं बोधयितुं यद् वाक्यम् उच्यते तद् वाक्यं विग्रहः इति। यथा–'वृक्षमूलम्' इति समासः। 'वृक्षस्य मूलम्' इति विग्रहः।

अर्थात् अनेक पदों या शब्दों के परस्पर मिल जाने से जो एक पद बन जाता है, उसे समास कहते है। जैसे– राम का राज्य=रामराज्य।

## 2.4 समासस्य भेदाः

समासः द्विविधः। केवलसमासः विशेषसमासश्च

मुख्य रूप से समासों के दो भेद किये जा सकते हैं–

1.केवल समास

2.विशेष समास

### 2.4.1 केवलसमासः

तत्पुरुषादिसंज्ञाविनिर्मुक्तः समाससंज्ञामात्रयुक्तः केवल समासः।

यथा – पूर्वं भूतः = भूतपूर्वः

अस्य समासस्य विस्तरो नास्ति। अगतिकगतौ अयं केवलसमासः आश्रीयते। अयम् एव समासः 'सुप्सुपा समासः' इति व्याख्यानेषुलिख्यते । 'सहसुपा' (2.1.4) इतिसूत्रेण विहितः समासः इति तस्य तात्पर्यम्।

## 2.4.2 विशेषसमासः

विशेषसमासः चतुर्विधः भवति–

1. तत्पुरुषसमासः
2. बहुव्रीहिसमासः
3. द्वन्दसमासः
4. अव्ययीभावसमासः

### 2.4.2.1तत्पुरुषसमासः चतुर्विधः भवति

1. समान्यतत्पुरुषः
2. कर्मधारयः
3. द्विगुः
4. नञ्प्रभृतयः

### 2.4.2.2 बहुव्रीहिसमासः द्विविधः

1. समान्यः
2. विशेषः

### 2.4.2.3 द्वन्द्वसमासः द्विविधः

1. इतरेतरः
2. समाहारः

### 2.4.2.4 अव्ययीभावसमासः

अव्ययीभावसमासः प्रायः त्रयस्त्रिंशत् प्रकारकः, प्रसिद्धाः द्वादश सन्ति।

## 2.5 तत्पुरुषसमासः

प्रायः उत्तरपदार्थप्रधानः तत्पुरुषः।

यथा– कर्मकुशलः

'कर्मकुशलम् आह्वयतु' इत्यत्र उत्तरपदस्य कुशलपदस्य अर्थः आह्वानक्रियया सम्बद्धः भवति, न तु पूर्वपदस्य अर्थः। अतः अत्र तत्पुरुषसमासः इति मन्तव्यम्।

### 2.5.1 सामान्यः तत्पुरुषसमासः

अधोलिखितानि वाक्यानि तदन्तर्गतानि रेखांकितपदाानि च पठत –

- ❖ अर्धग्रामः सुशोभनः।
- ❖ एषः कूपपतितः मण्डूकः।



- ❖ प्रह्लादः हरित्रातः अस्ति।
- ❖ सर्वैः गोहितम् आचरणीयम्





- ❖ रात्रौ चोरभयं भवति।



- ❖ सर्वं वृक्षमूलम् औषधियुतं भवति।

- ❖ सुरेशः कार्यकुशलः अस्ति।

**उपर्युक्तानां रेखांकितपदानां विग्रहं पश्यत।**

| | | |
|---|---|---|
| अर्धं ग्रामस्य | = | अर्धग्रामः |
| कूपं पतितः | = | कूपपतितः |
| हरिणा. त्रातः | = | हरित्रातः |
| गवे हितम् | = | गोहितम् |
| चोरात् भयम् | = | चोर भयम् |
| वृक्षस्य मूलम् | = | वृक्षमूलम् |
| कार्ये कुशलः | = | कार्यकुशलः |

**अवधेयम्** = सामान्यतत्पुरुषसमासः प्रथमा–द्वितीयादिषु विभक्तिषु भवति। अतः एतस्य सप्त भेदाः सन्ति।

## 2.5.2 कर्मधारयः

अधोलिखितानि वाक्यानि पठत–

- ❖ आकाशे नीलमेघः दृश्यते।
- ❖ रमेशः वैयाकरणखसूचिः अस्ति।
- ❖ शीतोष्णम् जलं मुखप्रक्षालनार्थं सम्यक् भवति।
- ❖ करुणेशः मेघश्यामः दृश्यते।
- ❖ जितेन्द्रः नरव्याघ्रः अस्ति।
- ❖ विद्याधनं सर्वधनप्रधानम्।



- ❖ आम्रवृक्षः प्राणवायुकारकः भवति।

❖ द्विशतंरूप्यकाणि मह्यं पर्याप्तानि।




❖ अमेरिका भारतात् देशान्तरं वर्तते।



**उपरि लिखितानां रेखांकितपदानां विग्रहं परिशीलयत–**

| | | |
|---|---|---|
| नीलो मेघः | = | नीलमेघः |
| वैयाकरणः खसूचिः | = | वैयाकरणखसूचिः |
| शीतम् उष्णम् | = | शीतोष्णम् |
| मेघ इव श्यामः | = | मेघश्यामः |
| नरः व्याघ्रः इव | = | नरव्याघ्रः |
| विद्या एव धनम् | = | विद्याधनम् |
| आम्रः इति वृक्षः | = | आम्रवृक्षः |
| द्विगुणितं शतम् | = | द्विशतम् |
| अन्यो देशः | = | देशान्तरम् |

अवधेयम्–कर्मधारयसमासः समान विभक्त्यन्तयोः पदयोः एव भवति इति अस्य सामान्यं लक्षणम्। अतः कर्मधारयसमासस्य सर्वेषु भेदेषु इदं सामान्यं लक्षणम् अनुवर्तते। एतस्य नव भेदाः सन्ति येषाम् उदाहरणानि क्रमशः उपरि प्रदत्तानि।

### 2.5.3 द्विगुः समासः

अधोलिखितानि वाक्यानि तदङ्गतया रेखांकितानि च पदानि पश्यत–

❖ भगवान् विष्णुः त्रिलोकी अस्ति।
❖ कार्तिकेयः षाण्मातुरः इति प्रसिद्धिः।
❖ रमेशः पंचगवधनः अस्ति।

**उपर्युक्तानां रेखांकितपदानां विग्रहं पश्यत–**

| | | |
|---|---|---|
| त्रयाणां लोकानां समाहारः | = | त्रिलोकी |
| षष्णां मातृणाम् अपत्यम् | = | षाण्मातुरः |
| पंचगावः धनं यस्य सः | = | पंचगवधनः |

अधोनिर्दिष्टानि वाक्यानि रेखांकितपदानि च परिशीलयत–

❖ अधर्मः पापाय धर्मश्च पुण्याय भवति।
❖ कुपुरुषः देवं न मन्यते।



❖ वस्त्राणि शुक्लीकृत्य धरणीयानि।

❖ प्राचार्यः महाविद्यालये प्रमुखः भवति।

❖ कुम्भकारः घटनिर्माणे दक्षः भवति।



**उपरिप्रदत्तानां रेखांकितपदानां विग्रहं पश्यत।**

| | | |
|---|---|---|
| न धर्मः | = | अधर्म |
| कुत्सितः पुरुषः | = | कुपुरुषः |
| अशुक्लं शुक्लं कृत्वा | = | शुक्लीकृत्य |
| प्रगतः आचार्यः | = | प्राचार्यः |
| कुम्भं करोति इति | = | कुम्भकारः |

**अवधेयम् –**

नञ् प्रभृतयः पंच समासाः सन्ति। तत्र नञ्समासः कुसमासः, गतिसमासः, प्रादिसमासः, उपपदसमासश्चेति एते पंच समासाः परिगण्यन्ते। उपर्युक्तानि रेखांकितपदानि क्रमशः एकैकस्य उदाहरणानि सन्ति।

**अभ्यासः–1**

अद्यः समस्तपदानि प्रदत्तनि, तत्पुरतः विग्रहं कृत्वा समासस्य नामोलेखं कुरुत–

| यथा– | समस्तपदम् | विग्रहः | समासभेदः |
|---|---|---|---|
| | अपरगृहम् | अपरं गृहस्यं | तत्पुरुषसमास |
| | 1. ग्रामगतः | ................... | ................... |
| | 2. पितृसमः | .................. | ................... |
| | 3. यूपदारू | .................... | ................... |
| | 4. व्याघ्रभीतः | ................... | ................... |
| | 5. देवपूजकः | ................... | ................... |
| | 6. वेदपण्डितः | ................... | ................... |
| | 7. उत्तमपुरुषः | ................... | ................... |
| | 8. कृताकृतम् | ................... | ................... |
| | 9. शैलोन्नतः | ................... | ................... |
| | 10. मुखकमलम् | ................... | ................... |

**2 अधः विग्रहवाक्यानि प्रदत्तानि तत्पुरूतः समस्तपदं तत्भेदं च लिखत–**

| यथा– | विग्रहवाक्यम् | समस्तपदम् | समासभेदः |
|---|---|---|---|
| | गुरुः एव देवः | गुरुदेवः | कर्मधारयसमासः |
| 1. | हिमालय इति पर्वतः | ................... | ................... |

2. त्रिगुणितं शतम् .................. ..................
3. द्वयोः मात्रोः अपत्यम् .................. ..................
4. पंचानां पात्राणां समाहारः .................. ..................
5. दश गावः धनं यस्य सः .................. ..................
6. न विहनः .................. ..................
7. अकृष्णं कृष्णं कृत्वा .................. ..................

## 2.6 बहुब्रीहिसमासः

अधोलिखितानि उदाहरणानि रेखांकितपदानि च परिशीलयत्–

❖ प्राप्तोदकः कृषिप्रधानः भवति ।

❖ पीतक्षीरः मातुः अंके अस्ति।

❖ दत्तपशुः शिवस्य अपरं नाम अस्ति।





❖ उद्धृतजलः मधुरजलस्य स्त्रोतः भवति।




❖ लक्ष्म्याः पतिः पीताम्बरः अस्ति।



❖ बहुफलः परोपकाराय भवति। (पेड़–फलदार पेड़ का चित्र)

**उपर्युक्तानां रेखांकितपदानां विग्रहं पश्यतः।**

| | | |
|---|---|---|
| प्राप्तम् उदकं यं सः | – प्राप्तोदकः | (ग्रामः) |
| पीतं क्षीरं येन सः | – पीतक्षीरः | (बालः) |
| दत्तः पशुः यस्मै सः | – दत्तपशुः | (रूद्रः) |
| पीतम् अम्बरं यस्य सः | – पीताम्बरः | (विष्णुः) |
| बहूनि फलानि यस्मिन् सः | – बहुफलः | (वृक्ष) |

अवधेयम् – 'प्रायः अन्यपदार्थप्रधानः' बहुव्रीहिसमासः भवति। 'यस्य येसां' बहुव्रीहिः इत्यादि सामान्यं लक्षणम्। अर्थात् यदा अन्यपदं समासघटकं पदं क्रियया साकं सम्बन्धितः भवति तदा बहुव्रीहिःसमास मन्तव्यः। यथा–पीतक्षीरः (बालः) गच्छति। इत्यत्र पीतयदस्य क्षीरपदस्य च अर्थः (गच्छति) गमनक्रियया सम्बन्धितः नस्ति। किन्तु समासघटकस्य बालपदस्य अर्थः सम्बन्धितः भवति। अतः अत्र बहुव्रीहिः।

समानाधिकरण–बहुव्रीहिः एव समान्यवहुव्रीहिः। अस्मिन् समासे षट् भेदाः गणिताः। तत्र विग्रहे पदद्वयम् अपि प्रथमाविभक्त्यन्तं भवति। किन्तु अन्य पदस्य बोधकं यद् इति पदं यादृशविभक्त्यन्तं भवति तद् विभक्तिनाम्ना एव व्यवहारः क्रियते। यथा पीतम् अम्बरं यस्य सः पीताम्बरं। पीतं तथा अम्बरम् इति पदद्वयमपि प्रथमान्तम्। अन्य पदार्थस्य बोधकं यद् पदं षष्ठ्यन्तम्। अतः अत्र षष्ठ्पन्तबहुव्रीहिः इति कथ्यते।

अधोलिखितानि उदाहरणानि परिशीलयतः

- चक्रंपाणौ यस्य सः चक्रपाणिः (विष्णुः)
- अविद्यमानः चश्रुः यस्याः सा – अपुत्रा (महिला)
- निर्गता कृपा यस्मात् सः – निश्कृपः (पुरुष)
- गजाननमित्र आननं यस्य सः – गजाननः (गणेशः)
- विंशतेः समीपे ये सन्ति ते – उपविंशाः (19)
- त्रयः वा चत्वारः वा – त्रिचतुराः(3–4)
- पुत्रेण सः वर्तते इति – सपुत्रः
- केशेषु केशेषु गृहीत्वा इदं युदं प्रवृत्तम् –केशाकेशि

इमानि बहुव्रीहि समासे अन्तर्भूतानि कानिचम् विशिष्टानि उदाहरणानि सन्ति। अतः एवे विशेष बहुव्रीहिः इत्यापि उच्यनते।

<u>अभ्यासः–02</u>

**1. निम्नलिखितानां समस्तपदानां विग्रहं कृत्वा तन्नाम लिखत**

| | | |
|---|---|---|
| यथा – समस्तपदम्, | विग्रहः, | नाम |
| कृतभोजनः | कृतं भोजनं येव सः | तृतीयार्थबहुव्रीहिः |

(क) पतितपर्णः
(ख) ऊढरथः
(ग) रूपवद्भार्यः
(घ) प्रविष्टशालः
(ङ) उपदशाः

**1. अधः प्रदत्तानां विग्रहवाक्यानां कृते समस्तपदं लिखत–**

यथा– चन्द्रः भौलो यस्य सः चन्द्रमौलिः
(क) गदा पाणौ यस्य सः..............................................
(ख) कुटुम्बेन सह वर्तते इति.................................
(ग) पीतं जलं येन सः ....................................................
(घ) ऊष्ट्रमुखं इव मुखं यस्य सः .......................................
(ड़) शोभनः गन्धः यस्य सः ......................................................

## 2.7. द्वन्द्व समासः

उभयपदार्थप्रधानः समासः द्वन्द्वसमासः भवति। एतस्य द्वौ भेदौ। इतरेतरद्वन्द्वः समाहारद्वन्द्वश्च।

**2.7.1. इतरेतरद्वन्द्वसमासः –**

**अधोलिखितानि वाक्यानि रेखांकितपदानि च परिशीलयत–**

❖ रामकृष्णौ विद्यालयं गच्छतः।



❖ मातापितरौ सर्वदा पूज्यौ।



❖ शिवकेशवौ प्रधानदेवौ।

❖ युधिष्ठिरार्जुनौ द्वावपि पाण्डवौ।

❖ इन्द्राग्नी परस्परं सम्बन्धितौ।

❖ रामलक्ष्मणौ वनं गतवन्तौ।

❖ कृतिकारोहिण्यौ क्रमशः आगच्छतः।

❖ हरिहरमुखः अशीर्वादं प्रयच्छन्ति।

**उपरि लिखितानां रेखाकिंत वाक्यानां विग्रहं पश्यत्–**

❖ रामश्च कृष्णश्च – रामकृष्णौ
❖ माता च पिता च – मातापितरौ
❖ शिवश्च केशवश्च – शिवकेशवौ
❖ युधिष्ठिरश्च अर्जुनश्च – युधिष्ठिरार्जुनौ
❖ इन्द्रश्च अग्निश्च – इन्द्राग्नी
❖ रामश्च लक्ष्मणश्च – रामलक्ष्मणौ
❖ कृत्तिका च रोहिणी च – कृत्तिकारोहिण्यौ
❖ हरिश्च हरश्च गूरुश्च – हरिहरगुरवः

**अवधेयम्**—इतरेतर द्वन्द्वसमासेः द्वयोः पदयोः बहूनां च पदानां मध्ये भवति। एषः द्विवचनान्तः बहुवचनान्तश्च भवितुम् अर्हति।

**2.7.2. समाहार द्वन्द्वसमासः—**

**अधोनिर्दिष्टानि रेखांकितपदानि वाकयानि च परिशीलयत—**



- ❖ भोजनातपूर्वं पाणिपादं प्रक्षालनीयम्।



- ❖ विरोधर्थमं अहिनकुलंम अतीण प्रसिद्वम्।



- ❖ आश्रमेषु गोव्याघ्रं मिलित्वा चरति।

 

- ❖ गवाश्वं कृषिकार्ये महत्वपूर्णम् अस्ति।
- ❖ पुत्रपौत्रं कुषवृद्धयर्थम् आवश्यकम्।

**उपरि लिखितानां रेखांकित पदानां विग्रहं पश्यत—**

- ❖ पाणी च पादौ च एतेषां समाहारः — पाणिपादम्
- ❖ अहिश्च नकुलश्च अनयोः समाहारः — अहिनकुलम्
- ❖ गावश्च अश्वाश्च एतेषां समाहारः — गवाश्वम्
- ❖ गौश्च व्याघ्रश्च अनयोः समाहारः — गोव्याघ्रम्
- ❖ पुत्रश्च पौत्रश्च अनयोः समाहारः — पुत्रपौत्रम्

**अभ्यासः—03**

**1. निम्नलिखितानां समस्तपदानां विग्रहं विधाय नामोल्लेखम् अपि कुरुत—**

यथा— लवकुशौ, लवश्च कुशश्च इतरेतरद्वन्द्व समासः

1. देहलीवाराणस्यौ ..............................................
2. हरिद्वारप्रयागो ............................................
3. भागिनेयमातुलौ ..............................................
4. रसालबीजपूरकदाडिमाः ..............................................

5. संज्ञापरिभाषम ..........................................
6. घटपटम् ..........................................
7. माघकालिदासौ ..........................................
8. बालकाः ..........................................
9. **2. अधोलिखितानि वाकयानि पठित्वा तत्र निहितानां समस्तपदानां निर्धारणं कुरुत—**

यथा – रोहितश्च मोहितश्च कार्यालयं गच्छतः। रोहितश्च मोहितश्च

1. बद्रीनाथश्च केदारनाथश्च सवर्दा पूज्यौ ..........................................
2. माता च दुहिता च शाकापणं गच्छतः ..........................................
3. पिता च पितृव्यश्च शीतलपेयं पिबतः ..........................................
4. मक्रटश्च वानरश्च मैत्रीं कुरुतः ..........................................
5. गंगा च यमुना च सदानारे नधौ ..........................................

## 2.8. अव्ययीभावसमासः

प्रायः पूर्वपदार्थप्रधानः अव्ययीभावः। अर्थात् पूर्वपदस्य अर्थस्य प्रधानतायां सत्याम् अव्ययीभावः समासः भवति। यथा—उपवृक्षम्। वृक्षस्य समीपम् इति विग्रहः। अत्र 'उप' इति पूर्वपदस्य समीपार्थकस्य प्रधानता वर्तते।

अधोलिखितानि वाक्यानि तदन्तर्गतानि रेखांकितपदानि च अवलोकयत—

- अधिहरि मम मनः रमते।



- गावः उपकृष्णं चरन्ति।



- समुद्रं सर्वत्र प्रथितम्।



- मम गृहे निर्मक्षिकम् अस्ति।
- सम्प्रति पर्वतेषु अतिहिमम् अवलोक्यते।

- ❖ वृद्धश्च अतिनिद्रं भवति।

- ❖ इन्द्रः अनुविष्णु आगच्छति।

- ❖ परोपकारः सदाचारिणाम् अनुरूपं भवति।




- ❖ विष्णुः सचक्रं दृश्यते।

- ❖ ब्रह्मकमलं सकमलं दृष्यते।

उपर्युक्तानां रेखांकित पदानां विग्रह व पश्चत

- ❖ हरौ इति – अधिहरि
- ❖ कृष्णस्य समीपम् – उपकृष्णम्
- ❖ मद्राणां समृद्धि – समुद्रम् (मद्रासजनानाम् इति)
- ❖ मक्षिकाणाम् अभावः – निर्माक्षिकम्
- ❖ हिमस्य अत्ययः – अतिहिमम्
- ❖ निद्रा सम्प्रति न पुज्यते – अतिनिद्रम्
- ❖ विष्णोः पश्चात् – अनुविष्णु
- ❖ रूपस्य योग्यम् अनुरूपम्
- ❖ चक्रेण युगपत् – सवचम
- ❖ कमलेन सदृशम् – सकमलम्

अवधेयम् –विभक्तिषु विद्यमानस्य अन्ययस्य सुबन्तैः साकं समासः भवति। भवययीभावसमासः अन्ययम् एवं भवति। एषः समासः विभक्ति समीप समृद्धि–अर्थाभाव–अन्यय–असम्प्रति शब्दप्रादुर्भाव–पश्चाद्7यथा–आनुपूर्ज्य–युगपत्–सादृश्य–सम्प्रति–साकल्य अन्तव्यचनेषु च सम्पन्नः भवति। अतः एतेषाम् अर्थाः अपि अवश्यम् अवगन्तव्याः।

अभ्यासः – 4

**1.निम्नलिखितानां समस्तपदानां विग्रहं कूरुत–**

यथा – अध्यात्मम् – आत्मनि इति

(क) उपगंगम्..........................................

(ख) निर्जलम् ..........................................

(ग) अतिरमणम् ..........................................

(घ) यथाशक्ति ..........................................

(ङ) सत्रिशूलम् ..........................................

**2.निम्नलिखितानां विग्रहवाक्यानां कृते समस्तपदं लिखत–**

यथा– अर्थम् अर्थं प्रति – प्रत्यर्थम्

1. दिनं दिनं प्रति ..........................................
2. जलस्य अत्ययः ..........................................
3. कृष्णस्य पश्चात् ..........................................
4. गुरोः समीपम् ..........................................
5. शङ्.खेन युगपत् ..........................................

**3.अधोलिखिनानां समस्तपदानां विग्रहं कृत्वा वाक्यप्रयोगं कुरुत–**

यथा– उपवनम् – वनस्य समीपम्

उपवने गावं चरन्ति।

(क) अधिमंचम्

(ख) अतितन्द्रम्

(ग) अनुकृष्णम्

(घ) निर्धनम्

(ङ) पारेगंगम्

## 2.9 सारांशः

समसनं समासः। बहूनां पदानाम् एकपदीकरणं समासः इति परिभाषया सिद्धयति यत् भाषायां समासस्य महत्त्पूर्णं स्थानं वर्तते। वृत्यर्थम् अवबोधकं वाक्यं विग्रहः। एवं प्रकारेण समासः समासविग्रहः च एका मिश्रितप्रक्रिया वर्तते या सहैव प्रचलति। अस्मिन् एकके भवन्तः ज्ञातवन्तः यत् संस्कृते मुख्यतया तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः अव्ययीभावश्च चत्वारः समासाः सन्ति। तत्र तत्पुरुषः अपि सामान्यः, कर्मधारयः, द्विगुः, नञ्प्रभृतयः इत्येवं प्रकारेण चतुर्विधः। द्वन्द्वसमासः द्विविधः इतरेतरः समाहारश्च। प्रायः उत्तरपदार्थप्रधानः तत्पुरुषः। यथा राजपुत्रः पीताम्बरः। प्रायः अन्यपदार्थप्रधानः समासः बहुव्रीहिः भवति। यथा–पिताम्बरः। प्रायः उभयपदार्थप्रधानः द्वन्द्वः समासः। यथा–रामकृष्णौ। तथा प्रायः पूर्वपदार्थप्रधानः अव्ययीभावसमासः यथा–प्रतिगृहम्। अव्ययीभावसमासे अव्ययानाम् एव बहुलता, एतस्मात् अयं समासः अव्ययीभावसमासः इति। समासेषु वैविध्यं दृश्यते। किन्तु भाषायां सौष्ठवता सम्पादनाय, काव्यप्रणयनाय, निबन्धरचनाय च समासस्य ज्ञानम् आवश्यकम्।

## 2.10. अभ्यासप्रश्नानाम् उत्तराणि

**अभ्यासः 01**

**प्रश्नः01 समासविग्रहः**

| | | | |
|---|---|---|---|
| 1 ग्रामं गतः | 2 पित्रा समः | 3 यूपाय दारु | 4 व्याघ्रात् भीतः |
| 5 देवस्य पूजकः | 6 वेदे पण्डितः | 7 उत्तमः पुरुषः | 8 कृतम् अकृतम् |
| 9 शैलः इव उन्नतः | 10 मुखं कमलम् इव | | |

**प्रश्नः02 समस्तपदानि–**

1 हिमालयपर्वतः 2 त्रिशतम् 3 द्विमातुरः 4 पंचपात्रम् 5 दशगवधनः 6 अविघ्नः 7 कृष्णीकृत्य

**अभ्यासः 02**

**प्रश्नः01 समासविग्रहः**

1 पतितानि पर्णानि यस्मात् सः 2 ऊढः रथः येन सः 3 रूपवती भार्या यस्य सः4 प्रविष्टा शाला येन सः 5 दशानां समीपे ये सन्ति ते

**प्रश्नः02 समस्तपदानि–**

1 गदापाणिः 2 सकुटुम्बः 3 पीतजलः4 उष्ट्रमुखम् इव मुखं यस्य सः 5 सुगन्धिः

**अभ्यासः 03**

**प्रश्नः01 समासविग्रहः**

1 देहली च वाराणसी च 2 हरिद्वारं च प्रयागश्च 3 भागिनेयश्च मातुलश्च
4 रसालश्च बीजपूरकश्च दाडिमश्च 5 संज्ञाश्च परिभाषाश्च एतासां समाहारः6 घटश्च पटश्च अनयोः समाहारः 7 माघश्च कालिदासश्च 8 बालकश्च बालकश्च बालकश्च

**प्रश्नः02 समस्तपदानि**

1 बद्रीनाथकेदारनाथौ 2 मातादुहितरौ 3 पितापितृव्यौ 4 मर्कटवानरौ 5 गंगायमुने

**अभ्यासः 04**

**प्रश्नः01 समासविग्रहः**

1 गंगायाः समीपम्2 जलस्य अभावः3 रमणं सम्प्रति न युज्यते इति 4 शक्तिम् अनतिक्रम्य 5 त्रिशूलेन युगपत्

**प्रश्नः02 समस्तपदानि–**

1 प्रतिदिनम् 2 अतिजलम् 3 अनुकृष्णम् 4 उपगुरुम् 5 सशंखम्

**प्रश्नः03 वाक्यप्रयोगः**

1 अधिमंचे अतिथयः विराजमानाः सन्ति। 2 वृद्धस्य अतिनिद्रं भवति। 3 सुभद्रा अनुकृष्णं विद्यते। 4 निर्धनं राज्यं न शोभते। 5 वाराणसी पारेगंगं वर्तते।

## 2.11. सन्दर्भग्रन्थसूची

1. समासः, व्याख्याकारः जि0 महाबलेश्वरभट्टः, प्रकाशकः संस्कृत भारती, 'अक्षरम्' 8 उपमार्गः 2 घट्टः, गिरिनगरम्, बेंगलूरू–560085

2. प्रौढ रचनानुवादकौमुदी, डा. कपिलदेव द्विवेदी, प्रकाशक विश्वविद्यालय प्रकाशन, चौक, वाराणसी–2210013.

3. शुद्धिकौमुदी, जनार्दन हेगड़े, प्रकाशकः संस्कृत भारती 'अक्षरम्' 8 उपमार्गः 2 घट्टः, गिरिनगरम्, बेंगलूरू–560085

## 2.12. सहायकोपयोगि–पाठ्यसामग्री

1. समासः जि0 महाबलेश्वर भट्टः
2. शुद्धिकौमुदी जनार्दन हेगडे

(उपर्युक्तयोः ग्रन्थयोः संकेतः सन्दर्भग्रन्थसूची इत्यत्र कृतः अस्ति)

# तृतीय इकाई : कारकपरिचयः

3.1 प्रस्तावना
3.2 उद्देश्यानि
3.3. कारकाणां परिचयः
3.3.1. कर्तृकारकम् (प्रथमाविभक्तिः)
3.3.2. कर्मकारकम् (द्वितीया विभक्तिः)
3.3.3. करणकारकम् तृतीया विभक्तिः
3.3.4. सम्प्रदानकारकम् चतुर्थी विभक्तिः
3.3.5. अपादानकारकम् (पंचमी विभक्तिः)
3.3.6. सम्बन्धः (षष्ठीविभक्तिः)
3.3.7. अधिकरणकारकम् (सप्तमीविभक्तिः...
3.4. सारांशः
3.5. अभ्यासप्रश्नानाम् उत्तराणि
3.6. सन्दर्भग्रन्थ सूची
3.7. सहायकोपयोगी–पाठ्यसामग्री
3.8. निबन्धात्मकप्रश्नाः

## 3.1 प्रस्तावना

संस्कृत व्याकरणे वाक्यविन्यासस्य सन्दर्भ केवलं कारकप्रकरणस्य एव पृथग् चर्चा अभवत्। कारक शब्दः कृ+ण्वुल् प्रत्ययात् कर्त्तृ–अर्थे निष्पन्नः। यस्यार्थः भवति क्रियावान् इति। 'करोतीति कारकम्' तथा 'क्रियाजनकत्वं कारकत्वम्' इति एतेभ्याम् अपि ज्ञायते यत् येन वस्तुना पदार्थेन वा काचित् क्रिया भवेत्, क्रियायाः सम्पादने च यस्य योगः भवेत् तत् कारकम् इति। एवमपि वक्तुं शक्यते यत् क्रियया साक्षात् सम्बद्धं तथा क्रियया साकं यस्य साक्षात् अन्वयः भवेत् तत् कारकम् इति कथ्यते। संस्कृते कर्ता–कर्म–करणम्–सम्प्रदानम्–अपादानम्–अधिकरणं चेति कारकाणि षट् वर्तन्ते। इदमत्र अवधेयं यत् 'सम्बन्धस्य कारकसंज्ञा' नास्ति। कर्ता–कर्म–करण–सम्प्रदान–अपादान–अधिकरण इत्यादिषु कारकेषु क्रमशः प्रथमा–द्वितीया–तृतीया–चतुर्थी–पञचमीं–सप्तमी इत्यादयः विभक्तयः भवन्ति। सम्बन्धे षष्ठी विभक्तिः भवति। एवमेव सम्बोधाने अपि प्रथमा विभक्तिः जायते। एवम्प्रकारेण यद्यपि व्यवहारे सप्त विभक्तयः दृश्यन्ते किन्तु कारकाणि तु षट् एव भवन्ति।

## 3.2 उद्देश्यानि

अस्य एककस्य अध्ययनात् परं भवन्तः एतद् ज्ञास्यन्ति यत्–

- कारकाणि रति सन्ति।
- कारकाणां प्रयोगः कथं क्रियते।
- लोकव्यवहारे समागतशब्दानां प्रयोगः कथं क्रियते।
- कारकाणां प्रयोगः सूत्रानुसारी कथं भवति।

## 3.3. कारकाणां परिचयः

### 3.3.1. कर्तृकारकम् – (प्रथमाविभक्तिः)

अधोलिखितानि वाक्यानि परिशीलयत–

1. बालकः खादति।



2. छात्रौ पठतः।

3. क्रीडकाः क्रीडन्ति।



4. सूर्यः प्रकाशते।

5. पुष्पाणि विकसन्ति।





6. यानानि प्रचलन्ति।

7. अहं पिबामि।

**उपर्युक्तेषु वाक्येषु स्वतन्त्रः कर्ता–1.4.45 इति सूत्रेण कर्तृकारकं तथा प्रातिपदिकार्थलिंगपरिमाणवचमात्रे प्रथमा–2.3.46 इत्यनेन सूत्रेण प्रथमा विभक्ति वर्तते।**

**अभ्यासः–01**

**1– रिक्तस्थानं पूरयत–**

(क)– अश्वः धावति अश्वौ धावतः अश्वाः .............।
(ख)– सिंहः गर्जति सिंहौ ...............सिंहाः गर्जन्ति।
(ग)– नर्तकी नृत्यति नर्तक्यौ नृत्यतः नर्तक्यः .............।
(घ)– मेघः ................ मेघौ वर्षतः मेघाः।

**2– प्रथमान्तानि वाक्यानि (✓) इत्यनेन चिहनेन प्रदर्शयतु –**

(क)– नदी प्रवहति।
(ख)– बालकः दुग्धं पिबति।
(ग)– साधुः तपश्चरति।
(घ)– एषः विद्यालयः अस्ति।

**3.3.2. कर्मकारकम् (द्वितीया विभक्तिः)**

अधः स्थितानि वाक्यानि पठत–

❖ माता भोजनं पचति।



❖ बालकः विद्यालयं गच्छति।

❖ शोभितः ग्रामं गच्छन् तृणं स्पृशति।

❖ शिवः कैलाशम् अधिरोते।



❖ मार्गम् उभयतः वृक्षाः सन्ति।

❖ अध्यापकं सर्वतः शिष्याः सन्ति।



❖ ग्रामं परितः कृषिकार्यं भवति।

'कर्तुरीप्सिततमं कर्म' – 1.4.49 इत्यनेन सूत्रेण कर्मसंज्ञा तथा 'कर्मणि द्वितीया' – 2.3.2 इत्यनेन सूत्रेण द्वितीया विभक्तिः भवति

**<u>अभ्यासः–02</u>**

आवरणे सूचितानां शब्दानाम् उचितरूपाणि रिक्ते स्थले लिखत–

यथा – छात्राः प्रश्नं पृष्ट्वा विषयं जानान्ति। (प्रश्नः)

1– माता....................समाप्य जलं पिबति। (पाकः)
2– सः ................... नमस्कृत्य विद्यालयं गच्छति। (देवी)
3– सुदेशः .....................दुग्धं पिबति। (दुग्धम्)
4– बालकः .................. प्रक्षाल्य भोजनं करोति। (हस्तः)
5– कविः ................ लिखति। (श्लोकः)
6– छात्राः ............... पठन्ति। (पुस्तकम्)
7– ................. परितः वृक्षाः सन्ति। (ग्रामः)
8– भक्तः ...................पूजयति। (देवः)

**2. <u>रिक्तस्थलेषु पदानां द्वितीयान्तानि रूपाणि लिखत</u>–**

यथा – रामम् रामौ रामान् (पु.)
रमा रमे रमाः (स्त्री.)
फलं फले फलानि (नपु:)

1..................पाठं पठतः। (रामः)
2................ रोटिकां कुर्वन्ति। (लता)
3 आपणिकः ..................विक्रीणाति। (फलम्)

4 .......................दूरदर्शनं पश्यन्ति। (बालक)
5 भक्ताः ..................... नामन्ति। (आचार्य)

### 3.3.3. करणकारकम् तृतीया विभक्तिः

अधः प्रदत्तानि उदाहरणानि परिशीलयन्तु

❖ रामः बाणेन रावणं हन्ति।




बालः मित्रेण सह आगच्छति।

❖ छात्रः लेखन्या लिखति।



❖ विद्यया ज्ञानं वर्धते।



❖ एषः पादेन खञ्जः।

❖ शुक्राचार्यः अक्ष्णा काणः।



❖ पुस्तकेन बिना पठितुं न शक्यते।



❖ सः दण्डेन गर्दभं ताडयति।



❖ सुरेशः कुंचिकया तालम् उद्घाटयति।



❖ अहं द्विचक्रिकया विद्यालयं गच्छामि।



❖ लक्ष्मणः रामेन सः गतवान्।

**अवधेयम्**– 'साधकतमं करणम्' – 1.4.42 इति सूत्रानुसारं क्रियायाः सिद्धौ प्रकृष्टम् उपकारकं कारकं करणसंज्ञं भवति।
'कर्तृकरणयोः तृतीया' – 2.3.18 इत्यनेन सूत्रेण करणस्य तृतीया विभक्तिः भवति।
एतद् अपि ज्ञातव्यं यत् सह, विना, हेतु, अंगविकारः इत्यादीनां योगे अपि तृतीया विभक्तिः भवति।

**अभ्यासः–03**

**1. अधोलिखितानां पदानां सहायतया वाक्यानि पूरयत–**

(क)......................... अहं तालम् उद्घाटयामि। — कुंचिका
(ख).................... अहं वार्तालापं करोमि। — दूरभाषयन्त्रम्
(ग) पिता.................... प्रयाणं करोति। — लोकयानम्
(घ) आपणिकः ..................वस्तूनि तोलयति। — तुला
(ङ) भगिनी .................. दन्तधावनं लिखति। — दन्तइर्चः
(च) अध्यापकः .....................श्यामपट्टे लिखति। — सुधाखण्डः
(छ)................. सह सुपिष्टकं खादतु। — चायम्
(ज)...................विना जीवनं नास्ति। — जलम्
(झ) सुरेशः................. बधिरः अस्ति। — कर्णः
(ञ) पिता ...............सह विद्यालयम् आगतवान् । — पुत्रः

**2. अधोलिखितैः शब्दैः वाक्य प्रयोगं कुरुत–**

यथा – यानेन गच्छति
(क) उपनेत्रम् पश्यति
(ख) हस्तः खादति
(ग) लेखनी लिखति
(घ) पुष्पम् अर्चति
(ङ.) कर्तरी कर्तयति
(च) राम सह लक्ष्मणः गच्छति
(छ) सूर्यः विना प्रकाशः नास्ति
(ज) नौका विना तरणं नास्ति

(झ) स्वास्थ्यं विना शरीरं नास्ति
(ञ) सोमेशः पादः खञ्जः

**3.3.4. सम्प्रदानकारकम् – चतुर्थी विभक्तिः**

निम्नलिखितानि वाक्यानि पठन्तु –

❖ पिता पुत्राय फलं ददाति।

❖ बालिकायै पयोहिमं रोचते।



❖ कंस कृष्णाय क्रुद्धयति।



❖ चौरः आरक्षकाय द्रुह्यन्ति।



❖ श्री गणेशाय नमः।



❖ सर्वेभ्यः स्वस्ति।



❖ अग्नये स्वाहा।

❖ राम रावणाय अलम्



❖ अध्यापकः छात्राय पुस्तकं दत्तवान्।

❖ वानराय कदलीफलं रोचते।



❖ ॐ नमः शिवाय।



❖ माता पुत्र्यै क्रीडनकं दत्तवती।



**अवधेयम्**—कर्मणा यमभिप्रैति स सम्प्रदानम्' 1.4.32 इति सूत्रानुसारं कर्मणा यं सम्बन्धुम् इच्छति सः सम्प्रदानं स्यात् इति। 'चतुर्थी सम्प्रदाने' 2.3.13, इत्यनेन सूत्रेण सम्प्रदाने चतुर्थी भवति। एवमेव रुच् धातुयोगे, क्रुध्यति, द्रुह्यति, असूयति इत्येषां योगे, नमः, स्वस्ति, स्वाहा, स्वधा, अलं वषड् इत्यादीनां योगे अपि चतुर्थी विभक्तिः भवति।

**अभ्यासः—04**

**1— रिक्तस्थानं पूरयत —**

(क) रामः .................राज्यं दत्त्वान्। (भरत)
(ख) सुरेशः स्व................... पुस्तकं दत्तवान्। (अग्रज)
(ग) धनिकः .................... धनं दत्तवान्। (निर्धन)
(घ) पिता ..................द्विचक्रिकां दत्तवान्। (पुत्री)
(ड.) रमेशः ....................अंकिनीं दत्तवान्। (लता)

**2— अधोलिखितस्य कोष्टकस्य सहायतया वाक्यानि रचयत—**

यथा — गुरुः नमः = गुरुभ्यः नमः।
(क) अर्जुन दुर्योधन अलम्।
(ख) छात्र स्वस्ति।
(ग) मयूर नृत्यं रोचते।
(घ) लक्ष्मण मेघनाद क्रुध्यति।
(ड.) दुष्ट सज्जन द्रुहयति।

**3— अधोलिखितानां शब्दानां चतुर्थ्यन्तं रूपं लिखन्तु—**

यथा — राम = रामाय रामाभ्य रामेभ्यः
कृष्ण =
सीता =
नगरम् =
मति =
साधु =
लक्ष्मी =
पित् =

देव =

रमा =

गुरु =

### 3.3.5. अपादानकारकम् (पंचमी विभक्तिः)

निम्नलिखितानि वाक्यानि परिशीलयन्तु –

❖ वृक्षात् फलं पतति।



❖ आकाशात् जलं पतति।



❖ साधुः पापात् जुगुप्सते।



❖ बालः चोरात् बिभेति।

❖ गोः वत्सं व्याघ्रात् रक्षति।

❖ हिमालयात् गंगा प्रभवति।



❖ पिता वित्तकोशात् धनम् आनयति।

❖ माता क्षीरकेन्द्रात् दुग्धम् आनयति।

❖ सज्जनः दुर्जनात् भीतः भवति।

❖ देहलीतः मम मातुलः आगच्छति।

**अवधेयम्**– 'ध्रुवम् अपाये अपादानम्' – 1.4.24 इत्यनेन सूत्रेण यः अवधिभूतः भवति तत् अपादान कारकं तथा तस्मिन् 'अपादाने पंचमी ' 2.3.18 इति सूत्रेण पंचमी विभक्तिः भवति। पंचमी विभक्तेः अर्थे 'तः' प्रयोगः बहुलतया भवति। एवमेव जुगुप्सते, विरमति, प्रमाद्यति, विभेति, रक्षति, अधीते, इत्यादीनां योगे अपि अपादानकारकं तथा तत्र पंचमी विभक्तिः भवति।

**<u>अभ्यासः–05</u>**

| | |
|---|---|
| (क) मालाकारः .................. उद्यानात् पुष्पाणि चिनोति। | उद्यान |
| (ख) पिपासू..................................जलम् आनयति। | तडाग |
| (ग) रावणः...............................भीतः आसीत्। | राम |
| (घ) आरक्षकः.................................जनान् रक्षति। | चोर |
| (ङ) सः.................................बहिः गतवान्। | बहिः |

**2. अधोलिखितानां पदानां सुमेलनं कुरुत–**

| **''क''** | **''ख''** |
|---|---|
| (क) ग्रामाद् | रक्षति |
| (ख) दुर्जनान् | बहिः |
| (ग) पापात् | आरभ्य |
| (घ) प्रातः कालात् | विरमति |
| (ङ) वृक्षात् | निर्गच्छति |
| (च) पर्वतात् | पतति |

**3. अधोनिर्दिष्टानां पंचमीविभक्तिरूपाणि लिखत–**

| **यथा–1 सेवकः** | **सेवकात्** | **सेवकेभ्यः** |
|---|---|---|
| 1. गृहम् | ........................... | ........................... |
| 2. नगरम् | ........................... | ........................... |
| 3. शाला | ........................... | ........................... |
| 4. भूमिः | ........................... | ........................... |
| 5. तिथिः | ........................... | ........................... |

**<u>3.3.6. सम्बन्धः (षष्ठीविभक्तिः)</u>**

अधस्तनानि वाक्यानि पठत–

❖ रामः दशरथस्य पुत्रः।

❖ देहली भारतस्य राजधानी।



❖ गंगायाः जलं पवित्रम्।



❖ वृक्षस्य फलं मधुरम्।

❖ श्लोकस्य पाठकः उत्तमः।

❖ विद्यालयस्य भवनं सुन्दरम्।




❖ पाठशालायाः निकटम् आपणः।
❖ छात्राणां रविः बुद्धिमान्।
❖ अस्माकः भारतदेशः सुविशालः अस्ति।



❖ सज्जनः परोपकारस्य कार्यं करोति।



❖ शीतरोगस्य औषधिः आर्द्रकं भवति।

**अवधेयम्** 'षष्ठी शेषे' इत्यनेन सूत्रेण कर्तृकर्मादिकारकैः अतिरिक्तः यः स्वस्वामिभावसम्बन्धः, जन्यजनकसम्बन्धः कार्यकारण सम्बन्धश्च भवति सः शेषः इत्यर्थः। तत्र षष्ठी विभक्तिः भवेत् इति।

**अभ्यासः–6**

अधोरचितकोष्टकस्य सहायतया वाक्यानि रचयत–

यथा– रामः अनुजः लक्ष्मणः
रामस्य अनुजः लक्ष्मणः।

(क) सीता पतिः रामः
(ख) श्रीधरः भागिनेय दिलीपः
(ग) नन्दिनी पुत्रः वेंकटेशः
(घ) लतिका पौत्रः गोविन्दः
(ङ) महेशः पितृव्यः हरिमोहनः

**2. उचितैः षष्ठ्यन्तरूपैः रिक्तस्थलानि पूरयत–**

यथा– श्रीकृष्णः (पाण्डवाः)..........................रक्षकः।
श्रीकृष्णः पाण्डवानां रक्षकः।

(क) (धनिकाः).............................गृहाणि उन्नतानि भवन्ति।
(ख) (जनाः)................................रूचिः विभिन्ना भवति।
(ग) (बालका)............................कोलाहलेन अध्यापकः कुपितः।
(घ) (वयम्)................................कार्यालयः सुविशालः अस्ति।
(ङ) (मूर्खः)............................व्यवहारः विचित्रः भवति।

**3. अधोनिर्दिष्टं कोष्टकं पठत–**

| षष्ठीविभक्त्यन्तानि रूपाणि | | | |
|---|---|---|---|
| | पु: | स्त्री | नपु: |
| इकारान्त: | हरे: हरीणाम् | मते: मतीनाम् | दध्न: दध्नाम् |
| उकारान्त: | गुरो: गुरूणाम् | धेनो: धेनूनाम् | मधुन: मधूनाम् |
| ऋकारान्त: | पितु: पितृणाम् | मातु: मातृणाम् | ......................... |
| अकारान्त: | मेघस्य मेघानाम् | ....................................... | नगरस्य नगराणाम् |

**4. अधोनिर्दिष्टानां षष्ठीविभक्तिरूपाणि लिखत–**

| | | | एоवचनम् | बहुоवचनम् |
|---|---|---|---|---|
| यथा– | कवि: | = | कवे: | कवीनाम् |
| भ्राता | ................................ | | ................................ | |
| मुनि: | ................................ | | ................................ | |
| लेखनी | ................................ | | ................................ | |

**3.3.7. अधिकरणकारकम् (सप्तमीविभक्ति:)**

इमानि वाक्यानि परिशीलयत

❖ बाल: आसन्दे उपविशति।



❖ मोहितस्य पठने इच्छा अस्ति।

❖ तिलेषु तैलमस्ति।




❖ उद्याने वृक्षा: सन्ति।



❖ ग्रामे मन्दिरं वर्तते।

❖ पाठशालायां छात्राः पठन्ति।



❖ संस्कृते जनाः प्रीतिं प्रदर्शयन्ति।

❖ रामस्य कथा रामायणे अस्ति।



❖ दशरथः पुत्रेषु अधिकं स्निह्यतिस्म।

❖ पिता पुत्र्यां विश्वसिति।



❖ आरक्षकः चोरस्य कण्ढे गृहीतवान्।



❖ माता पुत्रस्य कपोले ताडितवान्।

**अवधेयम्**–'आधारोऽधिकरणम्' 1.4.45 इत्यनेन सूत्रेण 'सप्तक्यधिकरणे च' 2.3.36 इत्यनने सूत्रेण अधिकरणे सप्तमी विभक्तिः भवति। एवमेव स्निह्यति, विश्वसिति तथा ग्रहण, ताडनयोः अपि सप्तमीविभक्तिः भवति।

**<u>अभ्यासः–07</u>**

**1. रिक्तस्थलानि पूरयत–**

(क) भगवान् विष्णु..................................निवसति। (वकुण्ठः)
(ख) पशवः........................................भ्रमन्ति। (वनम्)
(ग) सुरुचिः...............................लिखति। (उत्तरपुस्तिका)
(घ) क्रीडकाः.................................कन्दुकं क्रीडन्ति।
(ङ) दर्शकाः.................................चित्राणि पश्यन्ति।

**2. सुमेलनं कुरुत–**

दक्षुदण्डे आत्मा अस्ति
तिलैषु फलानि लगन्ति

| | |
|---|---|
| जले | ऋषयः तपश्चरन्ति |
| सर्वस्मिन् | रसः भवति |
| पर्वतेषु | तैलम् अस्ति |
| वृक्षेषु | शीतलता भवति |

**3. अधोनिर्दिष्टानां पदानां सहायतया वाक्यानि रचयत–**

यथा– संस्कृतम् = संस्कृतपठने मम इच्छा अस्ति।

(क) भ्रमणम् ........................ ........................ ........................
(ख) लेखनम् ........................ ........................ ........................
(ग) दर्शनम् ........................ ........................ ........................
(घ) क्रीडनम् ........................ ........................ ........................
(ङ) परोपकारः ........................ ........................ ........................

## 3.4. सारांशः

क्रियान्वयित्वं कारकत्वम्। अर्थात् क्रियाभिः साकं येषांसाक्षात् अन्वयः (सम्बन्धविशेषः) भवति, तानि कारकाणि इत्युच्यन्ते। 'क्रियाजनकत्वं कारकत्वम्' इत्यनेने अपि ज्ञायते यत् येन वस्तुना पदार्थेन वा काचित् क्रिया भवेत्, क्रियायाः सम्पादने संचालने वा उपयोगः भवेत् तत् कारकम् इति कथ्यते। यद्यपि कारकेषु विभक्तिषु च सामान्यतया अन्तरं न प्रतीयते तथापि तद् अन्तरं तु वर्तते एव। कारकाणि षट् वर्तन्ते। विभक्तयः सप्त सन्ति। एवं प्रकारेण कर्ता–कर्म–करण–सम्प्रदान–अपादान–अधिकरण–इत्यादीनि षट् कारकाणि सन्ति। सम्बन्धस्य कारकत्वम् आचार्यैः न स्वीकृतम्। किन्तु 'षष्ठी शेषे' इत्यादिना सूत्रेण कर्ताकर्मकरणैभ्यः अवशिष्टः व्यवहारः समबन्धस्य अन्तर्गतम् आयाति। अतः कर्त्तरि प्रथमाविभक्तिः, कर्मणि द्वितीया विभक्तिः, करणे तृतीयाविभक्तिः सम्प्रदाने चतुर्थीविभक्तिः सम्बोधने च प्रथमविभक्तिः भवति। अतः सिद्धं यत् षट् कारकाणि तथा सप्त विभक्ति विभक्तयः सन्तीति।

## 3.5. अभ्यासप्रश्नानाम् उत्तराणि

**अभ्यासः 01**

**प्रश्नः01 रिक्तस्थानम्–**

1 धावन्ति, 2 गर्जतः, 3 नृत्यन्ति, 4 वर्षति

**प्रश्नः02 प्रथमान्तानि वाक्यानि–**

1 नदी प्रवहति

2 एषः विद्यालयः अस्ति

**अभ्यासः 02**

**प्रश्नः01 रिक्तस्थानम्–**

1 पाकं, 2 देवीं, 3 दुग्धं, 4 हस्तौ, 5 श्लोकं, 6 पुस्तकं, 7 ग्रामं, 8 देवं

**प्रश्नः02 द्वितीयान्तरूपाणि–**

1 रामौ, 2 लताः, 3 फलानि, 4 बालकाः, 5 आचार्यं

**अभ्यासः 03**

**प्रश्नः01 रिक्तस्थानम्–**

1 कुंचिकया, 2 दूरभाषयन्त्रेण, 3 लोकयानेन, 4 तुलया, 5 दन्तकूर्चेण, 6 सुधाखण्डेन, 7 चायेन, 8 जलेन, 9 कर्णेन, 10 पुत्रेण

**प्रश्नः02 वाक्यप्रयोगः–**

1 उपनेत्रेण, 2 हस्तेन, 3 लेखन्या, 4 पुष्पेण, 5 कर्तर्या, 6 रामेण, 7 सूर्येण, 8 नौकया, 9 स्वास्थ्येन, 10 पादेन

**अभ्यासः 04**

**प्रश्नः01 रिक्तस्थानम्–**

1 भरताय, 2 अग्रजाय, 3 निर्धनाय, 4 पुत्र्यै, 5 लतायै

**प्रश्नः02 वाक्यप्रयोगः–**

1 अर्जुनः दुर्योधनाय अलम्

2 छात्राय स्वस्ति

3 मयूराय नृत्यं रोचते

4 लक्ष्मणः मेघनादाय क्रुध्यति

5 दुष्टः सज्जनाय द्रुह्यति

**प्रश्नः03 चतुर्थ्यन्तरूपाणि–**

कृष्णाय कृष्णाभ्यां कृष्णेभ्यः, सीतायै सीताभ्यां सीताभ्यः, नगराय नगराभ्यां नगरेभ्यः, मतये मतिभ्यां मतिभ्यः, साधवे साधुभ्यां साधुभ्यः, लक्ष्म्यै लक्ष्मीभ्यां लक्ष्मीभ्यः, पित्रे पितृभ्यां पितृभ्यः, देवाय देवाभ्यां देवेभ्यः

**अभ्यासः 05**

**प्रश्नः01 रिक्तस्थानम्–**

1 तडागात्, 2 रामात्, 3 चोरात्, 4 गृहात्

**प्रश्नः02 सुमेलनम्–**

1 बहिः 2 रक्षति, 3 विरमति, 4 आरभ्य, 5 पतति, 6 निर्गच्छति,

**प्रश्नः03 पंचम्यन्तरूपाणि–**

1 गृहात् गृहेभ्यः, 2 नगरात् नगरेभ्यः, 3 शालायाः शालाभ्यः, 4 भूमेः भूमिभ्यः, 5 तिथेः तिथिभ्यः

**अभ्यासः 06**

**प्रश्नः01 वाक्यप्रयोगः–**

1 सीतायाः, 2 श्रीधरस्य, 3 नन्दिन्याः, 4 लतिकायाः, 5 महेशस्य

**प्रश्नः02 रिक्तस्थानम्–**

1 धनिकानाम्, 2 जनानाम्, 3 बालकानाम्, 4 अस्माकम्, 5 मूर्खाणाम्

**प्रश्नः03 षष्ठ्यन्तरूपाणि–**

1 भ्रातुः भ्रातृणाम्, 2 मुनेः मुनीनाम्, 3 लेखन्याः लेखनीनाम्

**अभ्यासः 07**

**प्रश्नः01 रिक्तस्थानम्–**

1 वैकुण्ठे, 2 वने, 3 उत्तरपुस्किायां, 4 क्रीडांगणे, 5 उपहारगृहे

**प्रश्नः02 सुमेलनम्–**

1 रसः, 2 तैलम्, 3 शीतलता, 4 आत्मा, 5 ऋषयः, 6 फलानि

**प्रश्नः03 वाक्यानि स्वयं रचनीयानि**

## 3.6. सन्दर्भग्रन्थ सूची

1. सिद्धान्त कौमुदी (कारक प्रकरणम्) व्याख्याकारः डॉ0 आद्याप्रसाद मिश्रः, प्रकाशकः अक्षयवट प्रकाशन, 26 बलरामपुर हाउस, इलाहाबाद–211002

2. कारकम्, व्याख्याकारः जि0 महाबलेश्वरभट्टः, प्रकाशकः संस्कृत भारती, 'अक्षरम्' 8 उपमार्गः, 2 घट्टः, गिरिनगरम्, बेंगलूरू–560085

3. विभक्ति वल्लरी, प्रकाशकः संस्कृत भारती.....................तदेव

## 3.7. सहायकोपयोगी–पाठ्यसामग्री

1. सिद्धान्तकौमुदी (कारकप्रकरणम्)
2. विभक्तिवल्लरी
3. कारकम्

(एतेषां पुस्तकानां प्राप्तिसंकेतः सन्दर्भग्रन्थ सूची इत्यत्र अस्ति)

## 3.8. निबन्धात्मकप्रश्नाः

अस्मिन् एकके भवन्तः कारकाणां प्रयोगविषये ज्ञातवन्तः। एतदाधारेण निम्नलिखित प्रश्नानाम् उत्तराणि लिखित–

प्रश्न–1 संस्कृतभाषायां कति कारकाणि, कानि च तानि? विशदयत।
प्रश्न–2 कारकाणां विभक्तीनां च कः सम्बन्धः? लिखत।
प्रश्न–3 सह, विना, साकं, सार्धं, सदृशम् इत्यादीनां सहायतया दश वाक्यानि रचयत।
प्रश्न–4 अधिकरणकारकस्य परिचयं विलिख्य तस्य दश उदाहरणानि लिखत–

# चतुर्थ इकाई : सुभाषितानि नीतिवचनानि च।

4.1 प्रस्तावना
4.2 उद्देश्यानि
4.3 व्यवहारसंस्कृतम्
 4.3.1 शिष्टाचारः
 4.3.2 परिचय
 4.3.3 छात्राणां व्यवहारे सामान्याः प्रयोगाः
 4.3.4 स्वास्थ्यविषये सम्भाषणम् (वैद्य–रोगीसम्वादः)
4.4 शरीरावय–परिचयः
4.5 सुभाषितानि
 4.5.1. ज्ञानविहीनः पशुः इव
 4.5.2. स्वाभिमानिनः व्यवहारः
 4.5.3. धनस्य गतिः
 4.5.4. विद्यासम्पन्नः दुष्टोऽपि त्याज्यः
 4.5.5. आलस्यनिन्दा उद्योगप्रशंसा च
 4.5.6. मूर्खजनस्य मैत्री कष्टकरी
 4.5.7. सज्जनानां स्वभावान् वर्णयति–
4.6. संस्कृत गीतानि
 4.6.1. नैव क्लिष्टा न च कठिना
 4.6.2 सादरं समीहताम्
 4.6.3 मृदपि च चन्दनम्
 4.6.4. कृत्वा नवदृढ़संकल्पम्
 4.6.5. संस्कृतस्य सेवनम्
 4.6.6. संस्कृतेन पाठनम्
 4.6.7. अवनितलं पुनरवतीर्णा स्यात्
 4.6.8. स्वागतगीतम्
 4.6.9. विमानयानं रचयाम
 4.6.10. एक श्रृगालः
 4.6.11. चटक ! चटक !
4.7 सारांशः
4.8 अभ्यास प्रश्नानाम् उत्तराणि–
4.9 सन्दर्भग्रन्थसूची
4.10. सहायकोपयोगी पाठ्यसामग्री
4.11. निबन्धात्मकप्रश्नाः

# 4.1 प्रस्तावना

भाष्यते इति भाषा। भाष्यते अनया इति भाषा। अर्थात् यथा भाषचितुं शक्यते सा भाषा इति। यथा एव विचारविनिमयः कर्तुं शक्यते सा भाषा इति। यथा च सततं सरलं सम्भाषणं विधातुं शक्यते सा भाषा इति। उपर्युक्तानि पारिभाषिकवाक्यानि संस्कृतभाषायाः सन्दर्भे अपि प्रकृतानि भवन्ति। यथा हिन्दी–आङ्ग्ल–बांगलादिषु भाषायु सरलतया तत्तदभाषाभाषी वार्तालापं करोति तथैव संस्कृतभाषायामपि सम्भाषणं कर्तुं शक्यते। प्रत्येकं भाषायाः द्विविधं रूपं भवति, शास्त्रीयं लौकिकं चेति। शास्त्रीयभाषायां साहित्यं रच्यते। लौकिकभाषायां च सर्वसामान्यः लोकमान्यः व्यवहारः प्रचलति। संस्कृतभाषायाः उपर्युक्त रूपद्वयं सम्प्रति अपि अक्षुण्णम् अस्ति। असः लौकिकस्य रूपस्य व्यवहारः न केवलं भारते अपितु विश्वे अपि वहुत्र जायमानः अस्ति। अस्याः लौकिकं रूपमेव व्यवहारसंस्कृतम् इति उच्चते। व्यवहारसंस्कृतमं अत्यन्तं सरलं सरसं रूचिकरं सुबोधं चास्ति। अस्मिन् एकके भवन्तः व्यवहारसंस्कृतम् विषये

# 4.2 उद्देश्यानि

**अस्य एककस्य पठनात् परं भवन्त ज्ञास्यन्ति यत्–**

1. संस्कृतभाषायाः व्यावहारिकपक्षस्य ज्ञानम्।
2. संस्कृतभाषायां वार्तालापस्य प्रक्रियायाःज्ञानम्।
3. संस्कृतभाषायां सरलक्रियापदानां प्रयोगः।
4. संस्कृतभाषायां सरलवाक्यानां निर्माणस्य ज्ञानम्।
5. संस्कृतभाषाया व्यावसायवाचकानां शब्दानां ज्ञानम्।

# 4.3 व्यवहारसंस्कृतम्

अस्मिन् विषये इयं व्यवहारिकसंस्कृतस्य केषाचिंत प्रमुखपक्षाणां सन्दर्भे चर्चां कुर्मः

## 4.3.1 शिष्टाचारः






मोहनः – रमेश ! हरिः ओम ।
रमेशः – हरिः ओम् शुभप्रभातम्।
मोहनः – कथम् अस्ति भवान् ?
रमेशः – अहं कुशली। भवान् कथमं अस्ति ?
मोहनः – अहम् अपि कुशली। भवान् किं करोति ?
रमेशः – अहं भ्रमणं करोमि।
मोहनः – आगच्छतु । चायं पिबतु ।
रमेशः – नहि नहि। क्षम्यताम्। अहं चायं न पिबामि।
मोहनः –चिन्ता मास्तु। दुग्धं पिबतु।
रमेशः –धन्यवादः ।
मोहनः – स्वागतम्।
रमेशः –श्रीमन् ! अस्तु ! अहं गच्छामि।
मोहनः – अस्तु । पुनः मिलामः।

उपर्युक्तं सम्भाषणं शिष्टाचारेण सम्बद्धम् अस्ति। अत्र हरिः ओम्–हेल्लो इत्यर्थे, क्षम्यताम्–माफ कीजिए इत्यर्थे, चिन्ता मास्तु–कोई बात नहीं इत्यर्थे, श्रीमान्–सर इत्यर्थे, अस्तु–जी, हां ठीक है इत्यर्थे, पुनः मिलामः – फिर मिलेंगे इत्यर्थे च प्रयुज्यते। अन्यानि पदानि तु सरलतया बोध्यानि सन्ति।

**4.3.2 परिचय –**

भवतः नाम किम् ? (पु.)
भवत्याः नाम किम् ? (स्त्री)
मम नाम गणेशः।
मम नाम सुरुचिः।
भवान् कुत्र निवसति ?
अहं हरिद्वारे। हरिद्वारनगरे निवसामि।
भवती कुत्र निवसति?
अहं देहली–नगरे निवसामि।
भवान्/भवती किं करोति ?
अहम् अध्यापकः अहं पाठयामि।
अहं शिक्षिका । अहं शिक्षयामि।
भवान्/भवती कस्यां कक्षायां पठति?
अहं दशमकक्षायां पठामि।
भवतः/भवत्याः ग्रामः कुत्र ?
मम ग्रामः................................अस्ति।
गृहे सर्वं कुशलं किम् ?
आम्, सर्व कुशलम् ।
अन्यः कः विशेषः ?
कोऽपि विशेषः नास्ति।
भवान्/भवती कुतः आगच्छति ?
अहं गृहतः विद्यालयतः, देवालयतः आगच्छामि।
कुत्र गच्छति ?
अहं कार्यालयं, विद्यालयं, वित्तकोशं गच्छामि ।
किं मेलनं विरलं जातम् ?
भवन्तं/भवतीं कुत्रापि दृष्टवान् ?
तर्हि कुत्र दृष्टवान् ?

**4.3.3 छात्राणां व्यवहारे सामान्याः प्रयोगाः**

| | | |
|---|---|---|
| लोकेशः | – | नमस्ते राकेश! सम्प्रति भवान् कुत्र पठति? |
| राकेशः | – | नमस्ते! अहं महाविद्यालये पठामि। |
| लोकेशः | – | परीक्षायाः सिद्धता कथम् अस्ति? |
| राकेशः | – | बहु समीचीना। सम्यक् प्रचलति। |
| लोकेशः | – | पाठ्यभागः समाप्तः वा? |
| राकेशः | – | नैव नैव। पाठ्यभागः एव न समाप्तः। |
| लोकेशः | – | विज्ञानविषये भवतः रुचिः कीदृशी? |
| राकेशः | – | विज्ञानस्य श्रवणमात्रेण मम शिरोभ्रमणं भवति। |
| लोकेशः | – | गणितविषयं कः पाठयति? |
| राकेशः | – | प्राध्यापकः चटर्जीमहोदयः पाठयति। |
| लोकेशः | – | तस्य पाठनशैली कीदृशी? |
| राकेशः | – | आम् अत्युत्तमा। तस्य पाठनशैली प्रभावपूर्णा। |
| लोकेशः | – | श्वः भवान् मम महाविद्यालयम् आगच्छतु? |
| राकेशः | – | श्वः ! श्वः तु विरामः, परश्वः आगमिष्यामि? |

उपर्युक्तानि वाक्यानि छात्राणां दैनिकव्यवहारे प्रयोगयोग्यानि सन्ति। एतेषु सम्प्रति=अभी, आजकल इत्यर्थे, सिद्धता=तैयारी, बहु समीचीना=बहुत अच्छी, पाठ्यभागः=इकाई, अध्याय, कीदृशी=कैसी, शिरोभ्रमणम्=सिर चकराना, प्राध्यापकः=प्रोफेसर, पाठनशैली=पढ़ाने का तरीका, अत्युत्तमा=बहुत अच्छी, प्रभावपूर्णा=प्रभाव डालने वाली, विरामः=अवकाशः, श्वः=कल, परश्वः=परसों इत्यादिषु अर्थेषु प्रयुज्यन्ते। अतः तत्तत् विषये एतेषां प्रयोगः सरलतया कर्त्तव्यम्।

### 4.3.4 स्वास्थ्यविषये सम्भाषणम् (वैद्य–रोगीसम्वादः)

अरुणः – महोदय! मम स्वास्थ्यं समीचीनं नास्ति।
वैद्यः – किं जातम्?
अरुणः – सामान्यतः तदा तदा शिरोवेदना भवति।
कदाचित् मम शिरः भ्रमति इव।
वैद्यः – चिन्ता मास्तु। एवं कदा आरभ्य भवति?
अरुणः – प्रायः मासद्वयम् अभवत्।
वैद्यः – ज्वरः अपि अगच्छति वा?
अरुणः – नैव श्रीमन्! ज्वरः तु नास्ति। किन्तु प्रतिक्षणं श्रान्तिः प्रतीयते।
शरीरे दुर्बलता अपि अस्ति।
वैद्यः – भवतु नाम। पाण्डुरोगः तु नास्ति।
अरुणः – नास्ति। तथा तु न प्रतीयते।
वैद्यः – अन्यं वैद्यं दर्शितवान् वा?
अरुणः – नैव! किन्तु रक्तपरीक्षणं कारितम्।
वैद्यः – अस्तु! आदौ भवता कानिचन परीक्षणानि कारणीयानि। तदनन्तरम् औषधं दास्यामि।
अरुणः – श्रीमन् कानि परीक्षणानि?
वैद्यः – हृदयगतिपरीक्षणम्। कफपरीक्षणम्।
अरुणः – धन्यवादः श्रीमन्। पुनः मिलामः।
वैद्यः – स्वागतम्। अस्तु मिलामः।

उपर्युक्तेषु वाक्येषु शिरोवेदना=सिरदर्द इत्यर्थे, कदा आरभ्य=कब से, ज्वरः=बुखार, श्रान्तिः=थकान, पाण्डुरोगः=पीलिया, रक्तपरीक्षणम्=खून की जांच इत्यादिषु अर्थेषु प्रयुज्यन्ते।

**अभ्यासः 01**

**1. निम्नलिखितानां पदानां सहायतया वाक्यानि रचयत यथा–वित्तकोशः –वित्तकोशे धनस्य संग्रहः क्रियते।**

(क)पत्रालयः (पोस्ट ऑफिस) ..................................................
(ख)कार्यालयः (ऑफिस) ..................................................
(ग)मुद्रणालयः (प्रिंटिंग प्रेस) ..................................................
(घ)चिकित्सालयः (हॉस्पिटल) ..................................................
(ङ)ग्रन्थालयः (पुस्तकालय) ..................................................

**2. कोष्टके प्रदत्तानां पदानां सहायता किं कार्यं कुत्र भवति इति लिखत–**

| |
|---|
| न्यायालयः, अनाथालयः, देवालयः, पाठशाला, पाकशाला, बालोद्यानम्, उपहारगृहम्, लोकयानस्थानकम्, चलचित्रगृहम्, यान्त्रागारः, वाचनालयः, आपणः |

यथा

| | | |
|---|---|---|
| न्यायालयः | = | न्यायालये न्यायः मिलति। |
| वाचनालयः | = | वाचनालये समाचारपत्राणि पुस्तकानि च पठन्ति। |
| अनाथालयः | = | ........................................................................................... |
| देवालयः | = | ........................................................................................... |
| पाकशाला | = | ........................................................................................... |
| बालोद्यानम् | = | ........................................................................................... |
| उपहारगृहम् | = | ........................................................................................... |
| लोकयानस्थानकम् | = | ........................................................................................... |
| चलचित्रगृहम् | = | ........................................................................................... |
| यन्त्रागारः | = | ........................................................................................... |
| आपणः | = | ........................................................................................... |

**3. अधः शिष्यस्य गुरोश्च अपूर्णः सम्वादः प्रदत्तः। निम्नलिखितपदानां सहायतया सम्वादं पूरयत–**

| |
|---|
| कुशलम्, शंका, भाषया, अन्तः, नमः, भू, जिज्ञासा, जीविता अवश्यम् पाठः एकवारं चिन्ता, सर्वम्, सम्भाषणम् |

| | | |
|---|---|---|
| शिष्यः | – | किम् अहम्................................आगन्तुं शक्नोमि महोदय! |
| गुरुः | – | आम् आम्..............................आगच्छतु। |
| शिष्यः | – | महोदय! नमो............................ । |
| गुरुः | – | चिरं जीव। सर्वं......................... । |
| शिष्यः | – | आं महोदय!.................अपि कुशलम्। |
| गुरुः | – | किं ह्यस्तनः............................स्मृतः। |
| शिष्यः | – | आम्। स्मृतः। किन्तु............................धातुप्रयोगः नावगतः। |
| गुरुः | – | .........................मास्तु। पुनः.......................बोधयामि। |
| शिष्यः | – | अस्तु। एका................................इतोऽपि अस्ति। |
| गुरुः | – | वदतु। का.............................भवतः। |
| शिष्यः | – | संस्कृतस्य संरक्षणार्थं किं..........................अनिवार्यम्? |
| गुरुः | – | आम् आम्। यया...........................भाष्यते, सा एव.......................भवति। |

## 4.4 शरीरावय–परिचयः

अस्माकं शरीरे विद्यमानानां सर्वेषाम् अंगानां नामानि सरलसंस्कृतभाषायां प्रयोक्तुं शक्यन्ते। एतदर्थम् अत्र वाक्यानि रचितानि सन्ति। तत्र विद्यमानानि रेखांकित पदानि शरीरस्य अंगेन सम्बद्धानि सन्ति, तानि सावधानं पठत–



1. मानवस्य गात्रम् शरीरं पंचतत्वेन निर्मित्तम्।

2. मानवस्य शिरः बुद्धेः केन्द्रं भवति।



3. ब्रह्मचारी शिखां धरति।



4. अर्चकः ललाटे तिलकं करोति।



5. लोचनस्य कार्यं दृष्टिः अस्ति।



6. घ्राणेन जिघ्रति मानवः।



7. स्वादः रसनायाः विषयः।





8. दन्ताः द्वात्रिंशत् भवन्ति।



9. महिलाः श्रोते कुण्डलं धरन्ति।



10. कण्ठः मधुरगाने सहायकः।
11. ग्रीवा वामतः दक्षिणतः च भ्रमति।

12. पुरुषाणां स्कन्धः दृढः भवति।



13. पुरुषणाम् कपोले कूर्चः शोभते।



14. महिलानां श्मश्रु न भवति।

15. महिलाः ओष्ठे रंगं कुर्वन्ति।



16. लोचनस्य उपरि भ्रूः भवति।






17. गणेशस्य उदरं लम्बं वर्तते।

**निम्नलिखितानां शरीरस्य अंगानां सहायतया वाक्यानि रचयत–**

यथा – अधरः –

वंशीवादने अधरः सहायकः।

1. पृष्ठम् (पीठ)
2. श्रोणिः (स्त्री कमर)
3. ऊरूः (पुरूष जंघा)
4. जानुः (पुरूष, घुटना)
5. गुलकः (टकना)
6. बाहुः (बांह)
7. कफोंणिः (स्त्री, कोहनी)
8. मणिबन्धः (कलाई)
9. मुष्टिः (स्त्री, मुठ्ठी)

10. नाडिः (स्त्री, नाड़ी)
11. शिरा (स्त्री, नस)
12. फुप्फुसम् (फेफड़ा)
13. हृदयम् (हृदय)
14. अन्त्रम् (आँत)
15. पृष्ठास्थि (नपु0, रीढ़)
16. रुधिरम् (खून)
17. वसा (चर्बी)
18. पक्ष्मन् (नपु0, पलक)
19. वृक्षस् (नपु0, छाती)
20. कुक्षिः (पु0, पेट)

**अभ्यासः–02**

**1. अधोलिखितानां शरीरावयवानां पुरतः तस्य कार्यं लिखत–**

यथा– लोचनम् = दर्शनम्

1. कर्णः = ..................................
2. नासिका = ..................................
3. दन्ताः = ..................................
4. केशाः = ..................................
5. हस्तौ = ..................................
6. पादौ = ..................................
7. ग्रीवा = ..................................
8. जिह्वा = ..................................
9. कण्ठः = ..................................
10. ललाटः = ..................................

**2. निम्नलिखितानाम् अवयवानां वाक्यप्रयोगं कुरूत**

यथा = दन्तैः वयं भोजनं चर्वित्वा खादामः।

1. रसना = ................................................
2. कपोलः = ................................................
3. उदरम् = ................................................
4. फुप्फुसम्= ................................................
5. मुष्टिः = ................................................

# 4.5 सुभाषितानि–

सुभाषितं ज्ञानप्रदं वाक्यं भवति। एतत् घटे समुद्रपूर्तिं करोति। सुभाषितं तादृशं वाक्यं भवति यत् अल्पैः एव शब्दैः अधिकाधिकस्य ज्ञानस्य सम्प्रेषणं करोति। पद्यात्मकस्वरूपस्य कारणात् सुभाषितं गातुम् अपि शक्यते। अत्र कानिचन सरलानि सुभाषितानि प्रदत्तानि। तानि ध्यानेन पठत स्मरत च–

**4.5.1. ज्ञानविहीनः पशुः इव**

साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम्।।

नीतिशतकम्–12

**पदच्छेद–:**

साहित्य–संगीत–कलाविहीनः साक्षात् पशुः पुच्छ–विषाण–हीनः।
तृणम् न खादन् अपि जीवमानः तद् भागधेयम् परमम् पशूनाम्।।

**भावार्थः–** यः मानवः साहित्यविषये संगीतविषये कलादीनां च विषये किंचित् अपि न जानाति सः साक्षात् मूर्तिमान् पशुः एव भवति। यतः सः घासं न खादन् अपि जीवति तत् पशूनां परमं सौभ्याग्यमस्ति (अन्यथा अनेन नरपशुना तृणे भक्षिते सति वास्तविकपशूनां जीवनहानिः स्यात्)।

### 4.5.2. स्वाभिमानिनः व्यवहारः

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव च।।

नीतिशतकम्–33

**पदच्छेदः–**

कुसुम–स्तबकस्य इव द्वयी वृत्तिः मनस्विनः।
मूर्ध्नि वा सर्व–लोकस्य शीर्यते वने एव च।।

**भावार्थः–** स्वाभिमानिनः पुरुषस्य पुष्पगुच्छ इव द्विविधः स्वभावः भवति। पुष्पगुच्छः सर्वेषा जनानां शिरसि तिष्ठति अथवा वने एव विनश्यति। एवमेव स्वाभिमानिनः जनाः सर्वेषां मध्ये उन्नतस्थानं प्राप्नुवन्ति, तस्य अभावे तु अरण्ये एकान्ते वा जीर्णतां यान्ति।

### 4.5.3. धनस्य गतिः

दानं भोगो नाशस्तिस्त्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।।

नीतिशतकम्–43

**पदच्छेदः–**

दानम् भोगः नाशः तिस्त्रः गतयः भवन्ति वित्तस्य।
यः न ददाति न भुङ्क्ते तस्य तृतीया गतिः भवति।

**भावार्थः–** धनस्य तिस्त्रः गतयः भवन्ति दानं भोगः नाशः च।यः पुरुष न तु दानं करोति न वा उपभोगं करोति तस्य धनस्य नाशरूपा तृतीया गतिः भवति।

### 4.5.4. विद्यासम्पन्नः दुष्टोऽपि त्याज्यः

दृर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयंकरः।।

नीतिशतकम्–53

**पदच्छेदः–**

दुर्जनः परिहर्तव्यः विद्यया अलङ्कृतः अपि सन्।
मणिना भूषितः सर्पः किम् असौ न भयंकरः।

**भावार्थ :–** सकलानां शास्त्राणां ज्ञानेन सम्पन्नः खलः त्याज्यः। शिरोमणिना विभूषितः सर्पः किं भयप्रदो नास्ति, अर्थात् महाभयंकरः भवति। मणियुक्तस्य सर्पस्य इव विद्याविभूषितः खल भयप्रदः भवति।

### 4.5.5.आलस्यनिन्दा उद्योगप्रशंसा च

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति।।

नीतिशतकम्–86

**पदच्छेदः–**

आलस्यम् हि मनुष्याणाम् शरीरस्थः महान् रिपुः।
नास्ति उद्यम–समः बन्धु यं कृत्वा न अवसीदति।।

**भावार्थः–** कार्येषु अप्रवृत्तिरूपम् आलस्यं मनुष्याणां शरीरस्थः महान् शत्रुः भवति। उद्योगतुल्यः मनुष्याणाम् अन्यः स्वजनः नास्ति। उद्यमं कुर्वन् मनुष्यः कष्टां दशां न प्राप्नोति।

**4.5.6.**

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति।।

नीतिशतकम्–13

**पदच्छेदः–**

येषाम् न विद्या न तपः न दानम् ज्ञानम् न शीलः न गुणः न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगा चरन्ति।

**भावार्थः–** ये मनुष्याः विद्यया, तपसा, दानेन, ज्ञानेन, सद्वृत्तेन, गुणैः धर्मैः च हीनाः सन्ति ते मरणशीले अस्मिन् संसारे भारभूताः सन्ति तथा अस्मिन् संसारे ते मानवरूपेण मृगाः इव भ्रमन्ति।

**4.5.7. मूर्खजनस्य मैत्री कष्टकरी**

वरं पर्वतदुर्गेषु भ्रान्तम् वनचरैः सह।
न मूर्खजनसम्पक्रः सुरेन्द्रभवनेष्वपि

नीतिशतकम्–14

**पदच्छेदः–**

वरम् पर्वत–दुर्गेषु भ्रान्तम् वनचरैः सह।
न मूर्ख–जन–सम्पक्रः सुरेन्द्र–भवनेषु अपि।।

**भावार्थः–** वन्यैः पशुभिः सह पर्वतेषु निवासः श्रेयस्करः किन्तु मूर्खैः सह देवलोके अपि निवासः कष्टकरः भवति।

**4.5.8.सज्जनानां स्वभावान् वर्णयति–**

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाऽभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

नीतिशतकम्–61

**पदच्छेदः–** विपदि धैर्यम् अथ अभ्युदये क्षमा, सदसि वाक् पटुता युधि विक्रमः। यशसि च अभिरुचिः व्यसनं श्रुतौ, प्रकृति–सिद्धम् इदम् हि महात्मनाम्।

**भावार्थः–** विपत्तौ धैर्यम्, अभ्युत्थाने सहिष्णुत्वं, सभायां वाक्पाटवं, युद्धे पराक्रमः, यशसः

संग्रहेच्छा, वेदशास्त्राभ्यासे आसक्तिः इत्येतत् सज्जनपुरुषाणां निसर्गतः सिद्धं भवति। सज्जनानाम् एते गुणाः स्वाभाविकाः भवन्ति इति।

**अभ्यासः 3**

**1. निम्नलिखितानां पदानां सहायतया वाक्यानि रचयत–**

| | | | |
|---|---|---|---|
| यथा– | धैर्यम् | = | सज्जनाः विपत्तिकाले धैर्यपूर्वकं कार्यं कुर्वन्ति। |
| (क) | व्यसनम् = | | ........................................................................ |
| (ख) | वनचरः | = | ........................................................................ |
| (ग) | धनम् | = | ........................................................................ |
| (घ) | मणिना भूषितः | = | ........................................................................ |
| (ङ) | तृतीया गतिः | = | ........................................................................ |

**2. रिक्तस्थानानि पूरयत–**

| | |
|---|---|
| (क) | यो न.............................................भुङ्क्ते। |
| (ख) | किम् असौ न...................................... । |
| (ग) | शरीरस्थो.............................................रिपुः। |
| (घ) | न मूर्खजन........................................... । |
| (ङ) | ते मर्त्यलोके...................................भारतभूता। |

**3. अधोलिखितानां संयुक्तपदानां पदच्छेदं कुरुत–**

| | | |
|---|---|---|
| यथा– | कुसुमस्तबकस्येव = | कुसुम–स्तबकस्य इव |
| (क) | नाशस्तिस्त्रो | |
| (ख) | भवनेष्वपि | |
| (ग) | खादन्नपि | |
| (घ) | विद्ययाऽलङ्कृतोऽपि | |
| (ङ) | नास्त्युद्यमसमः | |

## 4.6. संस्कृत गीतानि

### 4.6.1. नैव क्लिष्टा न च कठिना

सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया।
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना ।। नैव क्लिष्टा।।
कविकोकिल–वाल्मिकि–विरचिता
रामायणरमणीयकथा।
अतीव–सरला मधुरमंजुला
नैव क्लिष्टा न च कठिना ।। सुरस............... ।।
व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा।
कौरव–पाण्डव–संगरमथिता
नैव क्लिष्टा न च कठिना ।। सुरस.............. ।।
कविकुलगुरु–नव–रसोन्मेषजा
ऋतु–रघु–कुमार–कविता।
विक्रम–शाकुन्तल–मालविका
नैव क्लिष्टा न च कठिना ।। सुरसा.......... ।।

**4.6.2 सादरं समीहताम्**

सादरं समीहताम् वन्दना विधीयताम्
श्रद्धया स्वमातृभू–समर्चना विधीयताम्।।
आपदो भवन्तु वा, विद्युतो लसन्तु वा आयुधानि भूरिशोऽपि मस्तके पतन्तु वा
धीरता न हीयतां, वीरता विधीयतां
निर्भयनेचेतसा पदं पुरो निधीयताम्।। ।। सादरं।।
प्राणदायिनी इयं त्राणदायिनी इयं
शक्तिमुक्तिभक्तिदा सुधाप्रदायिनी इयम्
एतदीयवन्दने सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम्।। ।।सादरं।।

**4.6.3 मृदपि च चन्दनम्**

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम्।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः।
हरिमन्दिरमिदमखिलशरीरम्
धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः
धेनुर्माता परमशिवा।।
नित्यं प्रातः शिवगुणगानं
दीपनुतिः खलु शत्रुपरा।। ।। मृदपि।।
भाग्यविधायि निजार्जितकर्म
यत्र श्रमः श्रियमर्जयति।
त्यागधनानां तपोनिधीनां
गाथां गायति कविवाणी।
गंगाजलमिव नित्यनिर्मलं
ज्ञानं शंसति यतिवाणी।।
यत्र हि नैव स्वदेहविमोहः
युद्धरतानां वीराणाम्।
यत्र हि कृषकः कार्यरतः सन्
पश्यति जीवनसाफल्यम्
जीवनलक्ष्यं न हि धनपदवी
यत्र च परशिवपदसेवा।। ।। मृदपि ।।

**4.6.4. कृत्वा नवदृढ़संकल्पम्**

कृत्वा नवदृढसंकल्पम्
वितरन्तो नवसन्देशम्
घटयामो नव संघटनम्
रचयामो नवमितिहासम्।।

नवमन्वन्तरशिल्पिनः
राष्ट्रसमुन्नतिकांक्षिणः
त्यागधनाः कार्यैकरताः
कृतिनिपुणाः वयमविषण्णाः।। ।। कृत्वा ।।

भेदभावनां निरासयन्तः
दीनदरिद्रान् समुद्धरन्तः:
दुःखवितप्तान् समाश्वसन्तः
कृतसंकल्पान् सदा स्मरन्तः।। ।। कृत्वा ।।
प्रगतिपथान्नहि विचलेम
परम्परां संरक्षेम
समोत्साहिनो निरुद्वेगिनो
नित्यनिरन्तरगतिशीलाः।। ।। कृत्वा ।।

**4.6.5. संस्कृतस्य सेवनम्**

संस्कृतस्य सेवनं, संस्कृताय जीवनम्।
लोकहितसमृद्धये भवतु तनुसमर्पणम्।।

कार्यगौरवं स्मरन्
विघ्नवारिधिं तरन्
लक्ष्यसिद्धिमक्षिसात् करोमि सोद्यमः स्वयम्।
यावदेति संस्कृतं, प्रतिजनं गृहं गृहम्
तवदविरता गतिस्तावदनुपदं पदम्।।

कामये न सम्पदं
भोगसाधनं सुखम्
किंच्दिन्यदाद्रिये विना न संस्कृतोन्नतिम्।
गौरवास्पदं पदं, नेतुमद्य संस्कृतम्
बद्धकटिरयं जनो निधाय जीवनं पणम्।।

भाषिता च वागियं
भाषिता भवेद् ध्रुवम्
भाष्यमाणतां समेत्य राजतां पुनश्चरम्
भरतभूमिभूषणं सर्ववाग्विभूषणम्
संस्कृतिप्रवाहकं संस्कृतं विराजताम्।।

**4.6.6. संस्कृतेन पाठनम्**

संस्कृतेन पाठनं संस्कृताय जीवनम्।
संस्कृतेन पाठनं संस्कृताय अर्पणम्।।

एकैकपदमपि निक्षिपाम तत्पथे
प्रत्यूहकण्टकम् उत्खनाम तत्पथे
लक्ष्यमुन्नतं तदा प्राप्नुयाम तत्पथे।। संस्कृतेन।।

चिन्तितं व्रतमिदम् आचराम जीवने
स्वीकृतं व्रतमिदं न त्यजाम जीवने
परजनैरपि व्रतं कारयाम जीवने।। संस्कृतेन।।

संस्कृतेन चिन्तनं मानसोल्लासनम्
संस्कृतेन लेखनं सर्वकार्यसाधनम्
संस्कृतेन भाषणं भरतवर्षभूषणम्।। संस्कृतेन।।

### 4.6.7. अवनितलं पुनरवतीर्णा स्यात्

अवनितलं पुनरवतीर्णा स्यात्
संस्कृतगंगाधरा
धीरभगीरथवंशोऽस्माकं
वयं तु कृतनिर्धाराः।।

निपततु पण्डितहरशिरसि
प्रवहतु नित्यमिदं वचसि
प्रविशतु वैयाकरणमुखं
पुनरपि वहताज्जनमनसि
पुत्रसहस्रं समुद्धृतं स्यात्
यान्तु च जन्मविकाराः।। धीरभगीरथ...।

ग्रामं ग्रामं गच्छाम
संस्कृतशिक्षां यच्छाम
सर्वेषामपि तृप्तिहितार्थं
स्वक्लेशं न हिं गणयेम
कृते प्रयत्ने किं न लभेत
एवं सन्ति विचाराः।। धीरभगीर....।

या माता संस्कृतिमूला
यस्या व्याप्तिस्सुविशाला
वांड्मयरूपा सा भवतु
लसतु चिरं सा वाङ्माला
सुरवाणीं जनवाणीं कर्तुं
यतामहे कृतिशूराः।। धीरभगीरथ....।

### 4.6.8. स्वागतगीतम्

महामहनीय मेधाविन्
त्वदीयं स्वागतं कुर्मः।
गुरो गीर्वाणभाषायाः
त्वदीयं स्वागतं कुर्मः।। ध्रु ।।
दिनं नो धन्यतममेतत्
इयं मंगलमयी वेला।
वयं यद् बालका एते
त्वदीयं स्वागतं कुर्मः।। 1 ।।

न काचिद् भावनाभक्तिः
न काचित् साधनाशक्तिः
परं श्रद्धासुमंज्जलिभिः
त्वदीयं स्वागतं कुर्मः।। 2।।
किमधिकं ब्रूमहे श्रीमन्
निवेदनमेतदेवैकम्।
न बाला विस्मृतिं नेयाः
त्वदीयं स्वागतं कुर्मः।।3।।

**4.6.9. विमानयानं रचयाम**

राधव! माधव! सीते! ललिते!
विमानयानं रचयाम।
नीले गगने विपुले विमले
वायुविहारं करवाम।
उन्नतवृक्षं तुंग भवनं
क्रान्त्वाकाशं खलु याम।
कृत्वा हिमवन्तं सोपानं
चन्दिरलोकं प्रविशाम।।1।।
शुक्रश्चन्द्रः सूर्यो गुरुरिति
ग्रहान् हि सर्वान् गणयाम।
विविधाः सुन्दरताराश्चित्वा
मौक्तिकहारं रचयाम।। 2।।
अम्बुदमालाम् अम्बरभूषाम्
आदायैव हि प्रतियाम।
दुःखित–पिडित–कृषिकजनानां
गणेषु हर्षं जनयाम ।। 3।।

**4.6.10. एक श्रृगालः**

एकः श्रृगालः, वनं गच्छति
पिपासा, तस्य बुभुक्षा
पिपासया बुभुक्षया च वनं गच्छति
सः वनं गच्छति, सः वनं गच्छति।
तत्र गच्छति, किमपि न लभते
इतोऽपि गच्छति, किमपि न लभते
श्रान्तः जायते, खिन्नः जायते
सः, श्रान्तः जायते, खिन्नः जायते
किं च करोति? सः किं च करोति?
वामतः पश्यति, दक्षिणतः पश्यति
अग्रतः पश्यति, पृष्ठतः पश्यति
स्वेदः जायते, तृषा जायते
तस्य, स्वेदः जायते, तृषा जायते
किं च पश्यति? सः किं च पश्यति?

पश्यति द्राक्षालतां
सः पश्यति द्राक्षाफलम्
उपरि उपरि लतासु दृश्यते च तत्फलम्
अनुरक्षणं तन्मुखे रसः जायते
किं च करोति? सः किं च करोति?
एकवारम् उत्पतति, द्विवारम् उत्पतति
त्रिवारम् उत्पतति पुनः पुनः उत्पतति
स्वेदः जायते तस्य श्रमः जायते
किं कथयति? सः किं कथयति?
आम्लं द्राक्षाफलम्
आम्लं द्राक्षाफलम्
इत्येवं कथयति, पलायते
इत्येवं कथयति, पलायते!!

**4.6.11. चटक ! चटक !**

चटक, चटक, रे चटक!
चिवँ् चिवँ्, कूजसि त्वं विहग!
नीडे निवससि सुखेन डयसे
खादसि फलानि मधुराणि।
विहरसि विमले विपुले गगने
नास्ति जनः खलु वारयिता।।
मातापितराविह मम न स्तः
एकाकी खलु खिन्नोऽहम्
एहि समीपं चिवँ् चिवँ् मित्र
ददामि तुभ्यं बहुधान्यम्।।
चणकं स्वीकरु पिब रे नीरं
त्वं पुनरपि रट चिवँ् चिवँ् चिवँ्
तोषय मां कुरु मधुरालापं
पाठय मामपि तव भाषाम्।।

## 4.7 सारांशः

भाषा व्यवहारम् अपेक्षते। अर्थात् यदि कस्याश्चित् भाषायाः व्यवहारः सततं जायमानः अस्ति तर्हि एव सा समाजम् अङ्गीकरोति सामजश्च ताम्। संस्कृतस्य सन्दर्भे अपि इयं स्थितिः दृढायते।वस्तुतः संस्कृतभाषा सरलातिसरला वर्तते। अस्यां भाषायां विचार–विनिमयः अत्यन्तं सरलः। किन्तु संस्कृतभाषां प्रति जनानां मनस्सु एका दृढ़ा धारणा विद्यते यदियं कठिना इति। अस्मिन् एकके वयं व्यावहारिकस्य संस्कृतस्य माध्यमेन ज्ञातवन्तः यत् सर्वविधः व्यवहारः अपि संस्कृतभाषायां कर्त्तुं शक्यः एव। अस्माकं शरीरस्य सर्वेषाम् अवयानां नामानि संस्कृतेन अपि व्यवहर्त्तुं शक्यन्ते। संस्कृते सुविशालं सुभाषितसाहित्यं विद्यते। अत्र सुभाषितरत्नभण्डागारः, भर्तृहरिनीतिशतकम्, चाणक्यनीतिः इत्यादयः प्रसिद्धाः ग्रन्थाः। गीतानि हृदयावर्जकानि ज्ञानप्रदानि सामरस्यवर्धकानि च भवन्ति। सम्प्रति संस्कृते बहूनि गीतानि रचितानि सन्ति। तत्र कानिचन मौलिकानि, कानिचन अनूदितानि च सन्ति। संगीतबद्धानि एतानि गीतानि मनोरंजनकानि अपि भवन्ति।

## 4.8 अभ्यास प्रश्नानाम् उत्तराणि–

<u>अभ्यासः 01</u>

**प्रश्नः01वाक्यप्रयोगः–**

1 पत्रालये पत्राणाम् आदान–प्रदानं भवति।

2 कार्यालये कार्यं भवति।

3 मुद्रणालये समाचारपत्रस्य मुद्रणं भवति।

4 चिकित्सालये चिकित्साकार्यं भवति।

5 ग्रन्थालये पुस्तकानां पठनं भवति।

**प्रश्नः02 किं कार्यं कुत्र–**

1 अनाथालये– सेवा, 2 देवालये– पूजा, 3 पाठशालायां– पठनम्, 4 पाकशालायां– भोजननिर्माणम्, 5 बालोद्याने–मनोरंजनम्, 6 उपहारगृहे–भोजनम्, 7 लोकयानस्थानके– यानानाम् आवागमनम्, 8 चलचित्रगृहे–चित्रदर्शनम्, 9 यन्त्रागारे–यन्त्रनिर्माणम्, 10 आपणे– वस्तुविक्रयणम्

<u>अभ्यासः 02</u>

**प्रश्नः01 शरीरावयवस्य कार्याणि–**

1 कर्णः– श्रवणम्, 2 नासिका– घ्राणम्, 3 दन्ताः–चर्वणम्, 4 केशाः– मुण्डरक्षणम्, 5 हस्तौ–कार्यम्, 6 पादौ– संचरणम्, 7 ग्रीवा– मुखभ्रमणम्, 8 जिह्वा– स्वादः, 9 कण्ठः–स्वरः, 10 ललाटः–तिलकम्

**प्रश्नः02 वाक्यप्रयोगः– स्वयं विधेयः**

<u>अभ्यासः 03</u>

**प्रश्नः01 वाक्यप्रयोगः– स्वयं विधेयः**
**प्रश्नः02 रिक्तस्थानम्–**
1 ददाति, 2 भयंकरः, 3 महान्, 4 सम्पक्रः, 5 भुवि

**प्रश्नः02 पदच्छेदः**

1 नाशः तिस्त्रः, 2 भवनेषु अपि, 3 खादन् अपि, 4 विद्यया अलंकृतः अपि

## 4.9 सन्दर्भग्रन्थसूची

1. संस्कृत–व्यवहार–साहस्त्री, प्रकाशकः संस्कृत भारती, 25, पं0 दीनदयाल उपाध्याय मार्गः, राऊज एवेन्यु, नई दिल्ली–110002, दूरभाषः 01123236711, 23236722

2. नीतिशतकम्, भर्तृहरिः, टीकाकारः डॉ0 गंगासागररायः, प्रकाशकः चौखम्बा पब्लिशर्स, गोकुल भवन, के0 37/109 गोपाल मन्दिर लेन, वाराणसी।

3. संस्कृत हिन्दी शब्दकोशः, डॉ0 श्री प्रकाश पाण्डेयः, प्रकाशकः संस्कृत भारती, माता मन्दिर गली, झण्डेवाला, नई दिल्ली 110055।

4. प्रौढ़ रचनानुवादकौमुदी, डॉ0 कपिलदेव द्विवेदी, प्रकाशकः विश्वविद्यालय प्रकाशक, चौक वाराणसी 221001, दूरभाषः 0542353082, 35374

5. शिशुसंस्कृतम्, गेयसंस्कृतम्, गीतसंस्कृतम् प्रकाशकः संस्कृत भारती, अक्षरम्, 8 उपमार्गः 2 घट्टः, गिरिनगरम्, बेंगलूरू–560085

## 4.10. सहायकोपयोगी पाठ्यसामग्री

संस्कृत–व्यवहार–साहस्त्री (संस्कृत भारती, प्राप्ति संकेतः सन्दर्भग्रन्थसूची मध्ये द्रष्टुं शक्यते)

# चतुर्थखण्डः
# उपसर्ग–प्रत्ययपरिचयः प्रयोगश्च

# प्रथम इकाई उपसर्ग–प्रत्ययपरिचयः प्रयोगश्च

रूपरेखा

1.1. प्रस्तावना
1.2 उद्देश्यम्
1.3 उपसर्गपरिचयः
1.4 द्वाविंशतिः उपसर्गाः
    1.4.1 उपसर्गनियमाः
    1.4.2 उपसर्गाणां वाक्यप्रयोगाः
1.5 प्रत्ययप्रयोगः
1.6 सारांशः
1.7 प्रश्नानाम् उत्तराणि
1.8 सन्दर्भग्रन्थसूची
1.9 सहायकोपयोगि–पाठ्यसामग्री

## 1.1. प्रस्तावना

भाषायाः प्रकृतिः अतीव सरला भवति। अस्याः प्रकृतेः नियमनाय व्याकरणं भवति। सामान्यतया व्याकरणं तत् शास्त्रं भवति, यत् विभिन्नैः नियमैः भाषायाः नियमनं बन्धनं वा करोति। संस्कृतव्याकरणे उपसर्गाः धातुभिः सह मिलित्वा तेषाम् अर्थे परिवर्तनम् आनयन्ति। एते उपसर्गाः संख्यायां द्वाविंशतिः भवन्ति। एवमेव पदस्य निर्माणे प्रत्ययानां महती भूमिका वर्तते। संस्कृतभाषायाः प्रत्येकं पदं शब्दः वा प्रत्ययात् निष्पन्नः भवति। एते प्रत्ययाः भाषायाः प्रयोगे कौशलं वर्धयन्ति।

## 1.2 उद्देश्यम्

इमाम् अन्वितिं पठित्वा भवन्तः–

1. उपसर्गाणां प्रयोगं कर्तुं शक्ष्यन्ति।
2. उपसर्गेण धात्वर्थः कथं परिवर्त्यते इति ज्ञास्यन्ति।
3. शतृप्रत्ययस्य प्रयोगकौशलं प्राप्स्यन्ति।
4. शानच्प्रत्ययस्य प्रयोगविधिं ज्ञास्यन्ति।
5. क्त–क्तवतु प्रत्यययोः प्रयोगविधिं ज्ञास्यन्ति।
6. तव्यत्–अनीयर्प्रत्यययोः भेदज्ञानं करिष्यन्ति।

## 1.3 उपसर्गपरिचयः

संस्कृतभाषायां अलंकारिकवाक्यानां प्रयोगे उपसर्गाणां महती भूमिका अस्ति। उपसर्गाः कदाचित् शब्दानाम् अर्थं, कदाचित् धातूनाम् अर्थं, कदाचित् उभयोः अर्थं वर्धयन्ति न्यूनं च कुर्वन्ति। उपसर्गाः द्वाविशतिसंख्यकाः भवन्ति। उपसर्गाः– प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्., नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप।

उपसर्गाणाम् अर्थपरिवर्तनसम्बन्धे एकं सुप्रसिद्धं पद्यम् अस्ति–

**उपसर्गेण धात्वर्थो बलाद् अन्यत्र नीयते।**

**प्रहाराहारसंहारविहारपरिहारवत्।।**

संस्कृते 'हृञ्' धातुः हरणार्थे भवति, अर्थात् हरण अर्थे प्रयुक्ता अस्ति। किन्तु सामान्यरूपेण हृ हरणे धातोः निष्पन्नः हारशब्दः मालायाः अर्थे प्रयुज्यते। किन्तु यदि हृ धातोः पूर्वं उपसर्गः युज्यते तर्हि धातोः मूले अर्थे परिवर्तनं भवति। यथा–

आ+हार – आहारः – भोजन करना।

वि+हार – विहारः – भ्रमण करना।

प्र+ हार– प्रहारः– मारना।

परि+हार– परिहारः – दूर करना।

## 1.4 द्वाविंशतिः उपसर्गाः

उपसर्गाः यदा येन शब्देन क्रियया सह मिलन्ति तदा स्वीयम् अर्थं प्रकटयन्ति–

| क्र | उपसर्ग | अर्थ | उपसर्ग+विच्छेदः | शब्दः | अर्थः |
|---|---|---|---|---|---|
| 1 | प्र | अधिक | प्र+चलति | प्रचलति | चलना। |
| 2 | परा | विपरीत/पीछे | परा+जयते | पराजयते | हारना। |
| 3 | अप | दूर | अप+सरति | अपसरति | हटना/दूर जाना। |
| 4 | सम् | भलीभाँति | सम्+गृह्णाति | सङ्गृह्णाति | संग्रह करना। |
| 5 | अनु | पीछे/अनुकूल | अनु+गच्छति | अनुगच्छति | पीछे चलना। |
| 6 | अव | नीचे/दूर | अव+तरति | अवतरति | नीचे उतरना। |
| 7 | निस् | बिना/बाहर | निस्+क्रामति | निष्क्रामति | बाहर निकलना। |
| 8 | निर् | निकलना/बाहर | निर्+गच्छति | निर्गच्छति | निकलना। |
| 9 | दुस् | कठिन | दुस्+तरति | दुस्तरति | संकट से पार जाना। |
| 10 | दुर् | बुरा | दुर्+जीवति | दुर्जीवति | कठिन जीवन व्यतीतकरना। |
| 11 | वि | अलग/बिना | वि+हरन्ति | विहरन्ति | विहार करना। |
| 12 | आङ्. | तक | आ+दिशति | आदिशति। | आदेश करना। |
| 13 | नि | नीचे | नि+पतति | निपतति | गिरना। |
| 14 | अधि | ऊपर | अधि+वसति | अधिवसति | रहना। |
| 15 | अपि | निकट | अपि+दधाति | अपिदधाति | बन्द करना। |
| 16 | अति | बहुत | अति+चरति | अतिचरति | अति आचरण करना। |
| 17 | सु | सुन्दर/बहुत | सु+चूर्णयति | सुचूर्णयति | बहुत बारीक पीसना। |
| 18 | उत् | ऊपर | उत्+तिष्ठति | उत्तिष्ठति | उठना। |
| 19 | अभि | ओर | अभि+नयति | अभिनयति | अभिनय करना। |

| | | | | | |
|---|---|---|---|---|---|
| 20 | प्रति | ओर / विपरीत | प्रति+गच्छति | प्रतिगच्छति | की ओर जाना। |
| 21 | परि | चारों ओर | परि+ईक्षते | परीक्षते | परीक्षा लेना। |
| 22 | उप | समीप | उप+वसति | उपवसति | निवास करना। |

### 1.4.1 उपसर्गनियमाः

1. उपसर्गः धातोः पूर्वं भवति। अत्र आ उपसर्गः अस्ति, गम् धातुना गच्छति क्रियापदम् अस्ति।
   **यथा–** 1. आ+गच्छति – आगच्छति।
   2. प्र+चलति – प्रचलति।
2. उपसर्गेण कदाचित् धातोः अर्थः परिवर्तते।
   **यथा–** 1. स्मरति– स्मरण करना। विस्मरति – भूलना।
   2. गच्छति – जाना। आगच्छति – जाना।
3. कदाचित् उपसर्गाः धातोः अर्थस्य पोषणं कुर्वन्ति–
   **यथा–** 1. शोभते – सुन्दर। सुशोभते – बहुत सुन्दर।
   2. लिखति – लिखति। विलिखिति – सुन्दर लिखना।
4. कदाचित् धातोः पूर्वं द्वित्राः उपसर्गाः अपि भवन्ति–
   **यथा–** 1. प्रति+आ+गच्छति – प्रत्यागच्छति –
   2. निर्+आ+करोति – निराकरोति –
   3. सम्+उत्+आ+हरति– समुदाहरति –
   4. वि+अव+स्थापयति – व्यवस्थापयति –
5. उपसर्गकारणात् कदाचित् परस्मैपदिधातुः आत्मनेपदिरूपम्, आत्मनेपदिधातुः परस्मैपदिरूपं च प्राप्नोति–
   **यथा–** 1. वि+जयति (परस्मैपदी) – विजयते (आत्मनेपदी)
   2. प्र+तिष्ठति (परस्मैपदी) – प्रतिष्ठते (आत्मनेपदी)
   3. वि+क्रीणाति (परस्मैपदी) – विक्रीणाते (आत्मनेपदी)
   4. वि+रमते (आत्मनेपदी) – विरमति (परस्मैपदी)
6. केचन शब्दाः उपसर्गतुल्याः एव सन्ति, किन्तु उपसर्गाः न भवन्ति–
   **यथा–** अलम्, बहिस्, अन्तर् स्वी, उष्णी, सज्जी इत्यादयः।
   अलम्+करोति – अलंकरोति।
   बहिस्+करोति – बहिष्करोति।
   अन्तर्+भवति – अन्तर्भवति।
   स्वी+करोति – स्वीकरोति।
   उष्णी+करोति – उष्णीकरोति।
   सज्जी+करोति – सज्जीकरोति।

### 1.4.2 उपसर्गाणां वाक्यप्रयोगाः

अत्र उपसर्गेण युक्ताः प्रयोगाः प्रदत्ताः भवन्तः एतान् पठन्तु अभ्यासं च कुर्वन्तु–

**'प्र' उपसर्गः**

1. प्र+ अर्थः – प्रार्थना करना – सर्वे भूपतिं प्रार्थयन्ते।

2. प्र+ कृ – अधिक करना – विद्यार्थिनः परिश्रमं प्रकुर्वते।
3. प्र+ चर् – प्रचार होना – संस्कृतस्य गाथा लोकेषु प्रचरिष्यति।
4. प्र+ विश् – प्रवेश करना – अस्माकं गृहे अतिथयः प्रविशन्ति।
5. प्र+ लप् – व्यर्थ बोलना – मूर्खः सर्वदा प्रलपति।

**'परा' उपसर्गः**

1. परा+ जि – हारना – रावणः रामात् पराजयते।
2. परा+ भू – हारना – कौरवाः पाण्डेभ्यः पराभवन्ति।

**'अप' उपसर्गः**

1. अप+ कृ – बुराई करना – दुष्टाः सज्जनं अपकुर्वन्ति।
2. अप+ नी – हटाना – अधिकारी अतिक्रमणम् अपनयति।
3. अप+ हृ – चुराना – चौराः बहुमूल्यानि वस्तूनि अपहरन्ति।
4. अप+ वद् – निन्दा करना – नीचः साधुम् अपवदति।

**'सम्' उपसर्गः**

1. सम्+ कृ – संस्कार करना – शिक्षकः छात्रान् संस्करोति।
2. सम्+ गम् – मिलना – गंगा यमुना सरस्वती च प्रयागे सङ्गच्छन्ति।
3. सम्+ चर् – आना जाना – राष्ट्रपतिः वायुयानेन संचरते।
4. सम्+ भू – पैदा होना – भारते धर्मप्रवर्तकाः सम्भवन्ति।

**'अनु' उपसर्गः**

1. अनु+ इ – पीछे जाना – वत्सः मातरं स्नेहात् अन्वेति।
2. अनु+ कृ – अनुकरण करना – कार्यकर्ता नेतृन् अनुकरोति।
3. अनु+ गम् – पीछा चलना – शिष्यः गुरुम् अनुगच्छति।
4. अनु+ ज्ञा – आज्ञा देना – पिता पुत्रमृ अनुजानाति।

**'अव' उपसर्गः**

1. अव+ गम् – जानना – मित्र! अहं भवतः व्यक्तित्वम् अवगच्छामि।
2. अव+ गुण्ठ् – घूँघट निकालना – वधूः श्वसुरं दृष्ट्वा मुखम् अवगुण्ठयति।
3. अव+ धा – ध्यान देना – माता शिशुम् अवधत्ते।
4. अव+ स्था – ठहरना – यात्रिणः धर्मशालायाम्अवतिष्ठन्ति।

**'निस्' उपसर्गः**

1. निस्+ क्रम् – निकलना – पक्षी निडात् निष्क्रमति।
2. निस्+ तृ – पार होना – नाविकः नौकया जनान् निस्तारयति।
3. निस्+ सृ – निकलना – गगा हिमालयात् निस्सरति।
4. निस्+ कुष – खीचकर निकालना – नकुलः सर्पं बिलात् निष्कुष्णाति।

**'निर्' उपसर्गः**

1. निर्+ अस् – हटाना – सज्जनः पापं निरस्यति।
2. निर्+ दिश् – बताना – नायकः सेवकान् निर्दिशति।
3. निर्+ वह् – पूरा करना – पिता गृहस्य दायित्वं निर्वहति।
4. निर्+ ईक्ष् – देखना – सैनिकः आतंकवादिनं निरीक्षति।

**'दुस्' उपसर्गः**

1. दुस्+ स्था – खराब स्थिति – मूढः अनध्यायेन दुःस्थितिं प्राप्नोति।
2. दुस्+ कृ – खराब काम करना– खलः सततं दुष्करोति।

**'दुर्' उपसर्गः**

1. दुर्+ गम् – दुर्गति होना – परिश्रेमण बिना दुर्गतिः भवति।
2. दुर्+ नी – बुरा व्यवहार करना – दुष्टः सर्वैः सह दुर्णयति।
3. दुर्+ गम् – दुःख से जाना – भिक्षुकः भिक्षां बिना दुर्गच्छति।

**'वि' उपसर्गः**

1. वि+ तृ – बाटना – धनिकः शैत्यकाले कम्बलं वितरति।
2. वि+ लप् – विलाप करना – आरक्षेण गृहीतः चोरः विलपति।
3. वि+ श्वस् – विश्वास करना – जनाः ईश्वरे विश्वसन्ति।
4. वि+ वद् –झगड़ा करना – मूर्खाः परस्परं विवदन्ते।

**'आ' उपसर्गः**

1. आ+ गम् – आना – मम गृहे अद्य अतिथयः आगच्छन्ति।
2. आ+ चर् – व्यवहार करना – सर्वदा धर्मस्य आचरणं करणीयम्।
3. आ+ नी – लाना – पिता पुत्राय पयोहिमम् आनयति।
4. आ+ पत् – आ पड़ना – दुःखानि दुर्भाग्यात् आपतन्ति।

**'नि' उपसर्गः**

1. नि+ पत् – गिरना – बालकः द्विचक्रिकायाः निपतति।
2. नि+ वस् – निवास करना– प्रधानमन्त्री देहल्यां निवसति।
3. नि+ वृत् – लौटना – छात्राः विद्यालयात् निवर्तते।
4. नि+ मन्त्र – निमन्त्रित करना – राजा ब्रह्मणान् भोजनाय निमन्त्रयति।

**'अधि' उपसर्गः**

1. अधि+ कृ – अधिकार करना – संस्कृतज्ञः संस्कृतभाषाम् अधिकरोति।
2. अधि+ वस् – रहना – विष्णुः समुद्रम् अधिवसति।
3. अधि+ स्था – स्थित रहना – सज्जनाः स्वकर्तव्ये अधितिष्ठन्ति।
4. अधि+ आस्– बैठना – वानरः वृक्षम् अध्यास्ते।

**'अपि' उपसर्गः**

1. अपि+ धा – बन्द करना – सेवकः द्वारम् अपिदधाति।

**'अति' उपसर्गः**

1. अति+ चर् – विरुद्ध आचरणकरना– उदण्डः सर्वदा अतिचरति।
2. अति+ वह् – बिताना – मन्दमतिः स्वकीयं जीवनम् अतिवाहयति।
3. अति+ क्रम् – गुजरना – समयः शनैः शनैः अतिक्रमति।
4. अति+

**'सु' उपसर्गः**

1. सु+ चूर्ण – बहुत बारीक पीसना– वैद्यः औषधं सुचूर्णयति।
2. सु+ कृ – अच्छा करना – सज्जनः सर्वदा सुकरोति।
3. सु+ शुभ – शोभा पाना – विद्वांसः मंचेषु सुशोभन्ते।

**'उत्' उपसर्गः**

1. उत्+ चर् – कहना – छात्राः श्लोकम् उच्चरन्ते।
2. उत्+ तृ – पार करना – जनाः नौकया नदीम् उत्तरन्ति।
3. उत्+ स्था – उठना – अहं प्रातःचतुर्वादने उत्तिष्ठामि।
4. उत्+ पत् – उड़ना – खगाः आकाशे उत्पतन्ति।

**'अभि' उपसर्गः**

1. अभि+ अर्थ – प्रार्थना करना– भिक्षुकः भिक्षार्थं जनान् अभ्यर्थ्यते।
2. अभि+ नी – अभिनय करना – नायकः चलचित्रेषु अभिनयति।
3. अभि+ धा – कहना – व्यासः कृष्णकथाम् अभिदधाति।
4. अभि+ नन्द – अभिनन्दन करना – आचार्यः प्रतिभासम्पन्नम् अभिनन्दयति।

**'प्रति' उपसर्गः**

1. प्रति+ गम् – लौटना – जलं समुद्रात् आकाशं प्रतिगच्छति।
2. प्रति+ ज्ञा – प्रतिज्ञा करना– सांसदः संसदभवने प्रतिजानीते।
3. प्रति+ ईक्ष – प्रतीक्षा करना– यात्री लोकयानं प्रतीक्षते।
4. प्रति+ वद् – उत्तर देना – अधिवक्ता न्यायाधीशं प्रतिवदति।

**'परि' उपसर्गः**

1. परि+ चर् – सेवा करना – आज्ञाकारी पुत्रः मातापितरौ परिचरति।
2. परि+ नी – विवाह करना – दुष्यन्तः शकुन्तलां परिणयति।
3. परि+ ईक्ष – परीक्षा लेना – आचार्यः शिष्यान् परीक्षते।
4. परि+ धा – पहनना – वसन्तपंचम्यां जनाः पीतवस्त्राणि परिदाति।

**'उप' उपसर्गः**

1. उप+ आस् – पूजा करना – भक्ताः देवम् उपासते।
2. उप+ चर् – सेवा करना – सेवकः स्वामिनम् उपचरति।
3. उप+ दिश् – उपदेश देना – सन्ताः धर्मम् उपदिशन्ति।
4. उप+ विश् – बैठना – छात्राः कक्षायाम् उपविशन्ति।

**अभ्यासप्रश्नाः 01 उपसर्गेण सह धातून् योजयित्वा क्रियापदं रचयन्तु–**

1. प्र+अर्थ –
2. अप+ईक्ष –

3. सम्+गम् – 4. अनु+ज्ञा –

5. अव+तृ – **6.** निर्+आ+कृ–

7. दुर्+गम् – **8.** वि+नि+पत् –

9. अधि+वस् – **10.** अभि+नि+विस् –

**अभ्यासप्रश्नाः 02 अधः प्रदत्तेषु उपसर्गं क्रियापदं च पृथक्–पृथक् लिखन्तु–**

**1.** प्रत्यागच्छति –
**2.** उपदिशति –
**3.** परीक्ष्यते –
**4.** अभिनयति –
**5.** उदेति –
**6.** निवर्तते –
**7.** आक्षिपति –
**8.** अनुतिष्ठति –
**9.** पराजयते –
**10.** निस्तरति –

**अभ्यासप्रश्नाः 03 अधो लिखितानाम् उपसर्गयुक्तक्रियापदानां सहयोगेन वाक्यानि रचयन्तु–**

**यथा– क्रियापदम्–**वितरति–**वाक्यप्रयोगः–** अध्यापकः प्रश्नपत्राणि वितरति।

**1.** प्रविशन्ति –
**2.** अपनयति –
**3.** अनुगच्छति –
**4.** निस्सरति –
**5.** आगच्छन्ति –
**6.** अधिकरोति –

## 1.5 प्रत्ययप्रयोगः

**शतृप्रत्ययः** – अधोलिखितानि वाक्यानि पठन्तु–

1. बालकः **पठन्** निद्रां कृतवान्।
2. बालः **क्रीडन्** प्रसन्नः अभवत्।
3. भक्तः देवं **पश्यन्** प्रदक्षिणां करोति।
4. अरविन्दः गीतं **श्रृण्वन्** चित्रं लिखति।
5. पण्डितः मन्त्रं **जानन्** प्रयोगं करोति।
6. रामः विद्यालयं **गच्छन्** पाठं स्मरति।

**शतृपरिचयः**"लटः शतृशानचावप्रथमासमानाधिकरणे" शतृप्रत्ययः निरन्तरं जायमानायाः वर्तमानकालस्य क्रियायाः भावं प्रकटयति। अनेन अयम् अभिप्रायः यत् क्रियायाः आरम्भः तु जातः

किन्तु समाप्तिः न जाता इति। शतृप्रत्ययस्य (श्+अत्+ऋ) केवलम् 'अत्' एव अवशिष्यते। श तथा ऋ इत्यनयोः लोपः भवति।

**यथा– पठ्+शतृ (अत्)=पठत्। लिख्+शतृ (अत्)=लिखत्। क्रीड्+शतृ (अत्)=क्रीडत्।**

शतृप्रत्ययः केवलं परस्मैपदिधातुभिः योज्यते। आत्मनेपदिधातुभिः शानच्प्रत्ययः भवति।

शतृप्रत्ययात् निष्पन्नानि रूपाणि कृदन्तानि विशेषणानि भवन्ति। एतेषां रूपाणि त्रिषु लिङ्गेषु सप्तविभक्तिषु त्रिषु वचनेषु च प्रचलन्ति।

यथा– पत्+शतृ = पतत् – पतन् (पु.) पतन्ती (स्त्री.) पतत् (नपु.)

अत्र अवधेयम्– पुंलिङ्गे शतृप्रत्ययस्य रूपाणि भवत् शब्दवत्, स्त्रीलिंगे 'भवती शब्दवत्' नपुंसकलिंगे 'जगत् शब्दवत्' चलन्ति।

यथा– एकवचनम् द्विवचनम् बहुवचनम्पुल्लिंगे प्रथमाविभक्तौ – पठन् पठन्तौ पठन्तःस्त्रीलिंगे प्रथमाविभक्तौ– पठन्ती पठन्त्यौ पठन्त्यः।

नपुंसकलिंगे प्रथमाविभक्तौ– पठत् पठती पठन्ति।

भवताम् अभ्यासार्थम् अत्र केवलं त्रिषु लिंगेषु प्रथमाविभक्तेः एकवचनस्य एव रूपाणि दीयन्ते–

| धातु अर्थ | | नपुंसकलिंग | पुल्लिंग | स्त्रीलिंग | |
|---|---|---|---|---|---|
| 1. | पठ् | पढ़ना | पठत् | पठन् | पठन्ती |
| 2. | कथ | कहना | कथयत् | कथयन् | कथयन्ती |
| 3. | क्रीड् | खेलना | क्रीडत् | क्रीडन् | क्रीडन्ती |
| 4. | खाद् | खाना | खादत् | खादन् | खादन्ती |
| 5. | चल् | चलना | चलत् | चलन् | चलन्ती |
| 6. | ज्ञा | जानना | जानत् | जानन् | जानती |
| 7. | वस् | रहना | वसत् | वसन् | वसन्ती |
| 8. | लिख् | लिखना | लिखत् | लिखन् | लिखन्ती |
| 9. | दा | देना | ददत् | ददन् | ददती |
| 10. | हस् | हंसना | हसत् | हसन् | हसन्ती |

**अभ्यासप्रश्नाः 04 अधोलिखितम् उदाहरणं दृष्ट्वा वाक्यानि रचयन्तु–**

उदाहरणम्– शिशुः धावति पतति– शिशुः धावन् पतति।

1. अनुजः आगच्छति वदति –
2. पिता पश्यति पृच्छति –
3. राघवः जिघ्रति तुष्यति –
4. रमेशः वादयति नृत्यति–

5. रजकः क्षालयति पश्यति –
6.बालकः इच्छति स्पृशति –
7. शिक्षकः पाठयति लिखति –
8. कृष्णः चोरयति चिन्तयति –

**शानच्– अधोलिखितानि वाक्यानि पठन्तु–**

1. भक्तः देवं वन्दमानः गच्छति।
2. आकाशे प्रकाशमानः चन्द्रः शोभते।
3. कार्यक्रमे भाषमाणः अध्यक्षः विद्वान् अस्ति।
4. भिक्षुकः याचमानः दैन्यं प्रदर्शयति।
5. कार्यं कुर्वाणः छात्रः वार्तालापं करोति।

**शानच् प्रत्ययपरिचयः–** शानच् प्रत्ययः तस्याः प्रक्रियायाः द्योतको विद्यते, यस्याः प्रारम्भः तु जातः किन्तु समाप्तिः न जाता। शानच् प्रत्ययस्य प्रारम्भे विद्यमानस्य 'श् तथा अन्ते विद्यमानस्य च इत्यस्य लोपः भवति। अतः केवलम् आन इति अवशिष्यते। एषः प्रत्ययः वर्तमानकालार्थे केवलम् आत्मनेपदिधातुभिः भवति। यथा–

कम्प्+शानच– कम्पमान। अत्र 'श' 'च' अनयोः लोपः संजातः। अतः कम्पमान इति रूपं सिद्धयति। शानच् प्रत्ययान्त पदानि त्रिषु लिंगेषु त्रिषु वचनेषु सप्तविभक्तिषु च भवन्ति।

शानच् प्रत्ययान्तरूपाणां निर्माणार्थं धातोः लट्लकारस्य प्रथमपुरुषस्य बहुवचनरूपं दृष्ट्वा रूपं निर्मातुं शक्यते। यथा–

| | | |
|---|---|---|
| वर्धते – | वर्धन्ते | – वर्धमानः |
| चिनुते – | चिन्वते | – चिन्वानः |
| कुरुते – | कुर्वते | – कुर्वाणः |
| भुड्क्ते – | भुंजते | – भुंजानः |

**अत्र अवधेयम्–** शानच् प्रत्ययस्य रूपाणि पुंलिङ्गे 'राम' शब्दवत्, स्त्रीलिंगे 'रमा' शब्दवत्' नपुंसकलिंगे 'फल' शब्दवत् चलन्ति।

| यथा– | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुल्लिंगे प्रथमाविभक्तौ – | भाषमाणः | भाषमाणौ | भाषमाणाः |
| स्त्रीलिंगे प्रथमाविभक्तौ– | भाषमाणा | भाषमाणे | भाषमाणाः |
| न्पुंसकलिंगे प्रथमाविभक्तौ– | भाषमाणम् | भाषमाणे | भाषमाणानि |

भवताम् अभ्यासार्थम् अत्र केवलं त्रिषु लिंगेषु प्रथमाविभक्तेः एकवचनस्य एव रूपाणि दीयन्ते–

धातु – क्रिया– अर्थ – पुल्लिंगे स्त्रीलिंगे नपुंसकलिंगे

1. कम्प् – कम्पते – कांपना – कम्पमानः कम्पमाना कम्पमानम्
2. वन्द – वन्दते – वन्दना करना–वन्दमानः वन्दमाना वन्दमानम्
3. आस् – आसते – बैठना – आसमानः आसमाना आसमानम्
4. ईक्ष – ईक्षते – देखना – ईक्षमाणः ईक्षमाणा ईक्षमाणम्
5. यत् – यतते –यत्नकरना – यतमानः यतमानाःयतमानम्
6. वृत् – वर्तते – होना – वर्तमानः वर्तमाना वर्तमानम्
7. सेव् – सेवते – सेवाकरना – सेवमानः सेवमाना सेवमानम्
8. चेष्ट– चेष्टते – चेष्टाकरना – चेष्टमानः चेष्टमाना चेष्टमानम्
9. जन् – जायते – पैदा होना – जायमानः जायमाना जायमानम्
10. एध – एधते – बढना – एधमानः एधमाना एधमानम्

**अभ्यासप्रश्नाः 05 अधोनिर्दिष्टानां क्रियापदानां शानच् प्रत्ययस्य त्रिषु लिंगेषु प्रथमाविभक्ति–एकवचनरूपं लिखन्तु– यथा–**

| **क्रियापदम्–** | | **पुल्लिंगे** | **स्त्रीलिंगे** | **नपुंसकलिंगे** |
|---|---|---|---|---|
| डयते | – | डयमानः | डयमाना | डयमानम् |
| 1. याचते | – | ––––– | ––––– | –––––– |
| 2. वेपते | – | ––––– | ––––– | –––––– |
| 3. कुरुते | – | ––––– | ––––– | –––––– |
| 4. शोभते | – | ––––– | ––––– | –––––– |
| **5.** लज्जते | – | ––––– | ––––– | –––––– |

**अभ्यासप्रश्नाः 06 आवरणे दत्तानां क्रियापदानां सहायतया शानच् प्रत्ययान्तरूपैः रिक्तस्थलानि पूरयन्तु–**

**यथा– लज्जमाना** कन्या मौनम् आश्रितवती। **(लज्जते)**

1. अभिनवः सुन्दरं......................................प्रथमं स्थानं लब्धवान्। (भाषते)
2. कष्टानि ......................................सीता प्रबुद्धा अभवत्। (सहते)
3. सभायां ......................................राजकुमारः प्रविशति। (शोभते)
4. .................................... फलं दृष्ट्वा बालकः नन्दति। (एधते)

**क्त– अधोलिखितानि वाक्यानि पठन्तु–**

1. सीता रामेण सह वनं गता।
2. अध्यापकेन पाठः पाठितः।
3. मया भगवद्गीता पठिता।
4. नवनीतेन चलचित्रं दृष्टम्।
5. भक्तेन पूजा कृता।

**क्त प्रत्ययपरिचयः –**क्त प्रत्ययस्य प्रयोगः क्रियायाः समाप्तिसूचनार्थं भवति। अर्थात् यदा क्रियायाः समाप्तेः सूचना प्राप्यते तदा भूतकालार्थे क्त प्रत्ययस्य प्रयोगः भवति। सामान्यतया क्त प्रत्ययात् निष्पन्नशब्दानाम् अन्ते 'त' इति अवशिष्यते। क्त प्रत्ययात् निर्मितानि पदानि कर्मवाच्ये भाववाच्ये च प्रयुज्यन्ते। क्त प्रत्ययान्तरूपाणि त्रिषु लिंगेषु त्रिषु वचनेषु सप्तविभक्तिषु च चलन्ति।

**अत्र अवधेयम्–** क्त प्रत्ययस्य रूपाणि पुंलिङ्गे 'राम' शब्दवत्, स्त्रीलिंगे 'रमा' शब्दवत्' नपुंसकलिंगे 'फल' शब्दवत् चलन्ति।

| यथा– | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुल्लिंगे प्रथमाविभक्तौ – | पठितः | पठितौ | पठिताः |
| स्त्रीलिंगे प्रथमाविभक्तौ– | पठिता | पठिते | पाठिताः |
| नपुंसकलिंगे प्रथमाविभक्तौ– | पठितम् | पठिते | पठितानि |

क्त प्रत्ययस्य अभ्यासाय अत्र केषांचन धातूनां रूपाणि त्रिषु लिंगेषु प्रथमाविभक्तौ एकवचने एव प्रदत्तानि सन्ति। एतेषाम् अभ्यासं कुर्वन्तु–

| | धातु | अर्थ | नपुंसकलिंग | पुल्लिंग | स्त्रीलिंग |
|---|---|---|---|---|---|
| 1. | गम् | जाना | गतम् | गतः | गता |
| 2. | कथ् | कहना | कथितम् | कथितः | कथिता |
| 3. | क्रीड् | खेलना | क्रीडतम् | क्रीडतः | क्रीडिता |
| 4. | खाद् | खाना | खादितम् | खादितः | खादिता |
| 5. | चल् | चलना | चलितम् | चलितः | चलिता |
| 6. | ज्ञा | जानना | ज्ञातम् | ज्ञातः | ज्ञाता |
| 7. | वस् | रहना | उषितम् | उषितः | उषिता |
| 8. | लिख् | लिखना | लिखितम् | लिखितः | लिखिता |
| 9. | दा | देना | दत्तम् | दत्तः | दत्ता |
| 10. | हस् | हंसना | हसितम् | हसितः | हसिता |

**अभ्यासप्रश्नाः 07 अधोलिखितानां धातूनां क्त प्रत्ययान्तरूपाणि त्रिषु लिंगेषु लिखन्तु–**

**उदाहरणम्–**कृ – कृतम् कृतः कृता

| धातवः | नपुंसकलिंगे | पुल्लिंगे | स्त्रीलिंगे |
|---|---|---|---|
| 1. पा | ———————— | ———————— | ———————— |

| | | | | |
|---|---|---|---|---|
| 2. | चल् | -------- | -------- | -------- |
| 3. | नम् | -------- | -------- | -------- |
| 4. | पत् | -------- | -------- | -------- |
| 5. | कम्प् | -------- | -------- | -------- |

**क्तवतु– अधोलिखितानां वाक्यानाम् अभ्यासं कुर्वन्तु–**

1. बालकः विद्यालयं गतवान्।
2. राधा पाठं पठितवती।
3. यानं देहलीं गतवत्।
4. अहं भोजनं कृतवान्।
5. भवती लेखं लिखितवती।

**क्तवतु प्रत्ययपरिचयः** –क्तवतु प्रत्ययस्य प्रयोगः क्रियायाः समाप्तिसूचनार्थं भवति। अर्थात् यदा क्रियायाः समाप्तेः सूचना प्राप्यते तदा भूतकालार्थे क्तवतु प्रत्ययस्य प्रयोगः भवति। सामान्यतया क्तवतु प्रत्ययात् निष्पन्नशब्दानाम् अन्ते 'तवत्' इति अवशिष्यते। क्तवतु प्रत्ययात् निर्मितानि पदानि कर्तृवाच्ये प्रयुज्यन्ते। क्तवतु प्रत्ययान्तरूपाणि त्रिषु लिंगेषु त्रिषु वचनेषु सप्तविभक्तिषु च चलन्ति।

**अत्र अवधेयम्–** क्तवतु प्रत्ययस्य रूपाणि पुंलिङ्गे 'भवत्' शब्दवत्, स्त्रीलिंगे 'नदी' शब्दवत्' नपुंसकलिंगे 'जगत्' शब्दवत् चलन्ति।

| यथा– | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुल्लिंगे प्रथमाविभक्तौ – | पठितवान् | पठितवन्तौ | पठितवन्तः |
| स्त्रीलिंगे प्रथमाविभक्तौ– | पठितवती | पठितवत्यौ | पाठितवत्यः |
| नपुंसकलिंगे प्रथमाविभक्तौ– | पठितवत् | पठितवती | पठितवन्ति |

क्तवतु प्रत्ययस्य अभ्यासाय अत्र केषांचन धातूनां रूपाणि त्रिषु लिंगेषु प्रथमाविभक्तौ एकवचने एव प्रदत्तानि सन्ति। एतेषाम् अभ्यासं कुर्वन्तु–

| | धातु | अर्थ | नपुंसकलिंग | पुल्लिंग | स्त्रीलिंग |
|---|---|---|---|---|---|
| 1. | गम् | जाना | गतवत् | गतवान् | गतवती |
| 2. | कथ् | कहना | कथितवत् | कथितवान् | कथितवती |
| 3. | क्रीड् | खेलना | क्रीडतवत् | क्रीडतवान् | क्रीडितवती |
| 4. | खाद् | खाना | खादितवत् | खादितवान् | खादितवती |
| 5. | चल् | चलना | चलितवत् | चलितवान् | चलितवती |
| 6. | ज्ञा | जानना | ज्ञातवत् | ज्ञातवान् | ज्ञातवती |
| 7. | वस् | रहना | उषितवत् | उषितवान् | उषितवती |
| 8. | लिख् | लिखना | लिखितवत् | लिखितवान् | लिखितवती |
| 9. | दा | देना | दत्तवत् | दत्तवान् | दत्तवती |

| | | | | |
|---|---|---|---|---|
| 10. हस् | हंसना | हसितवत् | हसितवान् | हसितवती |

**अभ्यासप्रश्नाः 08 अधोलिखितानां क्तवतु युक्त प्रत्ययान्तरूपाणि त्रिषु लिंगेषु लिखन्तु–**

**उदाहरणम्–**बालकः विद्यालयं ..............................(**गच्छति**)। बालकः विद्यालयं **गतवान्।**

1. नरेशः हस्तकन्दुकं ..........................................(क्रीडति)
2. पिता पुस्तकम् ..................................................(आनयति)
3. अभ्युदयः देहलीं ...............................................(गच्छति)
4. शिवांगी काव्यं....................................................(पठति)
5. रेलयानं कानपुरतः..............................................(आगच्छति)
6. विमानयानम्.........................................................(चलति)

1. क्रीडितवान्। 2. आनीतवान्। 3. गतवान्। 4. पठितवती। 5. आगतवत्। 6. चलतवत्।

**क्त्वा प्रत्ययः – अधोलिखितानि वाक्यानि पठन्तु–**

1. बालकः पठित्वा भोजनं करोति।
2. रमेशः लिखित्वा क्रीडति।
3. पूजा धावित्वा विश्रामं करोति।
4. लता गीत्वा प्रसन्ना भवति।
5. चलचित्रं दृष्ट्वा बालाः आनन्दिताः भवन्ति।

**क्त्वा प्रत्ययपरिचयः–**समानकर्तृकयोः पूर्वकाले इति नियमानुसारं क्त्वा प्रत्ययस्य प्रयोगः किंचित् कालपूर्वं कृतस्य कार्यस्य संसूचनार्थम् असमाप्तक्रियायाः रूपे भवति। एतस्य अर्थः कृत्वा (करके) पठित्वा (पढकर) इत्येवं भवति। क्त्वा प्रत्ययस्य प्रयोगः परस्मैपदि–आत्मनेपदि–उभयपदिधातुभिः समानरूपेण भवति। क्त्वा प्रत्ययान्तशब्दः अव्ययः भवति। अतः एतस्य रूपं न प्रचलति। क्त्वा प्रत्ययस्य 'त्वा' इति अवशिष्यते। **यथा–** पठ् – पठति+ क्त्वा – पठित्वा।

1. पठ् – पठति + क्त्वा – पठित्वा
2. लिख् – लिखति+ क्त्वा – लिखित्वा
3. धाव्– धावति+ क्त्वा – धावित्वा
4. गै – गायति+क्त्वा – गीत्वा
5. क्री – क्रीणाति+ क्त्वा – क्रीत्वा
6. ज्ञा – जानाति+ क्त्वा – ज्ञात्वा
7. नी – नयति+ क्त्वा – नीत्वा
8. दृश् – पश्यति+ क्त्वा – दृष्ट्वा
9. दा – ददाति+क्त्वा – दत्त्वा

**10.** श्रु – शृणोति+ क्त्वा – श्रुत्वा

**अभ्यासप्रश्नाः 09 – अधोलिखितानि क्रियापदानि क्त्वान्तशब्देषु परिवर्त्य रिक्तस्थानानि पूरयन्तु–**

1. गच्छति –................................ । 2. पश्यति – .................................... ।

3. रचयति –................................. । 4. नमति –....................................... ।

5. ध्यायति –.................................. । 6. खादति –......................................... ।

**अभ्यासप्रश्नाः 10–**अधोलिखितवाक्यानामाधारेण क्त्वान्तशब्दैः वाक्यानि रचयन्तु–

**उदाहरणम्–**बालकः पठनं गच्छति – बालकः **पठित्वा** गच्छति।

1. बालिका **स्मरणं** लिखति – ............................................................... ।
2. मुनिः **ध्यानं** वदति – ............................................................... ।
3. महिला मालां **क्रयणं** धरति – ............................................................... ।
4. कपयः **खादन्ति** क्रीडन्ति – ............................................................... ।
5. भवान् विषयं **जानातु** भाषणं करोतु– ............................................................... ।
6. अहम् आपणं **गमिष्यामि** भ्रमिष्यामि– ............................................................... ।

**ल्यप् प्रत्ययः–**अधोलिखितानि वाक्यानि पठन्तु–

1. पिता आगत्य कुशलं पृच्छति।
2. माता वस्त्राणि प्रक्षाल्य भोजनं ददाति।
3. आपणात् चाकलेहम् आनीय ददातु।
4. लेखकः कार्यं सम्पाद्य पुस्तकं रचयति।
5. शिक्षकः छात्राणां दोषान् विहाय शिक्षयति।

**ल्यप् प्रत्ययपरिचयः–**समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति नियमानुसारं यदि धातुतः पूर्वं कश्चिद् उपसर्गः अव्ययः च्वि प्रत्ययात् निष्पन्नः शब्दः वा भवेत् तदा त्वा प्रत्ययस्य स्थाने ल्यप् प्रत्ययः भवति। किन्तु यदा धातुतः पूर्वं नञ् (अ्) भवति, तदा ल्यप् प्रत्ययः न भवति। यथा न कृत्वा – अकृत्वा भवति। अयं प्रत्ययः परस्मैपदि–आत्मनेपदि–उभयपदिधातुभिः समानरूपेण भवति। एतेन निर्मितानि पदानि अव्ययपदानि भवन्ति। अतः एतेषां रूपाणि न प्रचलन्ति। ल्यप् प्रत्ययस्य 'य' अवशिष्यते। **यथा – परि+ईक्ष – परीक्ष्य।**

**1.** आ+गम् – आगच्छति+ ल्यप् – आगत्य।
**2.** प्र+क्षाल् – प्रक्षालयति+ ल्यप् – प्रक्षाल्य।

| | | | | | |
|---|---|---|---|---|---|
| **3.** आ+नी | – | आनयति+ | ल्यप् | – | आनीय। |
| **4.** वि+स्मृ | – | विस्मरति+ | ल्यप् | – | विस्मृत्य। |
| **5.** अव+गम् | – | अवगच्छति+ | ल्यप् | – | अवगत्य। |
| **6.** उत्+तिष्ठ | – | उत्तिष्ठति+ | ल्यप् | – | उत्थाय। |
| **7.** स्वी+कृ | – | स्वीकरोति+ | ल्यप् | – | स्वीकृत्य। |
| **8.** वि+लिख् | – | विलिखति+ | ल्यप् | – | विलिख्य। |
| **9.** सम्+स्था | – | संस्थापयति+ | ल्यप् | – | संस्थाप्य। |
| **10.** नि+दिश् | – | निर्दिशति+ | ल्यप् | – | निर्दिश्य। |

**अभ्यासप्रश्नाः 11 – अधोलिखितानि क्रियापदानि ल्यप् प्रत्ययेषु परिवर्त्य रिक्तस्थानानि पूरयन्तु–**

1. उपकरोति –................................ । 2. विजानाति – ................................... ।

3. सम्प्रेषयति –................................ । 4. संहरति – ................................... ।

5. प्रणमति –................................ । 6. आकर्षति – ................................... ।

**अभ्यासप्रश्नाः 12– अधोलिखितवाक्यानामाधारेण ल्यप् प्रत्ययशब्देषु वाक्यानि रचयन्तु–**

**उदाहरणम्–**माता वस्त्रं **प्रक्षालयति** भोजनं पचति। – माता वस्त्रं **प्रक्षाल्य** भोजनं पचति।

1. रमेशः **आगच्छति** पुस्तकं पठति। –.............................................................. ।
2. व्युत्पन्नः छात्र **विस्मरति** न लिखति। –.............................................................. ।
3. बालिका **उतिष्ठति** प्रार्थनां करोति। –.............................................................. ।
4. आचार्यः **निर्दिशति** गुरुकुलं गच्छति। –.............................................................. ।
5. धनं **स्वीकरोति** योजनां निर्माति। –.............................................................. ।

**तुमन् प्रत्ययः**–अधोलिखितानि वाक्यानि सम्यक् पठन्तु–

1. रामः पठितुं गुरुकुलं गच्छति।
2. पिता कार्यं कर्तुं कार्यालयं गच्छति।
3. कर्मचारी धनं प्राप्तुम् उद्योगं करोति।
4. लता पुस्तकं लेखितुं ग्रन्थालयं प्रविशति।
5. अभिनेतारं द्रष्टुं जनाः उत्सहन्ते।

**तुमुन् प्रत्ययपरिचयः**–तुमुन् ण्वुलौ क्रियायां क्रियार्थे इति नियमानुसारं कर्तुम् (करने के लिए) तथा चतुर्थीविभक्तेः अर्थं प्रकटयितुं धातुना सह तुमुन् प्रत्ययस्य प्रयोगः भवति। तुमुन् प्रत्ययस्य प्रयोगः एकस्याः क्रियायाः योगे अन्यक्रियायाः योगे भवति। एषः प्रत्ययः परस्मैपदि–आत्मनेपदि–उभयपदिधातुभिः समानरूपेण भवति। एतेन निर्मितानि पदानि अव्ययपदानि भवन्ति। अतः एतेषां रूपाणि न प्रचलन्ति। तुमुन् प्रत्ययस्य 'तुम्' अवशिष्यते।

यथा – कृ+तुमुन् – कर्तुम्।

| | | | | | |
|---|---|---|---|---|---|
| 1. पठ् | – | पठति + | तुमुन् | – | पठितुम् |
| 2. लिख् | – | लिखति+ | तुमुन् | – | लेखितुम् |
| 3. धाव् | – | धावति+ | तुमुन् | – | धावितुम् |
| 4. गै | – | गायति+ | तुमुन् | – | गातुम् |
| 5. क्री | – | क्रीणाति+ | तुमुन् | – | क्रेतुम् |
| 6. ज्ञा | – | जानाति+ | तुमुन् | – | ज्ञातुम् |
| 7. नी | – | नयति+ | तुमुन् | – | नेतुम् |
| 8. दृश् | – | पश्यति+ | तुमुन् | – | दृष्टुम् |
| 9. दा | – | ददाति+ | तुमुन् | – | दातुम् |
| 10. श्रु | – | शृणोति+ | तुमुन् | – | श्रोतुम् |

**अभ्यासप्रश्नाः 13** –अधोलिखितानि क्रियापदानि तुमुन् प्रत्ययेषु परिवर्त्य रिक्तस्थानानि पूरयन्तु–

1. उपकरोति –................................ ।  2. नृत्यति – ................................... ।

3. सम्प्रेषयति –................................ ।  4. हंसति – ................................... ।

5. गच्छति –................................ ।  6. आकर्षति – ................................... ।

**तव्यत्/अनीयर्** –अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–

1. सदा सत्यं वक्तव्यम्।
2. उत्तमं कर्म करणीयम्।
3. वृद्धानां सेवा करणीया।
4. समीचीनः लेखः लेखनीयः।
5. अस्माभिः पर्यावरणं रक्षणीयम्।

**तव्यत्/अनीयर् प्रत्ययपरिचयः**–तव्यत्तव्यानीयरः इति सूत्रानुसारं (चाहिए) इत्यर्थे तथा विधिलिंगलकारार्थे धातुना तव्य–तव्यत्–अनीयर्प्रत्ययाः भवन्ति। तव्य–तव्यत्प्रत्यययोः कोऽपि भेदः नास्ति। तव्यत्–अनीयर्प्रत्यययोः प्रयोगः कर्मवाच्ये भाववाच्ये च भवति। आभ्यां निर्मितानि वाक्यानि परस्मैपदि–आत्मनेपदि–उभयपदिधातुभिः समानरूपेण भवन्ति। तव्यत्प्रत्ययस्य 'तव्य' तथा अनीयर्प्रत्ययस्य 'अनीय' इति अवशिष्यते। एतेषां रूपाणि पुंलिङ्गे 'राम' शब्दवत्, स्त्रीलिंगे 'रमा' शब्दवत्' नपुंसकलिंगे 'फल' शब्दवत् चलन्ति।

| यथा– | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुल्लिंगे प्रथमाविभक्तौ – | पठनीयः | पठनीयौ | पठनीयाः |
| स्त्रीलिंगे प्रथमाविभक्तौ– | पठनीया | पठनीयेपठनीयाः | |

नपुंसकलिंगे प्रथमाविभक्तौ– पठनीयम् पठनीयेपठनीयानि

तव्यत्–अनीयर् प्रत्यययोः अभ्यासाय अत्र केषांचन धातूनां रूपाणि त्रिषु लिंगेषु प्रथमाविभक्तौ एकवचने प्रदत्तानि सन्ति। एतेषाम् अभ्यासं कुर्वन्तु–

| | धातु | अर्थ | नपुंसकलिंग | पुल्लिंग | स्त्रीलिंग |
|---|---|---|---|---|---|
| 1. | लिख् | लिखना | लेखितव्यम् | लेखितव्यः | लेखितव्या |
| 2. | दा | देना | दातव्यम् | दातव्यः | दातव्या |
| 3. | हस् | हसना | हसितव्यम् | हसितव्यः | हसितव्या |
| 4. | ज्ञा | जाना | ज्ञातव्यम् | ज्ञातव्यः | ज्ञातव्या |
| 5. | याच् | मांगना | याचितव्यम् | याचितव्यः | याचितव्या |
| 6. | गम् | जाना | गमनीयम् | गमनीयः | गमनीया |
| 7. | कथ् | कहना | कथनीयम् | कथनीयः | कथनीया |
| 8. | क्रीड् | खेलना | क्रीडनीयम् | क्रीडनीयः | क्रीडनीया |
| 9. | खाद् | खाना | खादनीयम् | खादनीयः | खादनीया |
| 10. | चल् | चलना | चलनीयम् | चलनीयः | चलनीया |

**अभ्यासप्रश्नाः 14 अधोनिर्दिष्टानां धातूनां तव्यत् प्रत्ययरूपाणि त्रिषु लिंगेषु रचयन्तु–**

**यथा**–गम् – गच्छति – गन्तव्यः गन्तव्या गन्तव्यम्।

1. पत् – पतति –
2. स्था – तिष्ठति –
3. श्रु – श्रृणोति –
4. वस् – वसति –
5. जि – जयति –

**अभ्यासप्रश्नाः 15 अत्र कर्तृवाच्यरूपाणि प्रदत्तानि सन्ति, तानि अनीयर् प्रत्यये परिवर्त्य लिखन्तु–**

**यथा**–रामः पुस्तकं पठतु – रामेण पुस्तकं पठनीयम्।

1. बालकः लेखं लिखतु –
2. माता दुग्धं ददातु –
3. सज्जनाः उत्तमां कथां पठन्तु –
4. यात्री यानेन प्रयातु –
5. सुपाच्यं भोजनं खादतु –

## 1.6 सारांशः

संस्कृतभाषायाम् उपसर्गाणां प्रत्यययानां च महत् महत्त्वं वर्तते। उपसर्गाः धातुनः पूर्वं स्थित्वा तस्य अर्थे उत्कर्षम् अपकर्षं परिवर्तन वा कुर्वन्ति। संस्कृते प्रादयः उपसर्गाः मन्यन्ते। एतेषां संख्या द्वाविंशतिः अस्ति। सामान्यरूपेण धातुतः पूर्वं एकः उपसर्गः युज्यते, किन्तु क्वचित् द्वित्रा उपसर्गाः अपि धातुतः पूर्वं तिष्ठन्ति। संस्कृतभाषायां प्रत्ययाः बहुविधाः भवन्ति। एतेषु प्रत्ययेषु कृतप्रत्ययाः अत्यन्तं महत्त्वपूर्णाः कृतप्रत्ययेषु क्त–क्तवतु–क्त्वा–ल्यप्–तुमुन्–तव्यत्–अनीयर्इत्यादयः प्रमुखाः सन्ति। क्त–क्तवतुप्रत्यययोः भूतकालार्थे प्रयुज्येते। क्त्वाप्रत्ययः क्रियायाः समाप्तिं संसूच्य अन्यक्रियायाः प्रयोगे सहायकः भवति। ल्यप्प्रत्ययः क्त्वाप्रत्ययस्य स्थाने उपसर्गयोगे भवति। तुमुन्प्रत्ययस्य प्रयोगः चतुर्थीविभक्तिस्थाने ईच्छार्थे च भवति। तव्यत्–अनीयर्प्रत्यययोः विधिलिंगलकारार्थे भवतः। उपर्युक्तानाम् उपसर्गप्रत्यययानां प्रयोगेण भवन्तः सरलता पूर्वकं संस्कृतभाषायाः प्रयोगं कर्तुं शक्नुवन्ति।

## 1.7 प्रश्नानाम् उत्तराणि

**अभ्यासप्रश्नाः 01 उत्तराणि–**

**1.** प्र+अर्थ –  2. अप+ईक्ष –
3. सम्+गम् –  4. अनु+ज्ञा –
5. अव+तृ –  **6.** निर्+आ+कृ–
7. दुर्+गम् –  **8.** वि+नि+पत् –
9. अधि+वस् –  **10.** अभि+नि+विस् –

**अभ्यासप्रश्नाः 02 उत्तराणि–**

**1.** प्रति+ आगच्छति।  2. उप+दिशति। 3. परि+ईक्षते। 4. अभि+नयति ।
5. उत्+एति।  6. नि+वर्तते।  7. आ+क्षिपति। 8. अनु+तिष्ठति।
9. परा+जयते।  10.निस्+तरति।

**अभ्यासप्रष्नाः 03 उत्तराणि–**

**यथा– क्रियापदम्–**वितरति–**वाक्यप्रयोगः–** अध्यापकः प्रष्नपत्राणि वितरति।

**1.** बालकाः विद्यालयं प्रविशन्ति।  2. माता गृहात् अवकरम् अपनयति।
3. लक्ष्मणः रामम् अनुगच्छति।  4.गंगा हिमालयात् निस्सरति।
**6.** पर्यटकाः जिमकार्बेट–उद्यानं द्रष्टुम् आगच्छन्ति।
**7.** कक्षा व्यवस्थायाः कृते शिक्षकः दलनायकम् अधिकरोति।

**अभ्यासप्रश्नाः 04 उत्तराणि–**

1. अनुजः आगच्छन् वदति।  2. पिता पश्यन् पृच्छति।  3. राघवः जिघ्रन् तुष्यति।

4. रमेशः वादयन् नृत्यति। 5. रजकः क्षालयन् पश्यति। 6.बालकःइच्छन् स्पृशति।

7. शिक्षकः पाठयन् लिखति। 8. कृष्णः चोरयन् चिन्तयति।

**अभ्यासप्रश्नाः 05 उत्तराणि–**

1. याचमानः–याचमाना–याचमानम्। 2. वेपमानः – वेपमाना–वेपमानम्।

3. कुर्वाणः–कुर्वाणा–कुर्वाणम्। 4. शोभमानः–शोभमाना–शोभमानम्।

2. लज्जमानः–लज्जमाना–लज्जमानम्।

**अभ्यासप्रश्नाः 06 उत्तराणि**

1. अभिनवः सुन्दरं भाषमाणं प्रथमं स्थानं लब्धवान्।
2. कष्टानि सहमाना सीता प्रबुद्धा अभवत्।
3. सभायां शोभमानः राजकुमारः प्रविशति।
4. एधमानं फलं दृष्ट्वा बालकः नन्दति।

**अभ्यासप्रश्नाः 07 उत्तराणि–**

| **उदाहरणम्**–कृ – | कृतम् | कृतः | कृता |
|---|---|---|---|
| **धातवः** | **नपुंसकलिंगे** | **पुल्लिंगे** | **स्त्रीलिंगे** |

1. पीतम्–पीतः–पीता। 2.चलितम्–चलितः–चलिता। 3.नतम्–नतः–नता।

4. पतितम्–पतितः–पतिता। 5.कम्पितम्–कम्पितः–कम्पिता।

**अभ्यासप्रश्नाः 08 उत्तराणि–**

1. क्रीडितवान्। 2. आनीतवान्। 3. गतवान्। 4. पठितवती। 5. आगतवत्। 6. चलतवत्।

**अभ्यासप्रश्नाः 09 – उत्तराणि–**

1. गत्वा। 2. द्रष्ट्वा। 3. रचयित्वा। 4. नत्वा। 5. ध्यात्वा। 6. खादित्वा।

**अभ्यासप्रश्नाः 10– उत्तराणि–**

1. बालिका **स्मृत्वा** लिखति। 2.मुनिः **ध्यात्वा** वदति।

3.महिला मालां **क्रीत्वा** धरति। 4. कपयः **खादित्वा** क्रीडन्ति।

5. भवान् विषयं **ज्ञात्वा** भाषणं करोतु। 6. अहम् आपणं **गत्वा** भ्रमिष्यामि।

**अभ्यासप्रश्नाः 11 – उत्तराणि–**

1. उपकृत्य। 2.विज्ञाय। 3.सम्प्रेष्य। 4.संहृत्य। 5. प्रणम्य। 6. आकृष्य।

**अभ्यासप्रश्नाः 12– उत्तराणि–**

1. रमेशः **आगत्य** पुस्तकं पठति। 2. व्युत्पन्नः छात्र **विस्मृत्य** न लिखति।

3. बालिका **उत्थाय** प्रार्थनां करोति। 4.आचार्यः **निर्दिश्य** गुरुकुलं गच्छति।

5. धनं **स्वीकृत्य** योजनां निर्माति।

**अभ्यासप्रश्नाः 13 – उत्तराणि–**

1. उपकर्तुम्। 2. नर्तितुम्। 3. सम्प्रेषयितुम्। 4. हसितुम्। 5.गन्तुम्। 6. आकृष्टुम्।

**अभ्यासप्रश्नाः 14 उत्तराणि–**

**यथा**–गम् – गच्छति – गन्तव्यः गन्तव्या गन्तव्यम्।

1. पतितव्यः–पतितव्या–पतितव्यम्। 2.स्थातव्यः–स्थातव्या–स्थातव्यम्।

3. श्रोतव्यः–श्रोतव्या–श्रोतव्यम्। 4. वस्तव्यः–वस्तव्या–वस्तव्यम्।

5. जेतव्यः–जेतव्या–जेतव्यम्।

**अभ्यासप्रश्नाः 15 उत्तराणि–**

1. बालकेन लेखः लेखनीयः। 2. मात्रा दुग्धं दातव्यम्। 3. सज्जनैः उत्तमाः कथाः पठनीयाः।

4. यात्रिणा यानेन प्रयातव्यम्। 5. सुपाव्यं भोजनं खादितव्यम्।

## 1.7 सन्दर्भग्रन्थसूची

1. प्रौढ–रचनानुवादकौमुदी, डॉ. कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशनं, वाराणसी।
2. अनुवाद चन्द्रिका, डॉ. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

## 1.8 सहायकोपयोगि–पाठ्यसामग्री–

1. प्रवेशः, संस्कृतभारती उत्तरांचलम्।

1. शिक्षा, संस्कृतभारती, नवदेहली।
2. भाषाप्रवेशः, संस्कृतभारती, नवदेहली।

# द्वितीय इकाई—अव्ययपरिचयः प्रयोगश्च

2.1प्रस्तावना
2.2 उद्देश्य
2.3 अधोलिखितानि वाक्यानि ध्यानेन पठन्तु
2.4 अव्ययपरिचयः
2.5 अव्ययानां प्रकाराः
2.5.1 क्रियाविशेषणम्
2.5.2 सम्बन्धबोधकम् अव्ययम्
2.5.3 समुच्चयबोधकम् अव्ययम्
2.5.4 विस्मयबोधकम् अव्ययम्
2.5.5 निपातः
2.5.6 प्रमुखानि अव्ययानि
2.5.7 अव्ययशब्दानां वाक्यप्रयोगः
2.5.8 क्रियाविशेषणानि तेषाम् अर्थश्च
2.5.9 क्रियाविशेषणानां वाक्यप्रयोगः
2.6 सारांशः
2.7प्रश्नानाम् उत्तराणि
2.8 सन्दर्भग्रन्थसूची
2.9 सहायकोपयोगि–पाठ्यसामग्री

## 2.1 प्रस्तावना

संस्कृतभाषायां कारक–विभक्ति–वचन–लिंग–संज्ञा–सर्वनामनाम्नां प्रयोगः वाक्यनिर्माणार्थं भवति, एतानि बिना भाषायाः प्रयोगः अपूर्णः भवति। परम् अस्यां भाषायां केचन शब्दाः एतादृशाः अपि सन्ति, ये लिंग–वचन–पुरुष–विभक्त्यादिभिः रहिताः भवन्ति। एवं विधानां शब्दानाम् अव्ययसंज्ञा भवति। अर्थात् लिंग–वचन–पुरुष–विभक्तिदृष्ट्या यस्मिन् शब्दे परिवर्तनं न भवति, सः शब्दः अव्ययसंज्ञया व्यवह्रियते। अव्ययानि निश्चितार्थकानि भवन्ति। अतः एतेषां प्रयोगेण भाषायाः व्यवहारः सरलता पूर्वकं कर्तुं शक्यते। एतानि भाषायां चमत्कृतिं, विशेषतां च आनयन्ति। अस्याम् अन्वितौ भवन्तः अव्ययानां क्रियाविशेषणानां च प्रयोगविषये विस्तरेण ज्ञास्यन्ति।

## 2.2 उद्देश्यम्

इमाम् अन्वितिं पठित्वा भवन्तः–

3. अव्ययानां परिचयं प्राप्स्यन्ति।
4. अव्ययविषयकं नियमं ज्ञास्यन्ति।
5. अव्ययानां प्रयोगकरणे सक्षमाः भविष्यन्ति।
6. अव्ययानाम् अर्थम् उपयोगं च ज्ञास्यन्ति।
7. अव्ययानां भेदोपभेदं ज्ञास्यन्ति।
8. क्रियाविशेषणानां परिचयं प्राप्स्यन्ति।
9. भाषायाः व्यवहारे अव्ययानां भूमिकां ज्ञास्यन्ति।

## 2.3 अधोलिखितानि वाक्यानि ध्यानेन पठन्तु–

1. वने सिंहः **उच्चैः** गर्जति।
2. **अत्र** संस्कृतस्य कक्षा प्रचलति।
3. लोके वायुः **सर्वत्र** प्रसरति।
4. मां **निकषा** अनुजः तिष्ठति।
5. **यावत्** वृष्टिः भवति **तावत्** अन्तः तिष्ठतु।
6. **पुरा** एकः राजा आसीत्।
7. **प्रत्येकं** कार्यं **सुष्ठुः** सम्पादनीयम्।
8. स्वास्थ्यः **सम्यक्** नास्ति **अतः** वैद्यालयं गच्छामि।
9. उत्तिष्ठत जाग्रत **इति** स्वामी विवेकानन्दः वदति।
10. **यत्र** सुमतिः **तत्र** सम्पत्तिः।

## 2.4 अव्ययपरिचयः

'न व्ययम् इति अव्ययम्' अर्थात् येषु शब्देषु परिवर्तन न भवति, तादृशानि पदानि अव्ययम् इति संज्ञया अभिधीयन्ते। अव्ययशब्दात् परे विभक्तिः न तिष्ठति। अतः अव्ययं वचनरहितं, लिंगरहितं, विभक्तिरहितं च भवति। यथोक्तम्–

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।। अर्थात् त्रिषु लिंगेषु, सर्वासु विभक्तिषु सर्वेषु च वचनेषु येषु शब्देषु परिवर्तनं न सम्भवति ते एव शब्दाः अव्ययशब्दाः इति उच्यन्ते। अव्ययानां प्रयोगः भाषायाम् रोचकताम् आनेतुं क्रियायाः विशेषतां प्रकटयितुं च क्रियते। प्रत्येकं स्थितौ अव्ययपदानि स्वीयमूलरूपेण यथावत् तिष्ठन्ति। अतः एतेषाम् अविकारी संज्ञा अपि भवति।

## 2.5 अव्ययानां प्रकाराः

–अव्ययानि प्रायेण पंचविधानि भवन्ति– 1. क्रियाविशेषणम्। 2. सम्बन्धबोधकम्। 3. समुच्चयबोधकम्। 4. विस्मयबोधकम्। 5. निपातः च।

**2.5.1क्रियाविशेषणम्–** यत् अव्ययपदं कस्याश्चित् क्रियायाः विशेषतां द्योतयति, तद् क्रिया विशेषणम् इति उच्यते। यथा– अत्यन्तं, शनैः, उच्चैः चेत्यादयः। **क्रि**याविशेषणात्मकम् अव्ययं चतुर्विधं भवति– 1. कालवाचकम्। 2. परिमाणवाचकम्। 3. स्थानवाचकम्। 4. रीतिवाचकम्।

1. **कालवाचकम्–** यत्पदेन समयसम्बद्धक्रियायाः विशेषतायाः बोधः भवति, तत् कालवाचकं क्रियाविशेषणं भवति। यथा– अद्य, श्वः, परश्वः, प्रपरश्वः, सायम्, प्रातः, दिवा चेत्यादयः।
2. **परिमाणवाचकम्–** येन अव्ययेन क्रियायाः परिमाणस्य मात्रायाश्च बोधः भवति, तत् परिमाणवाचकं क्रियाविशेषणम् इति उच्चते। यथा– किंचित्, अधिकम्, न्यूनम्, कति चेत्यादयः।
3. **स्थानवाचकम्–** येन अव्ययेन क्रियासम्बद्धानां स्थानवाचकानां बोधः जायते। तत् परिमाणवाचकं क्रियाविशेषणम् उच्यते। यथा– अत्र, तत्र, बहिः, अग्रे, पृष्ठे, पुरतः, वामतः चेत्यादयः।
4. **रीतिवाचकम्–** येन अव्ययेन क्रियायाः सत्तायाः बोधः भवति। तत् रीतिवाचकं क्रियाविशेषणं कथ्यते। यथा– सम्यक्, समीचीनम्, सत्यम्, तथा, यथा चेत्यादयः।

**2.5.2सम्बन्धबोधकम् अव्ययम्–** यत् पदं संज्ञा–सर्वनामशब्दैः मिलित्वा अन्यशब्दैः शाकं तयोः सम्बन्धं स्थापयति, तद् पदं सम्बन्धबोधकम् अव्ययम् इति उच्चते। यथा– बिना, पश्चात्, उपरि, अधः, सह, आदौ चेत्यादयः।

**2.5.3समुच्चयबोधकम् अव्ययम्–** द्वयोः द्वयधिकशब्दयोः वाक्यांशयोः वाक्ययोः वा मध्ये संयोजकं पदं समुच्चयबोधकम् अव्ययम् इति उच्चते। यथा– अपि, अथवा, यत्, किन्तु, तथापि, अपितु, यतोहि चेत्यादयः।

**2.5.4विस्मयबोधकम् अव्ययम्**—यानि पदानि अस्माकं मनसः हर्ष—शोक—घृणा—प्रशंसा—विस्मय—इत्यादीन् भावान् प्रकटयन्ति, तानि विस्मयबोधकानि अव्ययानि इति कथ्यन्ते। यथा— रे, अरे, हे, अहो, हा, हन्त, मा चेत्यादयः।

**2.5.5निपातः**—यानि पदानि कस्यचित् शब्दस्य अनन्तरं स्थित्वा तस्य अर्थे विशिष्टं प्रभावं जनयन्ति, तानि निपातः इति उच्यन्ते। यथा— अपि, तर्हि, पर्यन्तम्, तः, केवलम्, मात्रम् इत्यादयः।

**2.5.6 प्रमुखानि अव्ययानि**

1. **अत्र** — यहाँ
2. **तत्र** — वहाँ
3. **कुत्र** — कहाँ
4. **सर्वत्र** — सब जगह
5. **च** — और
6. **अपि** — भी
7. **एव** — ही
8. **इति** — ऐसा
9. **यथा** — जैसा
10. **तथा** — वैसा
11. **यत्** — **जो**
12. **अन्तः** — अन्दर
13. **बहिः** — बाहर
14. **तूष्णीम्** — चुप/मौन
15. **स्वयम्** — स्वयम्
16. **मा** — नहीं/मत
17. **एवम्** — इस प्रकार, ऐसे
18. **इत्थम्** — इस प्रकार
19. **सर्वदा** — हमेशा
20. **रे** — अरे
21. **पुरा** — प्राचीन काल में
22. **अलम्** — पर्याप्त/काफी
23. **किमर्थम्** — किसलिए/क्यों
24. **सम्यक्** — ठीक/अच्छा
25. **सर्वत्र** — सर्वत्र
26. **नक्तम्** — रात में
27. **प्रातः** — सुबह
28. **दिवा** — दिन
29. **सायम्** — शाम में
30. **रात्रौ** — रात में
31. **पुनः** — फिर से,
32. **चिरम्** — दीर्घ काल के लिए
33. **कदाचित्** — कभी
34. **उपरि** — ऊपर

35. **अधः** – नीचे
36. **वृथा** – व्यर्थ
37. **सह** – साथ
38. **चेत्** – अगर/तो
39. **शनैः** – धीरे
40. **उच्चैः** – जोर से
41. **मन्दम्** – धीरे से
42. **शीघ्रम्** – जल्दी
43. **द्वारा** – द्वारा
44. **कृते** – के लिए
45. **ऋते** – बिना।
46. **मनाक्** – थोडा
47. **वत्** – समान
48. **यावत्–तावत्** – जितना–उतना
49. **पिधानम्** – ढकना
50. **सुष्ठुः** – **भलीभाँति**
51. **सार्धम्** – **साथ**
52. **धिक्** – **निन्दा**
53. **आम** – **स्वीकार**
54. **नूनम्** – **निश्चय**
55. **युगपत्** – **एक साथ**

**2.5.7 अव्ययशब्दानां वाक्यप्रयोगः**

1. **अत्र** – अत्र मम परिवारः अस्ति।
2. **तत्र** – तत्र विद्यालयः अस्ति
3. **कुत्र** – अक्षरधाममन्दिरं कुत्र अस्ति।
4. **सर्वत्र** – वायुः सर्वत्र अस्ति।
5. **यथा–तथा** – यथा रामः अस्ति तथा रावणः नास्ति।
6. **अन्तः** – प्रकोष्ठस्य अन्तः शयनकक्षः अस्ति।
7. **बहिः** – पाकशालायाः बहिः उद्यानम् अस्ति।
8. **तूष्णीम्** – तूष्णीम् भूत्वा ध्यानं करोतु।
9. **स्वयम्** – स्वीयकार्याणि स्वयं करणीयानि।
10. **मा** – कक्षायां कोलाहलं मा कुरु।
11. **एवम्** – इदं कार्यम् एवम् अपि कर्तुं शक्यते।
12. **इत्थम्** – समाजे व्यवहारः इत्थं करणीयः येन मर्यादायाः रक्षणं भवेत्।
13. **सर्वदा** – सर्वदा स्वाध्यायः करणीयः।
14. **रे** – रे रे चातक! सावधानमनसा मित्रं क्षणं श्रूयताम्।
15. **पुरा** – पुरा भारतं विश्वगुरु आसीत्।
16. **अलम्** – अलं विवादेन।

17. **किमर्थम्** – भवान् विद्यालयं किमर्थं गच्छति।
18. **सम्यक्** – अहं सम्यक् पठनार्थं विद्यालयं गच्छामि।
19. **सर्वत्र** – जलं सर्वत्र अस्ति।
20. **नक्तम्** – सैनिकैः नक्तं दिवं राष्ट्ररक्षा क्रियते।
21. **प्रातः** – प्रातः समयेन जागरणं करणीयम्।
22. **सायम्** – सायम् ध्यानम् अवश्यमेव करणीयम्।
23. **रात्रौ** – रात्रौ चन्द्रः प्रकाशते।
24. **पुनः** – पुनः पुनः पाठस्य अभ्यासः करणीयः।
25. **चिरम्** – आचारवान् चिरं जीवति।
26. **कदाचित्** – कदाचित् मम गृहम् अपि आगच्छतु।
27. **उपरि** – वृक्षस्य उपरि वानरः तिष्ठति।
28. **अधः** – वृक्षस्य अधः फलानि पतितानि।
29. **वृथा** – सर्पाणां कृते वृथा दुग्धम्।
30. **सह** – रामेण सह सीता वनं गतवती।
31. **चेत्** – धनम् अस्ति चेत् वाहनं क्रीणातु।
32. **शनैः** – नर्मदा शनैः शनैः प्रवहति।
33. **उच्चैः** – सिंहः उच्चैः गर्जति।
34. **मन्दम्** – कच्छपः मन्दं चलति।
35. **शीघ्रम्** – अश्वः शीघ्रं चलति।
36. **द्वारा** – जलद्वारा पिपासा शान्ता भवति।
37. **कृते** – इयं घटी बालिकायाः कृते अस्ति।
38. **ऋते** – ऋते ज्ञानान्न मुक्तिः।
39. **मनाक्** – आत्मा अमरः इत्यत्र मनाक् अपि न संशयः।
40. **तूष्णीम्** – भोजनं तूष्णीं भूत्वा करणीयम्।
41. **वत्** – रामादिवत् प्रवर्तितव्यं न तु रावणादिवत्।
42. **यावत्–तावत्** – यावत् अहं कार्यं करोति तावत् भवान् तिष्ठतु।
43. **पिधानम्** – रविवासरे कार्यालयस्य पिधानं भवति।
44. **सुष्ठु :** – लेखनकार्यं सुष्ठुः करणीयम्।
45. **सार्धम्** – अहं मात्रा सार्धं मातुलगृहं गच्छामि।
46. **धिक्** – धिक् चोरम्।
47. **आम** – आम, अहमपि शिक्षकः अस्मि।
48. **नूनम्** – नूनं सर्वैः संस्कृतं पठनीयम्।
49. **युगपत्** – पथसंचलनं सैनिकाः युगपत् कुर्वन्ति।
50. **निकषा** – संसदभवनं निकषा राष्ट्रपतिभवनम् अस्ति।

**2.5.8 क्रियाविशेषणानि तेषाम् अर्थश्च–**

1. **अकस्मात्** – अचानक।
2. **अग्रतः** – आगे
3. **अचिरात्** – शीघ्र
4. **अतीव** – बहुत
5. **अद्य** – आज

| | | |
|---|---|---|
| 6. **श्वः** | – | कल आने वाला |
| 7. **परश्वः** | – | परसों |
| 8. **अन्यच्च** | – | और भी |
| 9. **पर्याप्तम्** | – | काफी हो गया |
| 10. **असाम्प्रतम्** | – | अनुचित |
| 11. **इतः** | – | यहां से |
| 12. **ततः** | – | वहाॅ से |
| 13. **कुत्रचित्** | – | कहीं |
| 14. **केवलम्** | – | सिर्फ |
| 15. **प्रायः** | – | बहुधा |
| 16. **सततम्** | – | बराबर |
| 17. **सद्यः** | – | तुरन्त |
| 18. **दिष्ट्या** | – | सौभाग्य से |
| 19. **परम्** | – | परन्तु |
| 20. **समीचीनम्** | – | ठीक |
| 21. **साक्षात्** | – | आँखों के सामने |

**2.5.9 क्रियाविशेषणानां वाक्यप्रयोगः–**

| | | |
|---|---|---|
| 1. **अकस्मात्** | – | रात्रौ अकस्मात् भूकम्पनम् अभवत्। |
| 2. **अग्रतः** | – | दलस्य अग्रतः नायकः गच्छति। |
| 3. **अचिरात्** | – | तिष्ठतु, अचिरात् भोजनं समाप्य आगच्छामि। |
| 4. **अतीव** | – | अस्माकं देशः अतीव विशालः अस्ति। |
| 5. **अद्य** | – | अद्य नववर्षस्य प्रथमं दिनम् अस्ति। |
| 6. **श्वः** | – | श्वः सोमवासरः अस्ति। |
| 7. **परश्वः** | – | परश्वः मंगलवासरः अस्ति। |
| 8. **अन्यच्च** | – | आम्ररसः, शीतपेयम् अन्यच्च दुग्धमपि ददातु। |
| 9. **पर्याप्तम्** | – | मह्यं रोटिकाचतुष्ट्यं पर्याप्तम्। |
| 10. **असाम्प्रतम्** | – | सभायां निन्दाप्रस्तावः असाम्प्रतम्। |
| 11. **इतः** | – | मन्दिरस्य मार्गः इतः अस्ति। |
| 12. **ततः** | – | कार्यालस्य मार्गः ततः अस्ति। |
| 13. **कुत्रचित्** | – | अहं भवन्तं कुत्रचित् दृष्टवान् अस्मि। |
| 14. **केवलम्** | – | अहम् उपवासदिने केवलं जलं पिबामि। |
| 15. **प्रायः** | – | दक्षिणभारते प्रायः जनाः संस्कृतेन व्यवहरन्ति। |

16. **सततम्** – मनसा सततं स्मरणीयं लोकहितं मम करणीयम्।
17. **सद्यः** – सद्यः अहं विद्यालयं गच्छामि।
18. **दिष्ट्या** – साधोः आगमनं दिष्ट्या भवति।
19. **परम्** – आंग्लभाषाज्ञानम् आवश्यकं परं संस्कृतमपि पठनीयम्।
20. **समीचीनम्** – किं भवतः स्वास्थ्यं समीचीनम् अस्ति।
21. **साक्षात्** – अहं साक्षात् प्रधानमन्त्रिणं दृष्टवान्।

**अभ्यासप्रश्नाः**

**अभ्यासप्रश्ना 01 अधोलिखितस्य प्रश्नानाम् उत्तराणि लिखन्तु–**

1. अव्ययात् परे विभक्तिः तिष्ठति किम्? –
2. किम् अव्ययशब्देषु परिवर्तन जायते? –
3. अव्ययानि कति विधानि भवन्ति? –
4. परिमाणवाचकस्य अव्ययस्य लक्षणं किम्? –
5. स्थानवाचक–अव्ययस्य त्रीन् शब्दान् लिखन्तु –
6. विस्मयबोधकानि पंच–अव्ययानि लिखन्तु? –
7. चतुरः निपातशब्दान् लिखन्तु –

**अभ्यासप्रश्नाः 02 अधोलिखितेषु अव्ययशब्देषु एकैकस्य वाक्यप्रयोगं कुर्वन्तु–**

1. तत्र–अत्र –
2. उच्चैः–नीचैः –
3. यथा–तथा –
4. यावत्–तावत् –
5. शीघ्रम्–मन्दम् –
6. सायम्–प्रातः –
7. अन्तः–बहिः –
8. इतः–ततः –

**अभ्यासप्रश्नाः 03 अधोलिखितेषु वाक्येषु अव्ययशब्दान् चित्वा लिखन्तु–**

1. यथा हिमालयपर्वतः अस्ति तथा अन्यपर्वतः नास्ति। –
2. गृहस्य अन्तः सुन्दरं मन्दिरम् अस्ति। –
3. वने अनेके जन्तवः सन्ति तेषु गजः मन्दं चलति। –
4. अद्य अधिकं भोजनं न करोमि किंचिदेव पर्याप्तम्। –
5. हनुमन्तं बिना रामः समुद्रं न तरति। –
6. यदा बालकस्य कृते चाकलेहं दीयते तदा तूष्णीं भवति।–
7. यदि कस्यचित् पार्श्वे धनमस्ति तर्हि सः दानं कुर्यात्। –

8. निश्क्रियाः जनाः कथंचित् जीवनं यापयन्ति। –

**अभ्यासप्रश्नाः 03 अधोलिखितानि वाक्यानि अव्ययशब्दैः पूरणीयानि–**

1. ....................बुधवासरः अस्ति...........................गुरुवासरः अस्ति।
2. अश्वः......................चलति, गजः...........................चलति।
3. ............................कृष्ण अस्ति...........................कंसः नास्ति।
4. विद्यालयात्........................................प्रांगणम् अस्ति।
5. अहं राष्ट्रपतिं.....................................दृष्टवान्।
6. संसदभवनं................................अस्ति।
7. रामेण....................लक्ष्मणः वनं गतवान्।
8. ...........................दीपावलीपर्व अस्ति।
9. रात्रौ................................सर्पः आगतः।
10. सज्जनानां कृते द्वारे................................तालः।

## 2.6 सारांशः

संस्कृतभाषायां येषु शब्देषु विकारः परिवर्तन वा न सम्भवति, ते अव्ययनाम्ना ज्ञायन्ते। अर्थात् लिंग–विभक्ति–वचनदृष्ट्या यस्मिन् शब्दे परिवर्तनं कर्तुं न शक्यते, तत् अव्ययम् इति उच्यते। संस्कृते अव्ययानां वर्गीकरणं पंचविधम् अस्ति। यथा– क्रियाविशेषणं, सम्बन्धबोधकं, समुच्चयबोधकं, विस्मयबोधकं, निपातः च। क्रियाविशेषणस्य अपि चत्वारः भेदाः सन्ति। यथा– कालवाचकं, परिमाणवाचकं, स्थानवाचकं, रीतिवाचकं च इति। संस्कृते अव्ययानां संख्या निर्धारिता नास्ति, प्रसिद्धानाम् अव्ययानाम् अतिरिक्तं क्त्वा प्रत्ययान्ताः शब्दाः, ल्यप् प्रत्ययान्ताः शब्दाः, तुमुन् प्रत्ययान्ताः शब्दाः अपि अव्ययसंज्ञां प्राप्नुवन्ति। संस्कृतभाषायां भूयांसि अव्ययानि सन्ति। येषां प्रयोगः वाग्व्यवहारे रोचकतां, सरलतां, चमत्कृतिं, विशिष्टतां च आनेतुं भवति।

## 2.7 प्रश्नानाम् उत्तराणि

**अभ्यासप्रश्ना 01 अधोलिखितस्य प्रश्नानाम् उत्तराणि लिखन्तु–**

1. न। 2. न। 3. पंच।

4. येन अव्ययेन क्रियासम्बद्धानां स्थानवाचकानां बोधः जायते।

**5.** रे, अरे, हे, अहो, हा।6. अपि, तर्हि, पर्यन्तम्, तः।

**अभ्यासप्रश्नाः 02 अधोलिखितेषु अव्ययशब्देषु एकैकस्य वाक्यद्वयं निर्मान्तु–**

1. तत्र विद्यालयः अस्ति, अत्र मम गृहम् अस्ति।
2. खलः उच्चैः भाषते, सज्जनः नीचैः भाषते।

3. यथा अमेरिकादेशः अस्ति, तथा पाकिस्तानदेशः नास्ति।
4. यावत् जलं कूप्यां भवति, तावत् जलं चषके न भवति।
5. रेलयानं शीघ्रं चलति, रिक्शायानं मन्दं चलति।
6. सायं सूर्यास्तः भवति, प्रातः सूर्योदयः भवति।
7. गृहस्य अन्तः पाकशाला भवति, गृहात् बहिः उद्यानम् अस्ति।
8. इतः मन्दिरं गच्छतु ततः कार्यालयं गच्छतु।

**अभ्यासप्रश्नाः 03 अधोलिखितेषु वाक्येषु अव्ययशब्दान् चित्वा लिखन्तु–**

1. यथा, तथा । 2. अन्तः । 3.मन्दं ।4. अद्य, न, किंचिदेव, पर्याप्तम्।

5. बिना, न । 6. यदा, कृते, तदा, तूष्णीम्। 7. यदि, पार्श्वे, तर्हि। 8. कथंचित् ।

**अभ्यासप्रश्नाः 04 अधोलिखितानि वाक्यानि अव्ययशब्दैः पूरणीयानि–**

1. अद्य, श्वः। 2. शीघ्रं, मन्दम्। 3. यथा, तथा। 4. बहिः। 5. साक्षात्।

. 6. कुत्र। 7. सह। 8. अद्य। 9. अकस्मात्। 10. वृथा।

## 2.8 सन्दर्भग्रन्थसूची

1. प्रौढ–रचनानुवादकौमुदी, डॉ. कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशनं, वाराणसी।
2. अनुवाद चन्द्रिका, डॉ. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

## 2.9 सहायकोपयोगि–पाठ्यसामग्री–

1. भाषाप्रवेशः, संस्कृतभारती, नवदेहली।

# तृतीय इकाईः समयबोधः, दिशाबोधः, प्रश्नवाचकशब्दाश्च

3.1. प्रस्तावना
3.2 उद्देश्यम्
3.3 अधोलिखितानि वाक्यानि सम्यक्तया पठन्तु
3.4 घटिकां दृष्ट्वा समयकथनम्
3.5 मम दिनचर्या
3.6 समयकथनस्य विशिष्टप्रयोगाः
3.6 दिक् परिचयः
3.6.1 दिशावाचकशब्दानां प्रयोगः
3.6.2 दिक्वाचकशब्दैः सह तसिल् (तः) प्रत्ययस्य प्रयोगः
3.6.3 दिक् शब्दरूपस्य रूपाणि
3.7 सारांशः
3.8 अभ्यासप्रश्नानाम् उत्तराणि
3.9 सन्दर्भग्रन्थसूची
3.10 सहायकोपयोगि–पाठ्यसामग्री

## 3.1. प्रस्तावना

भाषा व्यवहारप्रधाना भवति। व्यवहारः अपरिमितः। भाषा व्यवहारे दिनचर्यायाः दैनन्दिनीलेखनस्य च बहु महत्त्वम् अस्ति। दिनचर्यायाः प्रयोगार्थं समयलेखनस्य कथनस्य वा महती आवश्यकता भवति। संस्कृते समयकथनार्थं संख्याज्ञानम् अपि आवश्यकम्। यदि संख्या ज्ञानम् अस्ति, तर्हि सामान्यरूपेण घटिकायन्त्रस्य सहायतया च समयकथनं कर्तुं शक्यते। एवमेव सम्भाषणसमये दिशां बोध अपि नूनमेव आवश्यकः। समयज्ञानेन दिक्ज्ञानेन च भवन्तः सम्भाषणे दक्षतां प्राप्तुं शक्नुवन्ति। अस्याम् अन्वितौ भवन्तः समयसम्बद्धवाक्यानां दिशासम्बद्धवाक्यानां च ज्ञानं प्राप्स्यन्ति।

## 3.2 उद्देश्यम्

इमाम् अन्वितिं पठित्वा भवन्तः –

1. समयवाचकशब्दान् ज्ञास्यन्ति।
2. व्यवहारे समयस्य प्रयोगं कर्तुं शक्ष्यन्ति।
3. घटिकां दृष्ट्वा समयकथने सक्षमाः भविष्यन्ति।
4. समयवाचकविशिष्टपदानाम् अर्थं ज्ञास्यन्ति।
5. दिशावाचकशब्दान् ज्ञास्यन्ति।
6. व्यवहारे दिशावाचकपदानां प्रयोगं कर्तुं शक्ष्यन्ति।
7. दिक्कालवर्गस्य विशिष्टं प्रयोगं ज्ञास्यन्ति।

## 3.3 अधोलिखितानि वाक्यानि सम्यक्तया पठन्तु

| | |
|---|---|
| **1. श्रेयांशः प्रातः षड्वादने उत्तिष्ठति।** | श्रेयांश प्रातः छह बजे उठता है। |
| **2. सप्तवादने ध्यानं स्तुतिं च करोति** | सात बजे ध्यान और स्तुति करता है। |
| **3. माता अष्टवादने अल्पाहारं पचति।** | मॉ आठ बजे नाश्ता बनाती है। |
| **4. पिता भ्रमणात् सार्धसप्तवादने आगच्छति।** | पिताजी साढ़ेसात बजे आते है। |
| **5. प्रिया पादोनदशवादने निद्राति।** | प्रिया पौने दस बजे सोती है। |
| **6. श्वः द्विवादने आयार्यः पाठयिष्यति।** | आचार्य कल(आनेवाला) दो बजे पढ़ायेगें। |
| **7. परश्वः रविवासरः अस्ति।** | परसों रविवार है। |
| **8. ह्यः गिरीशः गीतवान्।** | कल(बीता हुआ) गिरीश ने गाया। |
| **9. अद्य गृहप्रवेशकार्यक्रमः अस्ति।** | आज गृहप्रवेश का कार्यक्रम है। |
| **10. इदानीं कः समयः ?** | अभी क्या समय है ? |
| **11. इदानीं त्रिवादनम्।** | अब तीन बजे हैं। |

## 3.4 घटिकां दृष्ट्वा समयकथनम्

अत्र बहव्यः घटिकाः निर्मिताः सन्ति, तासु जायमानस्य समयस्य सम्यक्तया वाचनाभ्यासं कुर्वन्तु–



पंचवादनम्



सपाद–पंचवादनम्



सार्ध–पंचवादनम्



पादोन–षड्वादनम्



षड्वादनम्



सपाद–षड्वादनम्



सार्ध–षड्वादनम्



पादोन–सप्तवादनम्



सप्तवादनम्



सपाद–सप्तवादनम्



सार्ध–सप्तवादनम्



पादोन–अष्टवादनम्

| | |
|---|---|
| 8:00 | अष्टवादनम् |
| 8:10 | दशाधिक–अष्टवादनम् |
| 8:15 | सपाद–अष्टवादनम् |
| 8:20 | विंशत्यधिक–अष्टवादनम् |
| 8:30 | सार्ध–अष्टवादनम् |
| 8:40 | चत्वारिंशदधिक–अष्टवादनम् |
| 8:45 | पादोन–नववादनम् |
| 8:50 | दशोन–नववादनम् |
| 9:00 | नववादनम् |
| 9:15 | सपाद–नववादनम् |
| 9:30 | सार्ध–नववादनम् |
| 9:45 | पादोन–दशवादनम् |



दशवादनम्



सपाद–दशवादनम्



सार्ध–दशवादनम्



पादोन–एकादशवादनम्



पंचोन–एकादशवादनम्



एकादशवादनम्



सपाद–एकादशवादनम्



विंशत्यदधिक–एकादशवादनम्



सार्ध–एकादशवादनम्



पादोन–द्वादशवादनम्



दशोन–द्वादशवादनम्



द्वादशवादनम्


1:00
एकवादनम्
1:15
सपाद–एकवादनम्
1:30
सार्ध–एकवादनम्
1:45
पादोन–द्विवादनम्
2:00
द्विवादनम्
2:15
सपाद–द्विवादनम्
2:30
सार्ध–द्विवादनम्
2:45
पादोन–त्रिवादनम्
3:00
त्रिवादनम्
3:15
सपाद–त्रिवादनम्
3:30
सार्ध–त्रिवादनम्
3:45
पादोन–चतुर्वादनम्

| | | |
|---|---|---|
| 4:00 | 4:05 | 4:10 |
| चतुर्वादनम् | पंचाधिक–चतुर्वादनम् | शाधिक–चतुर्वादनम् |
| 4:15 | 4:25 | 4:30 |
| सपाद–चतुर्वादनम् | पंचविंशत्यदधिक–चतुर्वादनम् | सार्ध– चतुर्वादनम् |
| 4:35 | 4:40 | 4:45 |
| पंचत्रिशदधिक–चतुर्वादनम् | चत्वारिंशदधिक– चतुर्वादनम् | पादोन–पंचवादनम् |
| 4:50 | 4:55 | 5:00 |
| दशोन–पंचवादनम् | पंचोन–पंचवादनम् | पंचवादनम् |

## 3.5 मम दिनचर्या

1. अहं पंचवादने जागरणं करोमि। 5:00
2. षड्वादने ध्यानं करोमि। 6:00
3. सप्तवादने स्वाध्यायं करोमि। 7:00
4. अष्टवादने अल्पाहारं करोमि। 8:00

5. सपादनववादने विद्यालयं गच्छामि। 9:15
6. दशवादनतः त्रिवादनं यावत् कक्षां पठामि। 10:00 – 3:00
7. सायं पादोनपंचवादने क्रीडार्थं गच्छामि। 4:45
8. सार्धषड्वादने पुनः ध्यानं करोति। 6:30
9. सप्तवादनतः सपाद–अष्टवादनपर्यन्तं लेखनं करोमि। 7:00 – 8:15
10. सार्ध–अष्टवादने भोजनं करोमि। 8:30
11. पंचोनदशवादनपर्यन्तं स्वाध्यायं करोमि। 9:55
12. दशाधिकदशवादने दीपनिर्वापं करोमि। 10:10

## 3.6 समयकथनस्य विशिष्टप्रयोगाः–

1. **वादनम्** – बजे के लिए।
2. **सपाद** – सवा के लिए।
3. **सार्ध** – आधे के लिए।
4. **पदोन** – पौन के लिए।
5. **एकवादनम्** – एक बजे ।
1. **द्विवादनम्** – दो बजे ।
2. **त्रिवादनम्** – तीन बजे ।
3. **चतुर्वादनम्** – चार बजे ।
4. **सपाद–एकवादनम्** – सवा एक बजे ।
5. **सार्ध–एकवादनम्** – डेढ बजे।
6. **पदोन–एकवादनम्** – पौने एक बजे।
7. **पंचोन–एकवादनम्** – एक बजने में पांच मिनट कम के लिए।
8. **पंचाधिक–एकवादनम्** – एक बजकर पांच मिनट अधिक के लिए।
9. **अद्य** – आज
10. **श्वः** – कल (आने वाला)
11. **इदानीम्** – अब
12. **ह्यः** – कल(बीता हुआ)
13. **परश्वः** – परसों(आने वाला)
14. **प्रपरश्वः** – परसों के बाद वाला आनेवाला दिन
15. **परह्यः** – परसों(बीता हुआ)
16. **प्रपरह्यः** – (बीते हुये) परसों से पहले वाला दिन
17. **आगामि** – आने वाला
18. **गत** – बीता हुआ
19. **सप्ताहः** – सप्ताह
20. **पक्षः** – पखवाड़ा
21. **मासः** – महीना

| | | | |
|---|---|---|---|
| 22. | **वर्षम्** | – | वर्ष / साल |
| 23. | **संवत्सरः / वत्सरः** | – | वर्ष / साल |

**अभ्यासप्रश्नाः**

**अभ्यासप्रश्नाः 01 अधोलिखितं समयम् अक्षरैः लिखन्तु–**

| | | | | | |
|---|---|---|---|---|---|
| 1. | 1:00 | – एकवादनम् | 13. | 7:00 | – सप्तवादनम् |
| 2. | 1:15 | – | 14. | 7:15 | – |
| 3. | 1:30 | – | 15. | 7:45 | – |
| 4. | 1:45 | – | 16. | 7:50 | – |
| 5. | 2:00 | – | 17. | 8:10 | – |
| 6. | 2:30 | – | 18. | 8:55 | – |
| 7. | 3:45 | – | 19. | 9:15 | – |
| 8. | 4:15 | – | 20. | 9:40 | – |
| 9. | 5:10 | – | 21. | 10:25 | – |
| 10. | 5:30 | – | 22. | 10:50 | – |
| 11. | 6:00 | – | 23. | 11:15 | – |
| 12. | 6:30 | – | 24. | 12:00 | – |

**अभ्यासप्रश्नाः 02 अधोलिखितं समयम् अंकैः लिखन्तु–**

| | | | | | |
|---|---|---|---|---|---|
| **1.** | एकवादनम् | – | 13. | दशोन–अष्टवादनम् | |
| **2.** | द्विवादनम् | – | 14. | अष्टवादनम् | – |
| **3.** | सार्धद्विवादनम् | – | 15. | विंशत्यधिक–अष्टवादनम् | – |
| **4.** | त्रिवादनम् | – | 16. | पादोननववादनम् | – |
| **5.** | सपादत्रिवादनम् | – | 17. | सपादनववादनम् | – |
| **6.** | चतुर्वादनम् | – | 18. | दशोनदशवादनम् | – |
| **7.** | सार्धचतुर्वादनम् | – | 19. | सार्धदशवादनम् | – |
| **8.** | पंचवादनम् | – | 20. | पंचोन–एकादशवादनम् | – |
| **9.** | सपादपंचवादनम् | – | 21. | एकादशवादनम् | – |
| **10.** | पादोनषड्वादनम् | – | 22. | सपाद–एकादशवादनम् | – |
| **11.** | सप्तवादनम् | – | 23. | पादोन–द्वादशवादनम् | – |
| **12.** | दशाधिकसप्तवादनम् – | | 24. | द्वादशवादनम् | – |

**अभ्यासप्रश्नाः 03 अधोलिखितस्य शुद्धशब्दस्य अग्रे कोष्ठके (✓) अशुद्धशब्दस्य अग्रे कोष्ठके (✗) इति**

**चिह्नं कुर्वन्तु–**

| | | | |
|---|---|---|---|
| एकवादनम् | (................) | एकं वादनम् | (................) |
| सपादं एकं वादनम् | (................) | सपादएकवादनम् | (................) |
| त्रिवादनम् | (................) | त्रीणि वादनम् | (................) |
| चत्वारि वादनम् | (................) | चतुर्वादनम् | (................) |

| | | | |
|---|---|---|---|
| पंचम वादनम् | (................) | पंचवादनम् | (................) |
| सप्तवादनम् | (................) | सप्तमम् वादनम् | (................) |
| द्वे वादनम् | (...............) | द्विवादनम् | (................) |
| सार्धं षड्वादनम् | (................) | सार्धषड्वादनम् | (................) |

**4.3.8 दिक्विषयकानि इमानि वाक्यानि ध्यानेन पठन्तु–**

1. भारतस्य पूर्वस्यां दिशि अरुणांचलप्रदेशः अस्ति।
2. भारतस्य पश्चिमायां दिशि गुजरातप्रदेशः अस्ति।
3. भारतस्य उत्तरस्यां दिशि हिमालयः अस्ति।
4. भारतस्य दक्षिणायां दिशि हिन्दमहासागरः अस्ति।

## 3.4 दिक् परिचयः

संस्कृतभाषायां दिक्शब्दाः स्त्रीलिंगे प्रयुज्यते। स्थूलरूपेण चतस्रः दिशः भवन्ति। यथा– प्राची, प्रतीची, उदीची, अवाची च। सामान्यरूपेण एतासां दिशाम् अभिधानं पूर्वा, पश्चिमा, उत्तरा, दक्षिणा च वर्तते। किन्तु ज्योतिषशास्त्रदृष्ट्या दशदिशः प्रसिद्धाः सन्ति। यथा– पूर्वा, आग्नेयी, दक्षिणा, नैऋती, पश्चिमा, वायवी, उत्तरा, ऐशानी, उर्ध्वम्, अधः च।

उत्तर



पूर्वा

दक्षिणा

3.6.1 दिशावाचकशब्दानां प्रयोगः–

1. भारतस्य पूर्वदिशि त्रिपुरसुन्दरीमन्दिरम् अस्ति।
2. भारतस्य दक्षिण–पूर्वदिशि जगन्नाथपुरीमन्दिरम् अस्ति।
3. भारतस्य दक्षिणदिशि रामेश्वरमन्दिरम् अस्ति।
4. भारतस्य दक्षिणपश्चिमदिशि महाराष्ट्रम् अस्ति।
5. भारतस्य पश्चिमदिशि दमनद्वीपम् अस्ति।
6. भारतस्य पश्चिमोत्तरदिशि राजस्थानं विद्यते।

7. भारतस्य उत्तरदिशि बदरीनाथमन्दिरम् अस्ति।
8. भारतस्य उत्तरपूर्वदिशि बिहारराज्ये गयातीर्थं वर्तते।

### 3.6.2 दिक्वाचकशब्दैः सह तसिल् (तः) प्रत्ययस्य प्रयोगः

पुरतः – गृहस्य पुरतः उद्यानम् अस्ति।

पृष्ठतः – रामस्य पृष्ठतः लक्ष्मणः चलति।

वामतः – विद्यालयस्य वामतः पत्रालयः अस्ति।

दक्षिणतः– भारतस्य दक्षितः समुद्रम् अस्ति।

अधः – वृक्षस्य अधः पशवः चरन्ति।

उपरि – वृक्षस्य उपरि वानराः कूर्दन्ति।

**अवधेयम्**–पुरतः, पृष्ठतः, दक्षिणतः वामतः, उपरिः, अधः, अन्तः इत्येतेषां योगे षष्ठीविभक्तिः भवति।

### 3.6.3 दिक् शब्दरूपस्य रूपाणि

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | दिक्/दिग् | दिशौ | दिशः |
| द्वितीया | दिशं | दिशौ | दिशः |
| तृतीया | दिशा | दिग्भ्याम् | दिग्भिः |
| चतुर्थी | दिशे | दिग्भ्याम् | दिग्भ्यः |
| पंचमी | दिशः | दिग्भ्याम् | दिग्भ्यः |
| षष्ठी | दिशः | दिशोः | दिशाम् |
| सप्तमी | दिशि | दिशोः | दिक्षु |
| सम्बोधनम् | हे दिक्/दिग् | हे दिशौ | हे दिशः |

अभ्यासप्रश्नाः 04 अधोलिखितानुसारं प्रश्नानाम् उत्तराणि लिखन्तु–

1. त्रिपुरसुन्दरीमन्दिरं भातस्य कस्यां दिशि अस्ति –
2. महाराष्ट्रं भारतस्य कस्यां दिशि अस्ति –
3. राजस्थानं भारतस्य कस्यां दिशि विद्यते –
4. भारतस्य कस्यां दिशि बदरीनाथमन्दिरम् अस्ति –

अभ्यासप्रश्नाः 05 उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु–

यथा–**बालकस्य** पुरतः शकटः अस्ति। (बालकः)

1. ............................पृष्ठतः गृहाणि सन्ति। (उद्यानम्)
2. ...............................उपरि फलानि सन्ति। (वृक्षः)
3. वाक्यं.........................................उपरि लिखितम् अस्ति। (कृष्णफलकम्)
4. जलम्............................................अन्तः अस्ति। (कूपी)
5. लेखनी...........................................अन्तः भवति। (स्यूतः)
6. बालकाः .........................................अधः सन्ति। (वृक्षाः)
7. पाकशाला.............................................दक्षिणतः अस्ति। (गृहम्)
8. भावचित्रं...............................................वामतः अस्ति। (अध्यापकः)

## 3.5 सारांशः

संस्कृतभाषायां समयज्ञानाय, समयकथनाय च संख्यावाचकशब्दाः अपेक्षिताः भवन्ति। अत्र समयकथनाय संख्यानाम् अतिरिक्तं वादन–ऊन–अधिक–सपाद–सार्ध–पदोन–इत्यादिनां विशिष्टपदानां प्रयोगः कृतः। दिशाबोधाय प्राची, प्रतीची, उदीची, अवाची, पूर्वा, पश्चिमा, उत्तरा, दक्षिणा च इत्यादिनां शब्दानां प्रयोगः भवति। दिशावाचकशब्दाः प्रायेण स्त्रीलिंगे प्रयुज्यन्ते। समयवाचकानां शब्दानां दिशाबोधकानां च शब्दानां सहायतया भवन्तः संस्कृते अपि समयकथनं, दिशाज्ञापनं च कर्तुं शक्नुवन्ति।

## 3.6 अभ्यासप्रश्नानाम् उत्तराणि

**अभ्यासप्रश्नाः 01 उत्तराणि**

| | | | |
|---|---|---|---|
| 1. | एकवादनम् | 13. | सप्तवादनम् |
| 2. | सपाद–एकवादनम्। | 14. | सपाद–सप्तवादनम्। |
| 3. | सार्ध–एकवादनम्। | 15. | पादोन–अष्टवादनम्। |
| 4. | पादोन–एकवादनम्। | 16. | दशोन–अष्टवादनम् |
| 5. | पदोन–द्विवादनम्। | 17. | दशाधिक–अष्टवादनम्। |
| 6. | द्विवादनम्। | 18. | पंचोन–नववादनम्। |
| 7. | सार्ध–द्विवादनम्। | 19. | सपाद–नववादनम्। |
| 8. | पादोन–चतुर्वादनम्। | 20. | चत्वारिंशतधिक–नववादनम्। |
| 9. | सपाद–चतुर्वादनम्। | 21. | पंचविंशत्यधिक–दशवादनम्। |
| 10. | दशाधिक–पंचवादनम्। | 22. | दशोन–एकादशवादनम्। |
| 11. | सार्धपंचवादनम्। | 23. | सपाद–एकादशवादनम्। |
| 12. | षड्वादनम्। | 24. | द्वादशवादनम्। |

**अभ्यासप्रश्नाः 02 अधोलिखितं समयम् अंकैः लिखन्तु–**

| | | | | |
|---|---|---|---|---|
| **1.** | 1:00 | – | 13. | 7:50 |
| **2.** | 2:00 | – | 14. | 8:00 |
| **3.** | 2:30 | – | 15. | 8:20 |
| **4.** | 3:00 | – | 16. | 8:45 |
| **5.** | 3:15 | – | 17. | 9:15 |
| **6.** | 4:00 | – | 18. | 9:50 |

| | | | | |
|---|---|---|---|---|
| **7.** | 4:30 | — | 19. | 10:30 |
| **8.** | 5:00 | — | 20. | 10:55 |
| **9.** | 5:15 | — | 21. | 11:00 |
| **10.** | 5:45 | — | 22. | 11:00 |
| **11.** | 7:00 | — | 23. | 11:45 |
| **12.** | 7:10 | — | 24. | 12:00 |

**अभ्यासप्रश्नाः 03 उत्तराणि—**

| | | | |
|---|---|---|---|
| एकवादनम् | (✔) | एकं वादनम् | (✘) |
| सपादं एकं वादनम् | (✘) | सपाद—एकवादनम् | (✔) |
| त्रिवादनम् | (✔) | त्रीणि वादनम् | (✘) |
| चत्वारि वादनम् | (✘) | चतुर्वादनम् | (✔) |
| पंचम वादनम् | (✘) | पंचवादनम् | (✔) |
| सप्तवादनम् | (✔) | सप्तमम् वादनम् | (✘) |
| द्वे वादनम् | (✘) | द्विवादनम् | (✔) |
| सार्धं षड्वादनम् | (✘) | सार्धषड्वादनम् | (✔) |

**अभ्यासप्रश्नाः 04 उत्तराणि—**

1. भारतस्य पूर्वदिशि। 2. भारतस्य दक्षिणपश्चिमदिशि
3. भारतस्य पश्चिमोत्तरदिशि। 4. भारतस्य उत्तरदिशि।

**अभ्यासप्रश्नाः 05 उत्तराणि—**

1. उद्यानस्य। 2. वृक्षस्य। 3. कृष्णफलकस्य। 4. कूप्याः।

5. स्यूतस्य। 6. वृक्षस्य। 7. गृहस्य। 8. अध्यापकस्य

## 3.7 सन्दर्भग्रन्थसूची

1. प्रौढ—रचनानुवादकौमुदी, डॉ. कपिलदेव द्विवेदी, विश्वविद्यालयप्रकाशनं, वाराणसी।
2. अनुवाद चन्द्रिका, डॉ. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

## 3.8 सहायकोपयोगि—पाठ्यसामग्री—

1. भाषाप्रवेशः, संस्कृतभारती, नवदेहली।
2. सम्भाषणम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

# चतुर्थ इकाईः संस्कृतकथाः, संस्कृतगीतानि, हास्यकणिका च

4.1. प्रस्तावना
4.2 उद्देश्यम्
4.3 विविधाः संस्कृतबोधकथाः
4.3.1 मानवः
4.3.2 विनम्रता
4.3.3पूजा
4.3.4 महत्ता
4.3.5 अस्पृश्यता
4.3.6 दुर्वचनम्
4.3.7 दुराशा
4.3.8 परहितम्
4.3.9 कृतज्ञता
4.3.10 परोपकारः
4.3.11 कौ भवन्तौ?
4.3.12 लोभः
4.3.14 स्वावलम्बनम्
4.3.15 मानहानिः
4.4 विविधानि संस्कृतगीतानि
4.4.1 जय जय हे भगवति!
4.4.2 वाणी–वन्दना
4.4.3 अवनितलं पुनरवतीर्णा स्यात्
4.4.4 सुन्दरसुरभाषा
4.4.5 जयतु जननी
4.4.6 ध्येयपथिकसाधकऽऽ
4.4.7 भारतधरणीयं मामकजननीयम्
4.4.8 नैव क्लिष्टा न च कठिना
4.4.9 लोकहितं मम करणीयम्
4.4.10 मृदपि च चन्दनम्
4.4.11 संस्कृतस्य सेवनम्
4.4.12 पाठयेम संस्कृतम्
4.4.13 भारतं भारतीयं नमामो वयम्
4.4.14 भाति मे भारतम्
4.4.15 धीवरगानम्
4.5 विविधाः हास्यकणिकाः
4.5.1 कण्डूतिः चर्मरोगः वा
4.5.2अहं धावननिपुणः
4.5.3अहो विस्मरणशीलता
4.6 सारांशः
4.7 सन्दर्भग्रन्थसूची
4.8 सहायोपयोगिग्रन्थसूची

## 4.1. प्रस्तावना

भाषा द्विधा भवति। साहित्यिकी भाषा, व्यावहारिकी भाषा च। यस्यां भाषायां लिखितरूपेण पठितरूपेण वा विचाराणाम् आदान–प्रदानं भवति, सा साहित्यिकी भाषा, एवमेव यस्यां भाषायां मौखिकरूपेण विचाराभिव्यक्तिः क्रियते, सा व्यावहारिकभाषा भवति। संस्कृतभाषा प्राचीनकालाद् एव साहित्यभाषा रूपेण व्यवहारभाषारूपेण चापि प्रतिष्ठिता आसीत्। सम्प्रति अपि अस्यां भाषायां विविधं साहित्यं लिख्यमानम् अस्ति। साहित्यस्य केन्द्रं काव्यं भवति, काव्यं त्रिविधं गद्यकाव्यं, पद्यकाव्यं, रूपकं च छन्दरहितं काव्यं गद्यं तथा छन्दोयुक्तं काव्यं पद्यं भवति। गद्यं कथा, आख्यायिका इत्येतेन भेदेन द्विधं भवति। पद्यकाव्यं च महाकाव्यं, खण्डकाव्यं, चम्पूकाव्यं चेति त्रिविधम्। कथाः ज्ञानात्मिकाः, भावात्मिकाः, क्रियात्मिकाः, मनोरंजनपूर्णाः च भवन्ति। एताः संस्कारशिक्षणे नीतिशिक्षणे, मूल्यशिक्षणे च महत्त्वपूर्णां भूमिकां निर्वहन्ति। पद्यकाव्येषु गीतानां महत्त्वमपि विशिष्टं भवति। गीतमाध्यमेन विविधेषु विषयेषु जनजागरणं संस्कृतभाषां प्रति रुत्युपादनं च क्रियते। अस्याम् अन्वितौ भवन्तः संस्कृते कथानां गीतानां च विषये विस्तरेण ज्ञास्यन्ति।

## 4.2 उद्देश्यम्

इमाम् अन्वितिं पठित्वा भवन्तः–

3. संस्कृते कथाकथनं ज्ञास्यन्ति।
4. कथानां वाचनकौशलं प्राप्स्यन्ति।
5. कथामाध्यमेन विविधशब्दानां भावानां ज्ञानं प्राप्स्यन्ति।
6. संस्कृते गीतगानस्य अभ्यासं करिष्यन्ति।
7. संस्कृतगीतानाम् अनुगुणम् अभिनयशिक्षणं प्राप्स्यन्ति।
8. हास्यकाणिका कथनस्य विशिष्टशैलीं ज्ञास्यन्ति।
9. संस्कृतसम्भाषणे एतेषाम् अनुप्रयोगं करिष्यन्ति।

## 4.3 विविधाः संस्कृतबोधकथाः

### 4.3.1 मानवः

कस्मिंश्चन विद्यालये भूगोलस्य अध्यापकेन विश्व–मानचित्रस्य अनेकशः लघुखण्डाः कृताः। सः तान् एकत्रीकृत्य छात्रान् अकथयत्– ''इमान् खण्डान् संयोज्य विश्वस्य मानचित्रं पुनः पूरयन्तु''।

खण्डानां संयोजनं दुःसाध्यम् आसीत्। अनेकैः छात्रैः प्रयत्नः कृतः, परं ते असफलाः अभवन्। तेषु एकः छात्रः चतुरतमः आसीत्। सः तान् खण्डान् परिवर्त्य अपश्यत्, यत् तेषां पृष्ठभागे मानवस्य आकृतेः रेखाचित्रम् अंकितम् आसीत्। सः सर्वान् खण्डान् परिवर्त्य मानवस्य चित्रं समयोजयत्। तेन मानचित्रम् अपि सरलतया संयुक्तम् अभवत्।

अध्यापकः अभाष– ''वस्तुतः मानवचित्रं विश्वस्य मानचित्रस्य कुंचिका वर्तते। सर्वे जनाः विश्वस्य मानचित्रं निर्मातुं संलग्नाः सन्ति, परन्तु कुंचिकानिर्माणं विस्मृतवन्तः। मनुष्यस्य हिते कृते सति विश्वं व्यवस्थितं भवेत्। यदि मनुष्यः अभ्यन्तरतः खण्डितः भवेत्, तर्हि विश्वनिर्माणं निरर्थकं स्यात्''।

पुरुषः यथा गृहं सज्जीकरोति तथा आत्मानं न सज्जयति। यथार्थतः सः आत्मानं विक्रीय वस्तूनि क्रीणाति।

**4.3.2 विनम्रता**

एकदा युधिष्ठिरः भीष्मपितामहम् अपृच्छत्– ''पितामह! कश्चित् बलवान् निर्बलम् अभिबाधेत, तदा निर्बलस्य किं कर्तव्यम्? केन उपायेन आत्मानं संरक्षेत्''?

पितामहः एकां कथां श्रावयित्वा समादधत्।

सरित्पतिः सागरः सर्वासां सरितां व्यवहारेण अतिप्रसन्नः आसीत्, किन्तु वेत्रवती–सरितः असन्तुष्टः अभवत्।

एकदा वेत्रवती स्वपतिं सागरम् अपृच्छत्– ''स्वामिन्! भवान् कस्मात् मत्तः एव सदा रुष्टः भवति? कः अपराधः मे? अहं न जाने, कृपया भवान् एव कथयतु''।

नीरनिधिः अवदत्– देवि! तव नाम वेत्रवती अस्ति। किन्तु वेत्रस्य एकः लघुः शकलः अपि अद्यावधि त्वया न आनीतः। अपराः सर्वाः सरितः स्वकूलेषु उद्भवानि बहूनि वस्तूनि समानीय मह्यं समर्पयन्ति''।

वेत्रवती उदतरत्– ''नाथ! नास्ति अत्रा कश्चित् मे दोषः। यदा अहं वेत्राणि विभेत्तुं वेगेन वहामि तदा तानि अवनम्य धरां संश्लिष्यन्ति। गते मे आवेगे पुनः पूर्ववत् उत्तिष्ठन्ति। तस्मात् एकम् अपि वेत्रं न मया लभ्यते।

''बलवति आक्रमणे सति अशक्तः सन्धिम् इच्छन् नमेत्''– इति पितामहस्य तात्पर्यम् आसीत्।

**4.3.3 पूजा**

एकदा पुष्पाणां मनसि आयातं यत् सदा हि वयम् एव प्रस्तरान् पूजयामः। इदं तु अन्यायं वर्तते। अस्मान् न कः अपि पूजयति।

प्रकृतिः तानि पुष्पाणि अवदत्। यदि युष्मभ्यं प्रस्तराणां पूजा न रोचते, मा कुरुत। अद्य आरभ्य प्रस्तराः युष्मान् पूजयिष्यन्ति। पूजा तु भविष्यति एव। तां विना लोक–प्रवाहः कथं प्रचलिष्यति? अन्यदिने प्रस्तरशकलाः पुष्पाणां पूजार्थं समागताः।

यावत् ते पुष्पेभ्यः आत्म–समर्पणम् आरब्धवन्तः, तावत् पुष्पाणां दलनं मर्दनं च अभवत्। तेषां दलानि पृथग्भूतानि भूमौ इतस्ततः विकीर्णानि।

संत्रस्तानि पुष्पाणि क्षमा–प्रार्थनार्थं प्रकृतिं समुपगतानि। तैः उक्तम्–''देवि! न वयं पूजायाः सम्मानम् इच्छामः। अस्माभिः अवगतम्, यत् पूजा–ग्रहणस्य अपेक्षया पूजा–करणम् एव श्रेयस्करम्।

**4.3.4 महत्ता**

पूर्वाश्रमे स्वामी रामतीर्थः महाविद्यालये अध्यापयति स्म। एकदा कक्षायां स्वामी श्याम–पट्टे एकां रेखां लिखित्वा छात्रान् अकथयत्–''इमां रेखां लघ्वीं कुरुत।

एकः छात्रः श्यामपट्टम् उपगम्य रेखाभागं वस्त्रेण प्रोंछितुं हस्तं प्रासारयत्। रामतीर्थः तं निरुध्य अब्रवीत्– ''अहं रेखां लघ्वीं कर्तुम् अकथयम् न तु प्रोंछितुं विकर्तुं वा''।

सर्वे विद्यार्थिनः विचिन्तयन्तः अपि न ज्ञातुम् अशक्नुवन् यत् विना विकृत्य रेखां कथं लघ्वी भवितुं शक्यते। एकः छात्राः उदतिष्ठत्। तेन रेखायाः समीपे तदपेक्षया दीर्घ–रेखा लिखिता। पूर्वा रेखा प्रोंछनं विना लघ्वी संवृत्ता।

स्वामी रामतीर्थः प्रसन्नः अभवत्। तस्य छात्रस्य विलक्षण–बुद्धिं प्रशंसन् अन्यान् छात्रान् तद्रेखायाः रहस्यम् अबोध्यत्। जीवने महत्त्वाकांक्षार्थं कंचित् अन्यजनम् अपकर्तुम् अनुचितम्। भवन्तः महत्त्वशालिनः भवितारः अन्ये स्वयमेव लघवः भविष्यन्ति।

### 4.3.5 अस्पृश्यता

संन्यास–ग्रहणस्य अनन्तरं स्वामी विवेकानन्दः भारतवर्षस्य यात्राम् अकुरुत। राष्ट्रस्य धर्मिक–विविधतां सामाजिक–वैमनस्यम् आर्थिक–दरिद्रतां च अवलोकितुं विभिन्न–प्रदेशस्य नगराणि ग्रामान् च अभ्रमत्। मथुरातः वृन्दावनं पदातिः गच्छन् पथि कुटीरात् बहिर् कंचन जनं तमाखुं पिबन्तम् अपश्यत्। प्रवासेन परिक्लान्तः सन् स्वामी विवेकानन्दः तस्मात् धूमपान–पात्रिकाम् अयाचत्।

सः जनः भीतः सन् लज्जया अकथयत्– ''महाराज! सम्मार्जिकः अहम् अस्पृश्यः च अस्मि। अतः मया इयं धूमपान–पात्रिकां कथं प्रदातुं शक्यते?

इति आकर्ण्य स्वामिनः प्रसारितः हस्तः अजानन् एव आकुंचितः अभवत्। यावत् सः द्वित्रिपदम् अग्रे गतः तावत् तस्य पादौ अवरुद्धौ भवतः। स्वामी व्यचिन्तयत्– 'जाति–कुलादेः सर्वस्य त्यागः एव संन्यासः। पुनरपि इमं जनम् अस्पृश्यं मन्यमानस्य मम कुलाभिमानः कथं जागरितः? अभ्यासजन्यस्य संस्कारस्य अयं दुष्प्रभावः वर्तते'। सः विनिवृत्य सम्मार्जिकस्य सकाशं पुनः आयातः। धूमपान–पात्रिकां याचित्वा सानन्दं धूमपानं कृतवान्। तस्मै च आशीर्वादम् अपि प्रदत्तवान्।

### 4.3.6 दुर्वचनम्

एकदा गौतम बुद्धः राज गृहस्य बैलुवने नाम अधिष्ठाने विराजते स्म। कश्चन युवकः भिक्षुकः–संघे सम्मिलितवान्। तस्य सम्बन्धि–ब्राह्मणः महात्मानं बुद्धम् अपशब्दान् कटुवचनानि च ब्रुवन् यदा व्यश्राम्यत्, तदा महात्मा बुद्धः शान्तमनसा तम् अपृच्छत्–''विप्र! तव वेश्मनि कश्चित् अतिथिः बन्धुः बान्धवः वा आयाति न वा''।

''आयाति'', ब्राह्मणः उदतरत्।

बुद्धः –''किं त्वं तस्मै स्वादु–व्यंजनानि परिवेषयसि''?

ब्राह्मणः –''आम्, तस्मै अतिथिजनाय परिवेषयामि''।

बुद्धः –''यदि अतिथिः तानि व्यंजनानि न गृह्णीयात्, तर्हि तानि वस्तूनि कं प्राप्स्यन्ति''?

ब्राह्मणः –''तानि वस्तूनि अस्माकम् एव भविष्यन्ति।

''अहं कदापि न तु कस्मैचन अपशब्दान् कटुवचनानि वा ददामि। त्वया ये अपशब्दाः मह्यं प्रदत्ताः तान् अहं न गृह्णामि। ते अपशब्दाः कं मेलिष्यन्ति? त्वाम् एव प्राप्स्यन्ति।

एतत् भाषितं श्रुत्वा ब्राह्मणः लज्जाभिभूतः अवनतः क्षमाम् अयाचत्।

### 4.3.7 दुराशा

यमुना तीरे द्वौ रासभौ अमिलताम्। तयो एकः रजकस्य बलिष्ठः, द्वितीयः च ऐन्द्रजालिकस्य दुर्बलः आसीत्। शुष्क घासं चरन्तम् ऐन्द्रजालिकरासभं दृष्ट्वा रजक–रासभः उक्तवान्– ''सखे! कृशकायः असि, प्रतीयते त्वत्स्वामी तुभ्यं पर्याप्त–भोजनं न ददाति। पश्य मे बलिष्ठं शरीरम्। त्वं मम स्वामिनः समीपं समागच्छ। समये सम्मानितम् अशनं प्राप्स्यसि। मन्त्रिणां परिधानानि परिवहन् आत्मगौरवम् अवाप्स्यसि। अहं तु मन्त्रिणां परिधानानि वहन् यदा कदा आत्मानं रासभाणां मन्त्री इति अभिमन्ये। त्वं शुष्कं घासं खादित्वा बहुमूल्यं जीवनं व्यर्थं यापयसि''।

ऐन्द्रजालिकस्य रासभः उदतरत्– ''मित्र! यत् त्वं वदसि, तत् सत्यम्। अहम् अपि विचारयामि। यद्यपि ते जीविकायां सुखं, शान्तिः च पर्याप्त–विश्रामः अपि विद्यते, तथापि नास्ति उन्नतेः अवसरः''।

–''अवसरस्य कः ते अभिप्रायः?'' रजकगर्दभः अपृच्छत्।

ऐन्द्रजालिक गर्दभेन उत्तरितम्–''मत्स्वामिनः एका षोडशी कन्या वर्तते। यदा सा रज्जोः उपरि दोलयति, मत्स्वामी तां ब्रवीति–पुत्री! यदि त्वं सुचारुतया स्वकर्तव्यं पालयसि तर्हि ते विवाहं श्रेष्ठिपुत्रेण सह कारयिष्यामि अन्यथा केनचित् गर्दभेन सार्धम्। तदा प्रभृति अहं प्रतीक्षे यत् कदाचित् तु सा रज्जोः पतिष्यति। तस्याः पतनसम्भावनया शुष्कघासं चरित्वा उपवासं वा विधाय ऐन्द्रजालिकस्य सेवासंलग्नः कालं यापयामि।

**4.3.8 परहितम्**

देवेभ्यः अस्थिप्रादानम् एव त्वत्पितुः मृत्युकारणम्–इति मातृ–मुखात् संश्रुत्य पिप्पलादः गौतमीतटे प्रतिकारभावेन तपः अतपत्। दीर्घकालानन्तरं भगवान् शिवः आविर्भूव अकथयत्–''वत्स! किमर्थं तप्यसे? अहं प्रसन्नः अस्मि, वरं वरय।

पिप्पलादः न्यवेदयत– ''प्रलयंकर! यदि भवान् प्रसन्नः अस्ति तर्हि तृतीयनेत्रम् उन्मिष्य देवान् भस्मसात् करोतु''।

भगवान् आशुतोषः प्राबोध्यत्–''पुत्र! सौम्यरूपेण अहम् उपस्थितः अस्मि। त्वं मे रौद्ररूपं न सहिष्यसे। तृतीय नेत्रं मा आमन्त्रयस्व अन्यथा सम्पूर्णविश्वं भस्मीभूतं भविष्यति''।

–''देवान् प्रति नास्ति मे विश्वासः, नापि तत्संचालितं विश्वं प्रति आस्था च'', पिप्पलादः अकथयत्।

मंगलरूपः शिवः अवादीत्–''अस्तु त्वं स्वहृदि मे रौद्ररूपम् आमन्त्रयस्व''। तथाकृते यावत् कपालमाली प्रलयंकररूपं दर्शितवान् तावत् पिप्पलादस्य देहे विकम्पनम् अभवत्। प्रतिरोम ज्वलदिव चेतनाहीनः सन् सः तीव्रस्वरेण शिवम् आह्वयत्। तदा हृत्स्थः प्रचण्डरूपः अन्तरदधत्। मया तु देवानां विनाशार्थं प्रार्थितः भवान् तु माम् एव भस्मीकर्तुं प्रारभत'', पिप्पलादः उक्तवान्।

भगवान् शिवः सस्नेहम् अवदत्–''वत्स! विनाशः तत्र एव उपक्रमते यत्र तस्य आ"वानं विधीयते। इन्द्रियाधिष्ठातृणां सूर्यचन्द्रादिदेवानां विनाशे सति शरीरं कथं स्थास्यति? परेषाम् अमंगलचिकीर्षताम् अमंगलं पूर्वं भवति। त्वत्पिता दधीचिः लोककल्याणाय स्वास्थीनि अपि अयच्छत्। पितुः गौरवाय तत्पुत्रः त्वं सर्वेषां शिवं चिन्तय।

पिप्पलादः विश्वनाथस्य चरणयोः आत्मानं न्यपातयत्।

**4.3.9 कृतज्ञता**

एकदा महावने कश्चित् व्याधः विषाक्तं बाणं मृगे चिक्षेप, किन्तु सः स्खलन् महापादपम् अविध्यत्। सः पादपः क्षिप्रम् अशुष्यत्। तस्य पलाशपुष्पाणि अपतन्। तस्य पादपस्य कोटरे शुकः निवसति स्म। सः कृतज्ञः भोजनाभावात् निराहारः म्लानः अपि अन्यत्र न गतः। तेन पादपेन सार्धं सः अपि अशुष्यत्।

सम सुख दुःखं शुकं, तस्य असंभाव्यं चेष्टितं च संप्रेक्ष्य देवेन्द्रः मनुष्यरूपेण तं शुकम् अब्रवीत्–''भो शुक! अहं त्वा पृच्छामि, निष्पलाशं निष्फलं वृक्षं किमर्थं सेवसे? अस्मिन् महारण्ये अन्ये अपि बहवः वृक्षाः वर्तन्ते। कथं न एनं वृक्षं त्यजसि''?

''तपसा अहं जाने यत् भवान् देवेन्द्रः अस्ति। भवतः स्वागतम्। अस्मिन् पादपे अहं जातः। अनेन अहं पुत्रभावेन पालितः सवंर्द्धितः संरक्षितः च शत्रुभिः। तस्मात् अस्मिन् विटपे मे प्रीतिः ममता च अस्ति। यदा अयं द्रुमः सशक्तः आसीत्, तर्हि तदाश्रितः अहं चिरात् जीवितम् अतिवाहितवान्। अधुना अयं विपन्नः, मया कथं त्यक्तुं शक्यते? अतः त्यागाय मां मा प्रेरयतु। करुणा हि साधूनां महतः धर्मस्य लक्षणम्'' इति शुकः अब्रवीत्।

तस्य सौम्येन वचनेन हर्षितः देवराजः शुकस्य शीलं विटपे च भक्तिं विज्ञाय विटपम् अमृतेन असिंचत्। तेन सः महान् विटपः पूर्ववत् मनोहराणि पलाशानि मधुराणि च फलानि बिभर्ति स्म। शुकः अपि तं पश्यन् हर्षितवान्।

**4.3.10 परोपकारः**

एकदा ईश्वरचन्द्रः विद्यासागरः मार्गे गच्छन् अपि पश्यति स्म कः तस्य सेवाम् अपेक्षते। एकस्मिन् दिवसे सः कोलकाता नगरे याति स्म। एकः सज्जनः तस्य दृष्टिपथम् आयातः, यः विमनस्कः नतमस्तकः गच्छन् आसीत्। ईश्वरचन्द्रः तम् अपृच्छत्–''कथं त्वम् इयान् उदासः असि''?

विद्यासागरः न तम् अभ्यजानात् सः च विद्यासागरम्। सः एकम् अनभिज्ञं पृच्छन्तं पुरुषं दीर्घं निःश्वस्य अकथयत्–''अहम् विपदग्रस्तः अस्मि''।

–''भवान् कः, का विपत्तिः त्वयि''? ईश्वरचन्द्रः अब्रवीत्।

साधरणं वस्त्रं परिदधानं विद्यासागरं दृष्ट्वा सामान्यं निर्धनं च मन्यमानः सः प्रत्यवदत्–''भवान् श्रुत्वा अपि किं करिष्यति? त्वं किंचित् साहाय्यम् अपि कर्तुं न शक्नोषि''? तं पुनः पुनः आग्रहं कुर्वाणं स्वविपदम् आश्रावयत्।

सः ब्राह्मण आसीत्। कन्यायाः परिणयनावसरे सः अधमर्णः संजातः। उत्तमर्ण–महाजनेन तस्मिन् अभियोगः कारितः। तस्मिन् वित्तं प्रदातुं सामर्थ्यं नास्ति।

विद्यासागरः तस्य नाम धाम परिचयं कस्मिन् च न्यायालये अभियोगः–इति सर्वं संपृच्छय तं प्रति सहानुभूतिं च प्रदर्शयन् स्वगृहं गतः।

सः ब्राह्मणः अभियोगतिथौ न्यायालयं गत्वा विदितवान् यद् अभियोगः सम्पन्नः। केनचित् न्यायालये तन्नाम्ना वित्तं समर्पितम्। सः अचिन्तयत् केन उदारपुरुषेण मयि अनुकम्पा कृता? मार्गे सामान्यवत् दृश्यमानेन पुरुषेण इदं विहितम् इति तस्य मनः विचारयितुम् अपि न शक्यते।

**4.3.11 कौ भवन्तौ?**

एकदा राजा भोजः महाकविः माघः च द्वौ वेषं परिवर्त्य परिभ्रमन्तौ द्विपथं प्राप्तौ। तन्निकटस्थं कुटीरम् एका वृद्धा अध्यास्ते स्म। तौ तां वृद्धाम् अपृच्छताम् –''अयं पन्थाः कुत्र याति''?

–''नायं पन्था कुत्रापि याति। अनेन पथा पथिकाः अवश्यं यान्ति। भवन्तौ कौ स्तः''? वृद्धा अपृच्छत्।

–''आवां यात्रिणौ स्वः'' राजा भोजः प्रत्यवदत्।

वृद्धा– ''द्वौ एव यात्रिणौ, सूर्यः चन्द्रः च। युवां कौ स्थः''?

राजा – आवाम् अतिथी स्वः।

वृद्धा– द्वौ एव अतिथी, एकं धनम् अपरं यौवनम्।

राजा– आवां राजानौ स्वः।

वृद्धा– द्वौ एव राजानौ इन्द्रः च यमः च।

कविः– आवां क्षमावन्तौ स्वः।

वृद्धा– एका नारी अपरा ध्रा च द्वे एव क्षमावत्यौ।

कविः– आवां परदेशिनौ स्वः।

वृद्धा– परदेशिनौ अपि द्वौ जीवः विटपः च।

राजा– आवां दीनौ स्वः।

वृद्धा – अजा च कन्या च द्वे एव दीने भवतः।

तौ व्याकुलौ भवतः अन्ततः राजा अब्रवीत्– मातः! आवां पराजितौ स्वः

वृद्धा – पराजितौ अपि द्वौ भवतः एकः कन्यायाः पिता अपरः अध्मर्णः च। एतौ द्वौ क्षुब्धै दृष्ट्वा वृद्धा अब्रवीत्– अहं विज्ञापयामि, कौ भवन्तौ? एषः राजा भोजः, एषः कविः माघः। भवन्तौ अनेन पथा अवन्तिं गच्छताम्।

**4.3.12 लोभः**

कस्मिंश्चित् नगरे कश्चन धनाढ्यः निवसति स्म। तस्य लौहमञ्जूषा सदा स्वर्णेन मनः च सदा लोभेन पूरितं आसीत्। सः अतीव कृपणः कस्मैचन एकां कपर्दिकाम् अपि न ददाति स्म। आगतं भिक्षुकं तिरस्करोति स्म।

एकदा एकः साधुः तस्य आपणं समायातः। सहसा श्रेष्ठिनः हस्तात् निःसृत्य एकं रूप्यकं साधोः पटकोशिकायां न्यपपत्। सायंकाले गृहम् आगच्छता श्रेष्ठिना पथि पतिता एका स्वर्णमुद्रा उपलब्धा।

निशायां तल्पे सः व्यचिन्तयत्– ''अद्य मया साधवे एकं रूप्यकं प्रदत्तम्, प्रतिकारे स्वर्णमुद्रा उपलब्धा। कदाचित् स्वर्णमुद्रा प्रदत्ता चेत् तदा तु न जाने कियन्मुद्राणाम् उपलब्धिः भवेत्। श्वः हि स्वर्णमुद्रां प्रदास्यामि।

अन्येद्युः सः आपणे साधुं प्रतीक्षते स्म। प्रहरद्वयस्य अनन्तरं सः साधुः आगच्छत्। श्रेष्ठी मञ्जूषातः एकां स्वर्णमुद्रां निष्कास्य तस्य वस्त्रकोशिकायां प्राक्षिपत्। तेन दिवस्य अवशिष्टः समयः कष्टेन अतिवाहितः।

सायंकाले शनैः–शनैः गृहम् आगच्छता मार्गे इतस्ततः पश्यता तेन न एका अपि कपर्दिका लब्धा।

रात्रौ सः शिरः हस्ताभ्यां ताडयन् पश्चादतपत्, यत् किं मया स्वर्णमुद्रा प्रदत्ता? निशायाः तृतीयप्रहरे सः निद्रावशं गतः।

स्वप्ने एका देदीप्यमाना देवता आगत्य श्रेष्ठिनम् अब्रवीत्–श्रेष्ठिन्! त्वया सदा स्मर्तव्यम्– ''त्यागः फलति लोभः छलयते''।

**4.3.13 प्रलोभनम्**

निशामुखे काचन काञ्चनाभरण–भूषिता युवती विलम्बागतात् रेलयानात् ग्रामस्य स्थैषणम् अवतीर्णा। तस्याः गृहं स्थैषणात् दूरम् आसीत्। सा एकाकिनी ग्रामं गन्तुम् अबिभेत्। सा स्थैषणप्रबन्धकस्य गृहं गत्वा अवदत्– ''अहं रात्रौ त्वद्गृहे विश्रामितुम् इच्छामि। प्रातः स्वगृहं गमिष्यामि''। तस्याः आभूषणानि प्रेक्ष्य प्रबन्ध्कस्य मनसि प्रलोभनं जागरितम्।

सः युवतीं प्राह– ''स्वस्सः। गृहे मे तव वासः तु अशक्यः। त्वं स्वाभूषणानि मत्पार्श्वे निक्षेपरूपेण संरक्ष, प्रातः तानि नयस्व। स्थैषणे एकं काष्ठ तल्पम् अस्ति, तस्मिन् शेष्व। ग्रीष्मरात्रौ वातप्रचलनेन सुखेन स्वप्स्यसि। सा युवती सर्वाभूषणानि पटे आबध्य तस्मै दत्तवती। तथा निर्दिष्ट–काष्ठ–तल्पे प्रवारेण स्वम् आच्छाद्य अस्वपीत्।

गते अर्धप्रहरे एकः युवकः ताम् उत्थाप्य अवदत्– ''इतः गच्छ त्वम्, प्रतिदिने अहम् अत्र एव स्वपिमि''। सा तूष्णीम् अन्यत्र गता।

अर्धरात्रौ अन्धतामसे लोभान्धः स्थैषणप्रबन्धकः काष्टतल्पं उपगम्य युवतीं मन्यमानः तं सुप्तं युवकं क्षुरस्य एकेन प्रबलप्रहारेण हिंसितवान्। प्रातः सा युवती हस्तेन तस्य गृहस्य कपाटम् अताडयत्। स्थैषणप्रबन्धकः तां युवतीं प्रेक्ष्य चकितः अभवत् तस्यै च आभूषणानि प्रत्यददात्।

रात्रौ मया कः हतः इति चिन्तयन् प्रबन्धकः काण्ठतल्पं गत्वा अपश्यत्, यत् मृतकः तस्य एव आत्मजः आसीत्। सः उन्मत्तः इव भूत्वा वारंवारं प्रालपत्, हा! लोभवशेन मया आत्मनः एकलपुत्रः हतः।

**4.3.14 स्वावलम्बनम्**

एकः युवकः आधुनिक–परिधनधरः रेलयानात् अवतीर्य भारिकं प्रतीक्षते स्म। ग्रामस्य रेलस्थैषणे भारिकः यानं वा कुतः भवति। एकः साधारण वेषं परिदधनः पुरुषः तस्य सम्मुखे उपस्थितः अभूत्। युवकः तं भारिकं विजानन् उवाच–''अहम् ईश्वरचन्द्र विद्यासागरस्य गृहं गन्तुम् इच्छामि। किं त्वम् इमां मञ्जूषाम् उत्थाप्य गमिष्यसि''?

''मया सह आगच्छ। अहं त्वा तस्य गृहं प्रापयामि'' इति वदित्वा ग्रामीणः तां मञ्जूषाम् उन्नीय अगच्छत्।

ईश्वरचन्द्रेण लिखितानि पुस्तकानि अधीत्य तस्य पावनचरितं च श्रुत्वा युवकः तस्य श्रद्धालुः भक्तः च सञ्जातः। सः परोपकार तत्परः महामानवः अस्ति। अद्य मे सौभाग्यं यत् तस्य दर्शनं करिष्यामि इति चिन्तयन् सः युवकः भारिकम् अनुगच्छति स्म।

ग्रामीणः मंजूषां गृहस्य बहिर् अन्यस्य अब्रवीत्–''इदम् एव ईश्वरचन्द्रस्य गृहम् अस्ति।

युवकः यावत् भाटकं प्रदातुं हस्तं प्रासारयत् तावत् ईश्वरचन्द्रस्य ज्येष्ठ भ्राता बहिर् आयातः। युवकः कृताञ्जलिः तम् अपृच्छत्–''किम् ईश्वरचन्द्रः विद्यासागरः गृहान्तरे विराजते''?

सः साश्चर्यम् उक्तवान् –''यः ते मञ्जूषां समानयत् सः एव ईश्वरचन्द्रः''। एतत् निशम्य युवकः लज्जाभिभूतः ईश्वरचन्द्रस्य पादौ गृहीत्वा क्षमाम् अयाचत्।

मम देशवासिनः मिथ्याभिमानं त्यक्त्वा स्वहस्ताभ्यां निजकार्यं सम्पादयेयुः, ते स्वावलम्बिनः भवेयुः। इदम् एव मे भाटकम् इति युवकम् ईश्वरचन्द्रः विद्यासागरः उवाच।

**4.3.15 मानहानिः**

कस्मिंश्चन पुरुषे मानहानेः अभियोगः आसीत्। दण्डाधिकारी तम् अपृच्छत्– किं त्वं समादरणीयं नेतारं 'दुराचारी' इति कथितवान्?

नेता अपि न्यायालये सम्मुखे समुपस्थितः आसीत्। सः अचिन्तयत्– अयम् अभियुक्तः निराकरिष्यति, किन्तु अभियुक्तः अब्रवीत्– ''श्रीमान् अहम् उक्तवान्''।

दण्डाधिपः पुनः अपृच्छत्– ''किं त्वया चौरः उक्तः''?

अभियुक्तः निर्भयम् अवदत्– श्रीमन्! उक्तः।

दण्डाधिपः – त्वया दस्युः अपि उक्तः?

अभियुक्तः: – उक्तः श्रीमन्!

दण्डाधिपः – किं त्वया वधकः उक्तः?

अभियुक्तः – उक्तः

दण्डाधिपः – किं त्वया गर्दभः अपि उक्तः?

अभियुक्तः – इदं नैव उक्तम्, महाराज!

दण्डाधिपः – गर्दभः कथं न उक्तः?

मया चिन्तितम् श्रीमन्! गर्दभः मह्यं न रुष्येत्। यस्मात् हि गर्दभः दुराचारी न भवति, नापि चौरः, न दस्युः न वधकः। अहम् अबिभयं यत् गर्दभः अपि मयि मानहानेः अभियोगं न कुर्यात्।

# 4.4 विविधानि संस्कृतगीतानि

### 4.4.1जय जय हे भगवति!

जय जय हे भगवति सुरभारति
तव चरणौ प्रणमामः।
नादब्रह्ममयि जय वागीश्वरि
शरणं ते गच्छामः ।। जय जय हे... ।।

त्वमसि शरण्या त्रिभुवनधन्या
सुर–मुनि–वन्दित–चरणा
नवरसमधुरा कवितामुखरा
स्मित–रुचि–रुचिराभरणा ।। जय जय हे... ।।

आसीना भव मानसहंसे
कुन्द–तुहिन–शशि–धवले
हर जडतां कुरु बोधिविकासं
सित–पंकज–तनु–विमले ।। जय जय हे... ।।

ललितकलामयि ज्ञानविभामयि
वीणा–पुस्तक–धरिणी
मतिरास्तां नो तव पदकमले
अयि कुण्ठाविषहारिणि ।। जय जय हे... ।।

### 4.4.2वाणी–वन्दना

वीणानिनादिनि देवि मातः शारदे शुभदे शुभे,
सौख्यप्रदायिनि बुद्धिदात्रि स्नेहदे सुखदे प्रभे।
हे ज्ञानदे वरदे प्रिये विद्याविभाविभुवल्लभे,
साहित्यवारिधिमज्जने मतिदे शिवे मतिदे हि मे ।। 1 ।।

अज्ञाननाशिनि भव्यभाषाभाषिणि प्रबलेऽबले,
विद्याविलासिनि शुभ्रवस्त्रे शास्त्रसारसुसारिणि।
कर्त्तव्यकर्मविभाविनि ध्रुवधर्मकर्मविबोधिनि,
मातः सरस्वति पाहि मां शरणगतं शरणप्रदे ।। 2 ।।

धर्मार्थचिन्तनसंरते कविताकलाकलितेश्वरि,
संगीतगीतिसुगायिनि प्रतिभाप्रदानपरायणे।
हंसासने सुविराजिते सकलाश्रये जनमोददे,
मातः सरस्वति पाहि मां शरणागतं शरणप्रदे ।। 3 ।।

संसारबन्धनमुक्तिदे युक्तिप्रदे भुक्तिप्रदे,
हे हे दयामयि शक्तिदे भक्तप्रिये भक्तिप्रदे।
मायाममत्वविनाशिनि प्रज्ञापरे सन्मार्गदे,
मोहान्धकारनिमज्जितं मां पाहि हे सद्बुद्धिदे ।। 4 ।।

### 4.4.3 अवनितलं पुनरवतीर्णा स्यात्

अवनितलं पुनरवतीर्णा स्यात् संस्कृतगंगाधरा
धीर–भगीरथ–वंशोऽस्माकं वयं तु कृतनिर्धाराः।।

निपततु पण्डितहरशिरसि, प्रवहतु नित्यमिदं वचसि
प्रविशतु वैयाकरणमुखं, पुनरपि वहताज्जनमनसि
पुत्रासहस्रं समुद्धृतं स्यात्, यान्तु च जन्मविकाराः ।। धीरभगीरथ.. ।।

ग्रामं ग्रामं गच्छाम, संस्कृतशिक्षां यच्छाम
सर्वेषामपि तृप्तिहितार्थं स्वक्लेशं न हि गणयेम
कृते प्रयत्ने किं न लभेत एवं सन्ति विचाराः ।। धीरभगीरथ.. ।।

या माता संस्कृतिमूला यस्या व्याप्तिस्सुविशाला
वाङ्मयरूपा सा भवतु, लसतु चिरं सा वाङ्माला
सुरवाणीं जनवाणीं कर्तुं यतामहे कृतिशूराः ।। धीरभगीरथ.. ।।

### 4.4.4 सुन्दरसुरभाषा

मुनिवरविकसित–कविवरविलसित–
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा।
अयि मातस्तव पोषणक्षमता
मम वचनातीता, सुन्दरसुरभाषा ।। मुनिवर ....।।

वेदव्यास–वाल्मीकि–मुनीनां
कालिदास–बाणादि–कवीनां
पौराणिक–सामान्य–जनानां
जीवनस्य आशा, सुन्दरभाषा ।। मुनिवर ....।।

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे
गति–मति–प्रेरक–काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरभाषा ।। मुनिवर ....।।

नवरस–रुचिरालङ्कृति–धरा
वेदविषय–वेदान्तविचारा
वैद्य–व्योम–शास्त्रादि–विहारा
विजयते धरायां, सुन्दरभाषा ।। मुनिवर ....।।

### 4.4.5 जयतु जननी

जयतु जननी जन्मभूमिः पुण्यभुवनं भारतम्
जयतु जम्बूद्वीपमखिलं सुन्दरं धामामृतम्।
पुण्यभुवनं भारतम्।।

धरित्रीयं सर्वदात्री शस्यसुफला शाश्वती।
रत्नगर्भा कामधेनुः कल्पवल्ली भास्वती।

विन्ध्यभूषा सिन्धुरशना हिमगिरिशिखा शर्मदा।
रम्य–गंगा–संगयमुना महानदीह नर्मदा
कर्मतपसां सार्थतीर्थं प्रकृतिविभवालङ्कृतम्।। जयतु ...।।

आकुमारी–हिमगिरेर्नो लभ्यते सा सभ्यता।
एकमातुः सुतास्सर्वे भाति दिव्या भव्यता।
यत्र भाषा–वेष–भूषा–रीति–चलनैर्विविधता।
तथाप्येका ह्यद्वितीया राजते जातीयता।
ऐक्य–मैत्री–साम्य–सूत्रं परम्परया सम्भृतम्।। जयतु ...।।

आत्मशिक्षा–ब्रह्मदीक्षा–ज्ञानदीपैरुज्ज्वलम्।
योग–भोग–त्याग–सेवा–शान्ति–सुगुणैः पुष्कलम्।
यत् त्रिरंग ध्वजं विदधत् वर्षमार्षं विजयते।
सार्वभौमं लोकतन्त्रं धर्मराष्ट्रं गीयते।
मानविकता–प्रेमगीतं विबुधहृदये झङ्कृतम्।। जयतु ...।।

### 4.4.6 ध्येयपथिकसाधकऽऽ

ध्येयपथिकसाधकऽऽ
कार्यपथे साध्यऽऽ
मृदु हसन् मधुकिरन् मातरं सदा स्मरन्।।

जीवनं न शाश्वतं, वैभवं न हि स्थिरम्
स्वार्थलेपनं विना, यत्कृतं हि तच्चिरम्
सरलतास्वजीवनेऽऽ
चिन्तने सदोच्चताऽऽ
समाजपोषिता वयं समाजपोषकाश्चिरम्।। ध्येयपथिक.....।।

यच्च मनसि चिन्त्यते, यच्च कीर्त्यते गिरा
तच्च मूर्तरूपताम्, एति नित्यजीवने
जनन्यनन्यचरणयोःऽऽ
समर्पितस्वजीवनाःऽऽ
ध्येयसाधनव्रता वयं भवेम संगताः।। ध्येयपथिक......।।

स्मरत्विहाग्रजन्मनां, त्यागबलिसमर्पणम्
सिंहकुलसमुद्भवाः सिंहविक्रमा वयम्
सन्तु कष्टकोटयःऽऽ
भवतु विघ्नवर्षणंऽऽ
सकृत्प्रतिज्ञका वयं भजेम नो पलायनम्।। ध्येयपथिक.....।।

### 4.4.7 भारतधरणीयं मामकजननीयम्

भुवमवतीर्णा नाकस्पर्धिनी
भारतधरणीयं, मामकजननीयम्।।

शिरसि हिमालय–मुकुट–विराजिता
पादे जलधिजलेन परिप्लुता

मध्ये गंगापरिसरपूता
भारतधरणीयं, मामकजननीयम्।। भुवमवतीर्णा.... ।।

काश्मीरेषु च वर्षति तुहिनम्
राजस्थाने प्रदहति पुलिनम्
मलयस्थाने वाति सुपवनः
भारतधरणीयं, मामकजननीयम्।। भुवमवतीर्णा..... ।।

नानाभाषि–जनाश्रय–दात्री
विविध–मतानां पोषणकर्त्री
नानातीर्थ–क्षेत्रसवित्री
भारतधरणीयं, मामकजननीयम्।। भुवमवतीर्णा..... ।।

पुण्यवतामियमेव हि नाकः
पुण्यजनानां रुद्रपिनाकः
पुण्यपराणामाश्रयलोकः
भारतधरणीयं, मामकजननीयम्।। भुवमवतीर्णा..... ।।

### 4.4.8 नैव क्लिष्टा न च कठिना

(यमनकल्याणीरागः आदितालः)
सुरससुबोधा विश्वमनोज्ञा, ललिता हृद्या रमणीया।
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना ।। नैव क्लिष्टा ...... ।।

कविकोकिल–वाल्मीकि–विरचिता, रामायणरमणीयकथा।
अतीव–सरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना ।। सुरस सुबोधा... ।।

व्यासविरचिता गणेशलिखिता, महाभारते पुण्यकथा।
कौरव–पाण्डव–संगरमथिता
नैव क्लिष्टा न च कठिना ।। सुरस सुबोधा... ।।

कुरुक्षेत्र–समरांगणगीता, विश्ववन्दिता भगवद्गीता।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना ।। सुरस सुबोधा... ।।

कविकुलगुरु–नव–रसोन्मेषजा, ऋतुरघुकुमारकविता
विक्रम–शाकुन्तल–मालविका
नैव क्लिष्टा न च कठिना ।। सुबोधा... ।।

### 4.4.9 लोकहितं मम करणीयम्

(हिन्दोलरागः आदितालः)

मनसा सततं स्मरणीयम् वचसा सततं वदनीयम्
लोकहितं मम करणीयम् ।। लोकहितम्..... ।।

न भोगभवने रमणीयम्

न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्
लोकहितं मम करणीयम् ।। लोकहितम्.....।।

न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम्।
कार्यक्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम् ।। लोकहितम्.....।।

दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम्।
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम् ।। ।। लोकहितम्.....।।

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे।
तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम् ।। लोकहितम्.....।।

### 4.4.10 मृदपि च चन्दनम्

मृदपि च चन्दनमस्मिन् देशे ग्रामो ग्रामः सिद्धवनम्।
यत्र च बाला देवीस्वरूपा बालाः सर्वे श्रीरामाः।।

हरिमन्दिरमिदमखिलशरीरम्, धनशक्ती जनसेवायै
यत्र च क्रीडायै वनराजः, धेनुर्माता परमशिवा।
नित्यं प्रातः शिवगुणगानं, दीपनुतिः खलु शत्रुपरा।। यत्र च बाला ।।
भाग्यविधायिनिजार्जितकर्म, यत्र श्रमः श्रियमर्जयति
त्यागधनानां तपोनिधीनां, गाथां गायति कविवाणी।
गंगाजलमिव नित्यनिर्मलं, ज्ञानं शंसति यतिवाणी।। यत्र च बाला ।।
यत्र हि नैव स्वदेहविमोहः युद्धरतानां वीराणाम्
यत्र हि कृषकः कार्यरतः सन्, पश्यति जीवनसाफल्यम्।
जीवनलक्ष्यं न हि धनपदवी, यत्र च परशिवपदसेवा।। यत्र च बाला ।।

### 4.4.11 संस्कृतस्य सेवनम्

संस्कृतस्य सेवनं, संस्कृताय जीवनम्।
लोकहितसमृद्धये भवतु तनुसमर्पणम्।।

कार्यगौरवं स्मरन्, विघ्नवारिधिं तरन्
लक्ष्यसिद्धिमक्षिसात् करोमि सोद्यमः स्वयम्।
यावदेति संस्कृतं, प्रतिजनं गृहं गृहम्
तावदविरता गतिस्तावदनुपदं पदम्।। 1 ।।

कामये न सम्पदं, भोगसाधनं सुखम्
किञ्चिदन्यदाद्रिये विना न संस्कृतोन्नतिम्।

गौरवास्पदं पदं, नेतुमद्य संस्कृतम्
बद्धकटिरयं जनो निधाय जीवनं पणम्।। 2 ।।

भाषिता च वागियं, भाषिता भवेद् ध्रुवम्
भाष्यमाणतां समेत्य राजतां पुनश्चिरम्
भरतभूमिभूषणं सर्ववाग्विभूषणम्
संस्कृतिप्रवाहकं संस्कृतं विराजताम्।। 3 ।।

### 4.4.12 पाठयेम संस्कृतम्

पाठयेम संस्कृतं जगति सर्वमानवान्।
प्रापयेम भारतं सपदि परमवैभवम्।।

व्यक्तियोजकत्वमेव नायकत्वलक्षणम्
धर्मसवेकत्वमेव शास्त्रतत्त्वचिन्तनम्
स्नेह–शक्ति–शील–शौर्य–देशभक्ति–भूषितम्
साधये शीघ्रमेव कार्यकर्तृमण्डलम् ।। पाठयेम ।।

विश्वबन्धुमेलनेन सर्वदोषनाशनम्
उच्चनीचजातिराज्य–भेदभाववारणम्
समारस्यरक्षणेन शान्तिपूर्णजीवनम्
कालयोग्यमेतदेव मोक्षदायिदर्शनम् ।। पाठयेम ।।

जीवनस्य कार्यमेव राष्ट्रकर्मसाधना
राष्ट्रशक्तिवर्धनाय दिव्यभव्ययोजना
व्यक्तिरस्तु वर्तिकेति मानकीनभावना
साधितास्तु मानवस्य विश्वविजयकामना ।। पाठयेम ।।

### 4.4.13 भारतं भारतीयं नमामो वयम्

सागरं सागरीयं नमामो वयम्
काननं काननीयं नमामो वयम्
पावनं पावनीयं नमामो वयम्
भारतं भारतीयं नमामो वयम् ।। 1 ।।

पर्वते सागरे वा समे भूतले
प्रस्तरे वा गते पावने संगमे
भव्यभूतं कृतं संस्मरामो वयम्
भारतं भारतीयं .................. ।। 2 ।।

वीरता यत्र जन्माश्रिता संगता
संस्कृतिर्मानवीया कृतावागता
दैव–सम्मानितं पावनं सत् पदम्
भारतं भारतीयं .................. ।। 3 ।।

कोकिला–काकली–माधवी–माधुरी
पुष्प–सम्मोहिता यौवनावल्लरी
षट्पदानामिहा–मोददं गुञ्जनम्
भारतं भारतीयं .................. ।। 4 ।।

पूर्णिमा चन्द्रिका–चित्त सम्बोधिका
भाव–सम्वर्धिका चास्ति रागात्मिका
चञ्चला–चुम्बितं पावनं प्रांगणम्
भारतं भारतीयं .................. ।। 5 ।।

### 4.4.14 भाति मे भारतम्

भाति मे भारतम्, भाति मे भारतम्।
भूतले भाति मेऽनारतं भारतम् ।। ध्रुवकम्।।

मानवामानितं दानवाबाधितं
निर्जराराधितं सज्जनासाधितम्।
पण्डितैः पूजितं पक्षिभिः कूजितं
भूतले भाति मेऽनारतं भारतम् ।। 1 ।।

यस्य संदृश्य संदृश्य शोभा नवा
यस्य संस्मृत्य संस्मृत्य गाथा नवाः।
रोमहर्षो नृणां जायते वै सतां
भूतले भाति तन्मामकं भारतम् ।। 2 ।।

यच्च विश्रामभूमिर्मतं प्राणिनां
यस्य चित्ते प्रभूतोऽवकाशस्तथा।
यत्र चागत्य गन्तुं न कोऽपीच्छुको
भूतले भाति तन्मामकं भारतम् ।। 3 ।।

पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः
शस्त्रिभिः शास्त्रिभिवर्णिभिर्गोहिभिः।
वानप्रस्थैश्च संन्यासिभिर्मण्डितं
भूतले भाति मेऽनारतं भारतम् ।। 4 ।।

### 4.4.15 धीवरगानम्

**नायकः–** आयाहि रेऽऽ! आयाहि रेऽऽ! आयाहि रेऽऽ!
विहायसि सराग–रश्मि–चन्द्रमाः
तनोति सान्द्र–रोचि–मञ्जु–चन्द्रिकाः
सिन्धुरावघोषिताः रोदसीकन्दराः
यान्तु यानपात्रचालकाः सधीवराः ।। आयाहि ।।
**अनुयायिनः–** याहि रे! याहि रे! याहि रे! याहि रे! याऽऽहि।।

**नायकः–** चन्द्रहासमज्जिता तामसी प्रिया
सर्व–देह–कान्ति–पुञ्ज–मञ्जु–वल्गना

निश्चला विभासते तारलोचना
यान्तु यानपात्रचालकाः सधीवराः ।। आयाहि ।।
**अनुयायिनः–** याहि रे! याहि रे! याहि रे! याहि रे! याऽऽहि।।

**नायकः–** सागरेण चुम्बिता चन्द्रिका मुदा
राजते विलास–हास–लास्य–चित्रिता
रागिणीव भासते रागरञ्जिता
यान्तु यानपात्रचालकाः सधीवराः ।। आयाहि ।।
**अनुयायिनः–** याहि रे! याहि रे! याहि रे! याहि रे! याऽऽहि।।

## 4.5 विविधाः हास्यकणिकाः

### 4.5.1 कण्डूतिः चर्मरोगः वा

एकदा एकः चंचलप्रवृत्तिकः पुरुषः पण्डितसमीपम् आगत्य वदति– भो पण्डित! मम हस्ते कण्डूतिः दृश्यते। पण्डितः वदति– तर्हि धनलाभः भविष्यति। पुनः सः पुरुषः वदति– मम कर्णे अपि कण्डूतिः दृश्यते। पण्डितः वदति– एवं वा तर्हि कर्णाभरणलाभः भविष्यति। पुनः सः पुरुष वदति– इदानीं मम कण्ठे अपि कण्डूतिः भवति। तत् श्रुत्वा इदानीं पण्डितः अल्पकोपमिश्रितेन स्वरेण उक्तवान्– भवान् त्वरया वैद्यं दर्शयतु, यतः भवतः चर्मरोगः अस्ति।

### 4.5.2 अहं धावननिपुणः

छात्रावासे वसन् कश्चन बालकः स्वपेटिकायाम् एकं रांकवं स्थापयित्वा तदुपरि एकां चिटिकां स्थापितवान्। तत्र लिखितम् आसीत्– एतत् केनापि न चोरणीयम्। यतः अहं मल्लविद्यानिपुणः अस्मि। अनन्तरम् एकः चोरः आगत्य तं रांकवं चोरितवान्। तत्र सः चोरः एकां चिटिकां स्थापयित्वा गतवान्। तत्र लिखितम् आसीत्– मम अनुसरणं व्यर्थम्, अहं धावननिपुणः अस्मि।

### 4.5.3 अहो विस्मरणशीलता

द्वे महिले परस्परं वार्तां कुर्वन्त्यौ आस्ताम्। तयोः एका उक्तवती अयि सखि! श्रृणोतु 'मम पत्युः महती विस्मरणशीलता अस्ति। एकस्मिन् दिवसे अहम् उक्तवती 'आपणात् फलानि आनयतु इति। स तु वस्त्राणि आनीतवान्। अहम् उक्तवती आपणात् अन्नम् आनयतु, सः तु आभरणानि आनीतवान्। एवम्प्रकारेण तदा अपरा उक्तवती– मम पत्युः विस्मरणशीलता तु इतोऽपि अधिका वर्तते। एकदा सः आपणे मां दृष्ट्वा उक्तवान् – भोः भगिनि! भवत्याः नाम किम्? भवती कुत्र निवसति? पूर्वम् अहं कुत्रचित् दृष्ट्वान् अस्मि।

## 4.6 सारांशः

संस्कृतभाषा साहित्यिकभाषया सहैव व्यवहारस्य भाषा अपि विद्यते। यथा– प्राचीनकाले इयं भाषा साहित्यव्यवहारयोः द्वयोः एव भाषा आसीत्। तथैव सम्प्रति अपि अस्यां भाषायां वाक्व्यवहारेण शाकमेव प्रभुतं साहित्यं लिख्यमानम् अस्ति। साहित्यस्य प्रमुखाधारः काव्यं भवति। इदं काव्यं गद्यं पद्यं रूपकम् इति त्रिविधं भवति। गद्यकाव्यं तु कथा–आख्यायिका इत्येवम्प्रकारेण द्विविधम्। कथाः मानवीयमूल्यानां शिक्षणस्य, नीतिपरकाणां विषयाणां ज्ञानस्य, विविधानाम् उदात्तगुणानां शिक्षणस्य च प्रमुखं साधनं भवति। संस्कृते कथाकथनेन पठनेन प्रयोगेण च

भाषाभ्यासः सुदृढः भवति। गीतानि पद्यकाव्यस्य अन्तर्गतं भवन्ति। गीतेषु गेयात्मकता भवति, मनोरंजनं भवति। गीतस्य ज्ञानेन छन्दज्ञानं, स्वरज्ञानं, लयज्ञानं, रागज्ञानं, विविधानां महत्त्वपूर्णानां शब्दानां ज्ञानं च भवति। अस्याम् अन्वितौ भवन्तः कथागीतयोः विषये पठितवन्तः। एतेषाम् अभ्यासं कुर्वन्तु।

## 4.7 सन्दर्भग्रन्थसूची

1. बोधकथाशतकम्, स्वामी गोपालमुनिः, प्रकाशकः—उत्तराखण्ड संस्कृत अकादमी, हरिद्वार।
2. गीतसंस्कृतम्, प्रकाशकः— संस्कृतभारती बैंगलूरु।

## 4.8 सहायोपयोगिग्रन्थसूची

1. एहि हसाम, प्रकाशकः— संस्कृतभारती बैंगलूरु।
2. शिशुसंस्कृतम्, प्रकाशकः— संस्कृतभारती बैंगलूरु।